Barcode : 4990010213814
Title - Sabdendu Sekhara Bishami Tika
Author - Raghabendracharya
Language - sanskrit
Pages - 266
Publication Year - 0
Barcode EAN.UCC-13

of about 20 ft. Two large Corliss steam
power will drive the main shafting.
the counter-lines of shafting in the aisles and sp
power furnished where necessary. Steam power i
boilers free to exhibitors. In the annex for hydr
machinery there is a tank 60 ft. by 160 ft. with 10 ft.
water. It is expected to exhibit all sorts of hydr
machinery in full operation, and at the southern end of
there will be a waterfall 35 ft. high by 40 ft. wide,
from the tank by the pumps on exhibition. T
probably be a larger exhibition at Philadelphia or
manufactures than at any previous exhibition.

To the eastward of the machinery building the U
Government has erected a building covering about
in which will be special exhibitions for the various G
departments, representing the Indians, Army,
coinage, geological and mineral wealth, and oth
subjects, to illustrate the faculties and resources of
ment, in time of peace, and as a war Power. Ther
be an interesting exhibition contributed by the S
Institution at Washington. From the highest grou
park, a short distance north of the inclosure, an
150 ft. in height will overlook all the buildings a
fine view of the Exhibition grounds and the city a
be enjoyed. This structure, erected by a Boston Co
of a central column of iron. Visitors are to be
to it on a spiral railway.

The Exhibition is to open on May 10 and c
The reception of articles begins on Jan. 1, and
admitted after March 31. The official catalogue
in the English, French, German, and Spanish
ten departments of classification, as follo
materials—mineral, vegetable, and animal. 2.
manufactures used for food, or in the arts, the
tractive or combining processes. 3. Textile and fe
apparel, costumes, and ornaments for the person.
and manufactures of general use in construction a
lings. 5. Tools, implements, machines, and pr
Motors and transportation. 7. Apparatus and
the increase and diffusion of knowledge. 8. F
public works, architecture, &c. 9. Plastic and g
10. Objects illustrating efforts for the improvem
physical, intellectual, and moral condition of man.

Mr. Philip Cunliffe Owen, of the Science and
ment at South Kensington, is at the head of the B
mission for this great International Exhibition at P

ASTRONOMICAL OCCURRENCES IN DE

(From the "Illustrated London Almanack.")

The Moon will be situated to the right of S
evening of the 3rd, and to the left on the evening
she is very near Mars on the evening of the 4th;
on the morning of the 24th, Mercury on the 27
the 29th, and Saturn on the last day. Her p
change are:—

First Quarter	on the	6th	at 56 minutes after	2h.	
Full Moon	,,	12th	at 45	,,	7
Last Quarter	,,	19th	at 56	,,	2
New Moon	,,	27th	at 4	,,	7

She is nearest to the Earth on the afternoon of the
most distant on the afternoon of the 25th.

Mercury rises 1h. 19m. before sunrise on the 1st, 59
6th, 40m. on the 11th, 23m. on the 16th, and 4m. on
the planet rising on these days at 6h. 27m. a.m., 6h. 5
7h. 18m. a.m., 7h. 40m. a.m., and 8h. 2m. a.m. On
the planet and Sun rise together, and the planet ris
light to the end of the year after this time. He
descending node on the 9th, in aphelion on the
superior conjunction with the Sun on the 26th, and
Moon on the 27th.

Venus is an evening star, setting on the 7th at 4h. 5
or 1h. 9m. after the Sun; which interval increases
by the 17th, to 1h. 51m. by the 27th, and to 2h. 0m.
day, the planet setting at 5h. 20m. p.m., 5h. 45m
5h. 58m. p.m. respectively on these evenings. Sh
greatest distance from the Sun on the 13th, and nea
on the 29th.

Mars is still an evening star, setting on
10h. 11m. p.m., or 6h. 21m. after
10h. 14m. p.m., or 6h. 25m. after
10h. 15m. p.m., or 6h. 21m. after the Sun;
10h. 17m. p.m., or 6h. 19m. after the Sun.
the 15th at 5h. 0m. p.m.; on the last day at
a near the Moon on the 4th.

Jupiter is a morning star, rising on the 7th at 5h
or 2h. 14m. before the Sun; on the 17th at 5h. 1
41m. before the Sun; on the 27th at 4h. 32
3h. 37m. before the Sun; and on the last day at 4h
or 3h. 43m. before the Sun. He is due south on
9h. 44m. a.m. He is near the Moon on the 24th.

Saturn is an evening star, setting on the 7th at 9h
on the 17th at 8h. 27m. p.m., on the 27th at 8h. 3
on the last day at 7h. 50m. p.m. He is due south
at 4h. 2m. p.m.; on the last day at 3h. 5m. p.m.
the Moon on the 4th, and again on the last day.

Rec'd for 69 Vol

Tabulated Statement

Pattamundai

— Year (ସାଲ) 1277

$$\frac{\sqrt{3}}{2}$$

$$\frac{\sqrt{3}}{2}$$

$$\frac{\sqrt{3}}{2}$$

॥ अथविषमीपदेन्दुशेखरव्याख्याप्रारभ्यते ॥

श्रीगणेशायनमः॥ ब्रह्मेशाद्यैः सुरवरगणैः स्तूयमानोप्यपारोव्यक्ताव्यक्तैस्त्रजतिभरतिप्रायपत्युच्चभावम्॥ यद्भ्रूभंगात्स्त्रजतिभुव
नंब्रह्मरुद्रादिसाश्रीर्वक्षः श्लिष्टजयतिसविभुःश्रीनिवासोवृषाद्रौ॥१॥ आत्रेयवंशविधुनासकलकलापारदृश्वनासुधि
या॥ श्रीराघवेंद्रगुरुणाक्रियतेशशेंदुशेखरव्याख्या॥२॥नवपुक्तिर्गुंफिततयाप्रौढांतांचंद्रिकांतुसंक्षिप्य॥विषमपदव
क्तविवृतिंकुर्वेहंबालबोधाय॥३॥पातंजलइत्यादिश्लोकत्रयमेकान्वयं॥संतीदीव्यतीतिविग्रहः॥कक्षःशुष्ककान
नम्॥कक्षस्तुदोर्मूलेशुष्ककाननेइत्यभिधानं॥मनोरमोमार्धदेहमिति॥तेनमनोरमोक्तार्थीप्रकाशनम्॥मनोरमा
याः क्वचिद्गुणत्वंसूचितंभवति॥समुचितमिति॥तत्वंचैतच्छास्त्रप्रवर्तकत्वसंबंधित्वात्॥तिरस्कृत्येत्यर्थेति॥निवृत्त
प्रेषणात्थानोर्हेतुमतिणिजितिभावः॥वृत्तिपरिच्छेदकत्वेनेति॥शक्तिग्राहकत्वेनेत्यर्थः॥स्वरसंधिस्तुनप्रवर्त्ततेत्व
र्णोपदेशकालेऽजादिसंज्ञानामनिष्पादात्इतिकैयटोक्तंतुनयुक्तम्॥तदुपदेशकालेऽजादिसंज्ञानामनिष्पादेपिसव
र्णसंज्ञादिफलस्यदीर्घादेः तुल्यास्यसूत्रादाविवस्वरसंधेरत्रप्रवृत्तौबाधकाभावात्इतिदीक्षितोक्तंदूषणमुद्दिधीर्षुणा
स्त्रकोशकारेणोक्तः कैयटग्रंथः उपजीव्यविरोधात्संधिर्नेत्यर्थैकतयाव्याख्यातस्तद्दूषयितुमनुवदति॥यत्विति॥ त

थाचाविकृताकारश्रवणमुपजीव्यजातशक्तिग्रहउपजीव्याविकृतश्रवणविरोधिसंधिकार्यनजनयतीतिभावः॥शक्त्यग्रहे
णेति॥इदमयुक्तम्॥नह्यकारादिषुशक्तिग्रहमुपजीव्यप्रवर्तमानंसंधिकार्यमर्थांतरेशक्तिग्रहजननद्वारस्योपजीव्य
शक्तिग्रहंनविहंतीतिरत्नकोशग्रंथार्थः॥किंतूक्तरीत्याऽविकृताकारादिश्रवणमुपजीव्यजातः शक्तिग्रहः स्वोपजीव्यवि
कृताकारादिश्रवणंनविहंतीतितथाचत्वदूषणमपरत्थेषोर्धानुष्कस्यकंठाडंबरमनुकरोति॥अकादिषुशक्तिनिश्चय
मुपजीव्यप्रवर्तमानंसंधिकार्यमुक्तनिश्चयविरोधिसंदेहाधायकतयानसंधिकार्यंप्रवर्तयतीत्याशंकते॥नचेति॥आम्ना
यशब्दोदृष्टांतार्थः॥अनुबंधानांमहेश्वरकृतत्वेतत्प्रत्याख्यानासंगतिमाशंक्यसमाधत्ते॥ऋमडुणनमिति॥प्रत्याख्या
नभाष्यस्यदृष्टार्थैकत्वखंडनपरत्वेवृत्तिसूत्रस्थभाष्यासंगतिमाशंक्यसमाधत्ते॥वृत्तिसूत्रस्थेति॥अतएवेति॥चतु
र्दशसूत्र्यावेदत्वादेवेत्यर्थः॥शरीरीति॥अनेनाशरीरेणेश्वरेणवेदः कृतइतिलभ्यते॥इदंतुनयुक्तं॥तस्यापौरुषेयत्वा
त्॥अस्यमहतोभूतस्यनिःश्वसितमितिश्रुतेश्च अनायासेनोच्चारितार्थैकत्वात्॥विमर्शेविचारेक्रियमाणेशिवादागत
मेवैतत्सूत्रजालंनतुढक्कानिनादएव॥अंत्याःवर्णाश्चतुर्दशयत्रसमुदाये इतिग्रहः॥अजितियोगविभागादच्॥यद्वा

चतुर्दशानांपूरणश्चतुर्दशाः सर्वेषामप्यविशेषेणतथात्वात्॥विग्रहस्तुपूर्ववत्॥अंत्यमित्यस्यासमस्तत्वेंत्यभूतश्चतुर्दशवर्णसमुदायइत्यर्थः॥तत्करणंचेति॥अन्येत्वनुबंधाःपाणिनिकृताएव॥समुपादिष्टमित्यस्येवमनुबंधाअसंक्तव्या इतिमहेश्वरेणोपदिष्टमित्यर्थइत्याहुः॥ननूपदेशपदस्यादेचउपदेशेइत्यादौपाणिनीयापूर्वोच्चारणार्थकत्वमिवमहेश्वरीयापूर्वोच्चारणार्थकत्वंतथाचतन्निमित्तत्वंप्राप्तमित्यतआह॥मंत्रोपदेशवदिति॥नहिमंत्रउपदेष्टृनिर्मितइतिभावः॥अतएवेति॥महेश्वरकर्तृकत्वाभावादेवेत्यर्थः॥इदंचिंत्यं॥श्रीवादरायणकर्तृकस्यापिभारतादेःसर्ववेदपारायणजपुण्यफलकत्वोक्तेः॥ननुहलित्प्रत्याहारसित्धेःप्राक्उपदेशेऽजित्यस्यवाक्यार्थबोधाभावेप्यण्प्रत्याहारकालेलणित्यकारस्येत्संज्ञालोपाभ्यामपहारसंभवेनाक्षरसमाम्नापिकानामेवग्राहकप्रणस्त्रेऽणुदित्सवर्णस्यचाप्रत्ययःइतिसूत्रेणाणुदेनग्रहणेनसानुनासिकाकारस्यानण्त्वात्तेनदीर्घसानुनासिकग्रहणंनसंभवतीत्याशंक्याहजातिग्रहणस्येति॥मामिति॥आनितिअण्शब्दस्यद्वितीयाबहुवचनम्॥तस्यनश्चव्यप्रणानितिरुत्वेऽनुनासिकत्वेचआँ इतिरूपम्॥यद्यपिजातिपक्षेनिरनुनासिकाकारस्यापिहलन्त्यंसुवचंतथापिसानुनासिकोच्चारणबलात्सानुनासिकस्येवाचत्वजात्यवच्छिन्नस्यहलन्त्रमित्यभिप्रेत्यसानुनासिकाकारे

स्तिस्तथैवोत्सर्गेणप्रवर्त्तितव्यमित्यर्थः॥प्रतिषेधइति॥तन्निमित्तत्वमित्यर्थः॥एवमुक्तिमिति॥एतदेवज्ञापयतीत्याघुक्तिः
नन्वेवंसंग्राहकवाक्यार्थबोधेहलंत्यंनविभक्तावित्यनयोरन्योन्याश्रयाभावेपिलघ्वसंस्कारकेउपस्थूयमानवाक्या
र्थबोधेन्योन्याश्रयःसुस्थएवापवादवाक्यार्थाबोधंविनातद्विषयपरिहारेणोत्सर्गवाक्यार्थोपस्थितायोगात्॥यद्वानविभ
क्तावित्येतद्वाक्यार्थबोधेतद्विषयपरिहारेणेतस्यप्रवृत्तिः॥एतत्प्रवृत्तौसुप्तिङनदिप्रत्याहारसिद्धिः॥तस्मिंश्चोचनवि
भक्तावित्येतद्वाक्यार्थबोधइत्यन्योन्याश्रयइत्यतआह॥नविभक्ताविति॥पदार्थज्ञानमात्रेणेति॥तथाचनविभक्तावि
त्येतद्वाक्यार्थबोधाभावेपितद्घटकप्रतियोगिसमर्पकतुसाइतिप्रथमांतपदार्थज्ञानमात्रेणपादीनांतद्भिन्नत्वेनतन्नि
षेधाविषयत्वग्रहेणतत्रेत्संज्ञाप्रवृत्तिःसुलभेत्याशयःअणुदित्यत्रोदितिक्कादीनांसंज्ञेतिबोध्यं॥तद्बलबभ्यमिति
तेनहलविलेखलनइतिधातोर्लस्यनेत्वम्॥उपदेशेनंत्यत्वादितिभावः॥इर्दित्यसदृशेनेत्यर्थइति॥प्रत्याहारनिष्प
त्तिकालेंत्यस्यासत्वेपितस्यस्मरणमात्रेणतत्सादृश्यज्ञानमिगादिशब्दघटकादिषुसुलभमित्याशयः॥व्यक्तिपक्षार्थे
इतिप्रत्युच्चारणवर्णव्यक्तिर्भिन्नेतिपक्षइत्यर्थः॥अत्रसादृश्यानुयोगिनःसमुदायाघटकत्वेपितत्प्रतियोगिनस्तथात्वात्

तेनैवसमुदायाक्षेपःसुलभः॥आहुरित्युत्तरमचिभ्रुधात्वित्यारभ्यस्यष्टमित्यंतोग्रंथः प्रक्षिप्तःप्रकृतासंगतेः॥एवंविधे
नाग्रिमग्रंथेनपुनरुक्तेश्च॥समासाभावस्येति॥निपातएकाजनाङित्यादौकर्मधारयदर्शनाद्युक्तमेतत्॥नांतरीयक
तयेति॥अंतरंविनाभवोंतरीयः॥गहादित्वाच्छः॥ततःस्वार्थेकः नञ्शब्देनसमासश्च॥प्राधान्यादित्संज्ञाभवनक्रियायामु
पदेशइत्यस्यान्वयभ्रमवारणायाह॥तत्रविद्यमानमिति॥क्रियामात्रंकालोपाधिरितिमतेउपदेशशब्दआद्योच्चारणप
रः॥मतांतरेलक्षणयातदधिकरणकालपरः॥तेनेधादीनांधादेर्नित्वं॥उपदेशेनंत्यत्वात्॥प्रधानक्रियान्वयेतुतद्दुर्वार
म्॥यद्यप्यधिकरणसप्तम्यंतस्यसाक्षात्कर्तृकर्मणोरेवान्वयः॥तद्द्वाराक्रियान्वयइतिवक्ष्यमाणस्वसिद्धांतरीत्याविद्य
मानइत्यध्याहारोनात्रावश्यकः॥अतएवाक्षेषुशेोंडइत्यत्रप्राचांविद्यतिक्रियाध्याहारेनवैदूषयिष्यतेतथाप्येधा दे
र्धस्येत्ववारणायाप्रधानान्त्यविशेषणतयाविद्यतिक्रियाध्याहारःकृतः॥नचैवंक्रियान्वयोप्यस्यकर्त्रादिद्वारेणेवेति
कारकप्रकरणस्थशेखरविरोधः साक्षाद्न्वयस्येवात्रस्वीकारादितिवाच्यम्॥तस्माक्षेशेोंडस्तिष्ठतीत्यादिविषयत्वात्॥
यत्रहिकर्तृकर्मविशेष्यतयाक्रियाभासतेतत्रतद्द्वारेवसप्तम्यंतस्यक्रियान्वयसंभवेक्रियांतराध्याहारोनयुक्तः॥साक्षाद

प्रधानक्रियायामन्वयश्चायुक्तः॥अक्षशौंडपदयोः समासानापत्तेः॥यत्रतु कर्तृकर्मक्रियेतद्विशेषणेयथाकटेशेतेदेव
दत्तः स्थाल्यांपक्वओदनइत्यादौ॥तत्रतुसाक्षादेवक्रियान्वयः॥तत्रविद्यमानमंत्यमित्यत्रापीत्थमेव ॥एवमक्षेषुशौंडस्यवस्त्र
मित्यादावप्यध्याहृतविद्यतिक्रियायामेवसप्तम्यंतार्थस्यान्वयइत्यलंप्रसक्तानुप्रसक्त्या॥यद्यप्येधादेर्धकारादिरुपदेशे
विद्यमानाकारस्येत्संज्ञोत्तरमंत्यश्चेत्युक्तव्याख्यायामप्येधादेर्धस्येत्संज्ञादुर्वार॥तथाप्याद्येवयसिधनीदेवदत्तइत्यादावि
वधर्मिपारतंत्र्येणोपदेशकालावच्छिन्नांत्यत्वेपिभासतेइतिनकश्चिद्दोषः॥तेनेतिउपदेशइत्यस्येत्संज्ञाभवनक्रियायामन्व
यंविहायांत्यपदार्थान्वयिविद्यतिक्रियायामन्वयकरणेनेत्यर्थः॥अन्यत्रत्विति॥ऋहलोर्ण्यदित्यादौतत्पूर्वमपिहल्प्रत्याहार
सिद्ध्यसंभवादितिभावःअंतरंगत्वादिति॥तेननधातुलोपइतिसूत्रस्थंधातुग्रहणंकिंलूञ्ल्वितेतिभाष्यंसंगच्छतेऽधातुसं
ज्ञायाःक्रियावाचकत्वज्ञानाधीनत्वेनबहिरंगत्वात्॥सित्युत्तरमिति॥वर्णोपदेशकालेतदव्यवहितोत्तरकालेचहल्प्रत्या
हारस्यासित्थेरितिभावः॥प्रायइति॥मनिनादेर्नकारद्यभिप्रायेणप्रायःपदं॥तत्रहितवर्गीतर्गतत्वेननिषेधविषयतासंभव
नयानविभक्ताविवाक्यार्थबोधोत्तरमेवतद्विषयत्वनिश्चयेननिषेधवाक्यार्थबोधोत्तरमेवतत्रेत्संज्ञा॥एवंसुपःपकारेपि

वेभा[illegible]घटकत्वेननिषेधविषयत्वसंप्रयात्॥तस्यैवार्थवत्वादिति॥तेनैवेति॥इदमयुक्तं॥सानुबंधकेनानुबंधविनिर्मु
क्तोपस्थितेरसंभवात्॥आर्धधातुकस्येडि त्यादेरुपदेशोत्तरमेवेत्संज्ञालोपाभ्यामपहारेजश्त्वानापत्तेश्च॥तस्माद्वा
क्यार्थबोधोत्तरमेवविधेयत्वप्रतिपत्युत्तरमेवे त्संज्ञालोपौ॥उपदेशोत्तरकालेइत्संज्ञेतिभाष्यमप्येवमेवकथंचिन्नेयम्
अन्येतूच्चारणंपरिनिष्ठितस्यैवोच्चारणोत्तरमेवतदपहारेणकाकस्येवनप्राब्दाहूर्धतेत्याहुः॥तदुपस्थाप्यएवेति॥किति
त्येवादीतद्बोध्यइत्यर्थइतिभावः॥तत्वाभावादिति॥इदंचिंत्यंअत्राउपोत्संज्ञाप्रवृत्तौबाधकाभावात्॥चितःसप्रकृते
र्बंधकजर्थइतिवार्तिकस्वारस्येनचितिप्रत्ययएवतत्प्रवृत्त्यानदोषइतितुवक्तुंयुक्तमितिकेचित्॥कुंडिनचिच्चित्स्वरा
प्रवृत्तिरुचिबीजम्॥भाष्योक्तमिति॥इदंचभाष्यंअनुबंधानांप्रयोगसमवायित्वात्॥प्रयोगासमवायिनश्चाणत्व
ब्रह्मणकप्रास्त्रेपुनर्वृत्तिरित्यभिमानेन॥नव्यमतेपीष्प्रिसमुदायस्यैवार्थवत्वेनतदैकदेशेकारस्यनिरर्थकत्वात्॥अ
णुदित्सूत्राप्राप्तेः॥अत्रकेचिदित्यारभ्याहुरित्यंतोग्रंथोऽस्मत्कृतत्रिपथगायांविवृत्तः॥विधाविति॥इदमयुक्तं॥नविधौ
परःशब्दार्थइतिन्यायविरोधात्॥ञ्नित्यादिर्नित्यमित्यादेर्मिद्बोध्यार्थकत्वेनसोभवतीत्यर्थेपिस्वरसित्यानकारेत्सं

ञ्कइतिविशेषणवैयर्थ्यात्॥एवमनुवादेपीत्यग्रिमग्रंथोप्ययुक्तः॥बोधकएवनकारेत्संज्ञकत्वस्यपूर्वमुक्तेः॥तत्र
नाच्परइति॥आटआकारइतिशेषः॥अभ्रमाँअपएतद्यावृत्तिरिति॥नन्वस्याप्यादेशत्वात्कथमेतद्यावृत्तिरिति
चेन्न॥स्वयमेवपरिनिष्ठितप्रयोगरूपत्वेनप्रयोगप्रासनकरणत्वरूपोपदेशनशब्दार्थाभावादित्याशयात्॥कैयटेतु॥
शास्त्रेउच्चारितोयोऽनुनासिकःसइत्संज्ञकइत्युक्तं॥पूर्वंप्रातिपदिकत्वेइति॥अनुबंधविनिर्मुक्तपदार्थोपस्थितिरित्य
नेनापिविरुणद्धिइतिबोध्यं॥यदामंजकादि निवृत्त्यर्थंप्रातिपदिकानामुपदेशः कर्त्तव्यइतितदायंप्रतिषेधइति
कैयटोक्तंवार्तिकोत्थानबीजंदूषयितुमाह॥एतद्भाष्येति॥नचप्रातिपदिनांप्रतिषेधेचित्रङादीनामपीत्संज्ञानापत्तिरि
तिवाच्यं॥एतच्चात्रयुक्तंयदित्कार्यंभावादित्संज्ञानस्याद्यत्रेत्कार्यंभविष्यतितत्रेत्संज्ञा॥तद्यथाऽऽगस्तिकौंडिन्ययोरग
स्तिकुंडिनजित्यग्रिमभाष्येणवार्तिकारंभेकुंडिनचश्चकारस्येत्संज्ञानस्यादित्येवंपरेणास्यापिदोषस्यदत्तप्रायत्वात्।ल
ष्यासित्थेश्चेति॥भावेघञंतत्वेपिलक्ष्यसिद्धिप्रकाशश्चंद्रिकायामुपपादितोद्रष्टव्यः॥लोपश्चेतिइदमनुबंधाअनेकां
ताइतिपक्षाभिप्रायेणतत्यक्षेपकारस्यादेशबोधकसमीपेपकारोच्चारणमात्रेण णित्वांगीकारादितिबोध्यं॥आनुना

सिक्यवंतइति॥नकर्मधारयान्मत्वर्थीयइतिनाश्रितंअसुब्वतइतिभाष्यप्रयोगेणक्वचिल्लाघवानादरात्॥यणापत्ति
रिति॥वस्तुतआंगत्वाद्यस्येतिलोपापत्तिर्द्रष्टव्या॥नचेत्वंतदपवादः॥इकारलोपानपवादत्वात्॥कारिकादोचारितार्थ्यी
च्च॥ऊकालोच्॥एकद्वित्रिमात्रकत्वेति॥एकादिनवांतानांह्रस्वादूस्यासाधुतायाःस्वेनवक्ष्यमाणतयाएकद्विकरणेहेतुरि
तिवदयमप्यसाधुरेव॥तावदत्रकालग्रहणमिति॥अन्येतुशब्दस्यलक्षणयैकमात्रापरत्वेनवर्णपरत्वाभावान्माणु
दित्सूत्रप्रवृत्तिरित्याहुः॥तितउच्चत्रमिति॥ननुवर्णाद्वर्णोत्तरोच्चारणेऽर्धमात्राकालव्यवायस्यस्वीकारेणअइत्यस्य
नद्विमात्रत्वमितिचेन्नावर्णोच्चारणाधिकरणकालत्वेनादोषात्॥तदेतदभिप्रेत्यवक्ष्यते॥अच्ग्रहणमिति॥अंतरं
गत्वेनेति॥कार्थिणोपिनिमित्तत्वमाश्रित्येदं॥सइति॥ऊर्ध्वभागप्रतिहतवायुव्यंजितोजित्यर्थः॥हलउदात्तादिसंज्ञा
यांबाधकाभावंचाह॥हल्स्वरइति॥तथाचहलउदात्तादिसंज्ञायांकिंबाधकंनतावदचःस्थानेउदात्तस्यहलआपत्तिः
॥आंतर्यतोऽचएवोदात्तस्यप्रवृत्तेः॥नापिहल्स्थानेतस्यापत्तिर्हल्स्वरप्राप्तौव्यंजनस्याविद्यमानवत्वादित्यर्थः॥ए
क्तेति॥तां तान्ट्टापिबोध्यं॥विवृत्तस्येत्यर्थइति॥मातृकायांत्वीषत्स्पृष्टएवऌकारोदीर्घइतिभावःलोकइति॥प्लु

नावैचइदुतावित्येतद्विषयः॥चतुर्मात्रास्तुकांदसाइतिभावः॥तुल्यास्यप्र॥यजुष्येकेषा मिति॥नन्वत्रप्रयत्नभेदादेवनसा
वर्ण्यमित्यरुचेराह तद्वानासामिति॥अनेनयावत्स्थानसाम्यएवसवर्णसंज्ञेत्यत्रायंनिर्देशएवज्ञापकमितिसूचितंभ
वति ह्रस्वदीर्घयोरिति॥इदमुपलक्षणं॥उदात्तानुदात्तयोरित्यपिबोध्यं॥ननुमात्राकालिकत्वादिरूपह्रस्वत्वादिकंनि
तिवक्ष्यमाणग्रंथेनास्यविरोधः॥तत्रह्रस्वत्वादिजनकयत्नस्यास्यबाह्यत्वोक्तेरितिचेन्न॥तज्जनकयत्नानांबाह्यत्वे
पितत्तत्स्थान स्थितवायुसंयोगानामास्यांतर्गतत्वाविरोधात्॥तथापीति॥नन्विकारैकारयोः सावर्ण्यदुर्वारम्॥इकार
स्यापिकंठतालुत्वादितिचेन्न विवृततरत्वादिप्रयत्नभेदेनसावर्ण्यस्यवारयितुंशक्यत्वात्॥अतएवैदेतोर्नसावर्ण्यं॥
किंचवस्तुतःकंठस्थानत्वंनसावर्ण्योपयुक्तम्॥किंतुशिक्षायांतथोक्तमेवतदेतदभिप्रेत्याह।भिन्नस्थानकथनेति॥ए
षामिति॥जमङणनानामित्यर्थः॥जमङणनानामपिनासिकास्थानत्वेशिक्षायामेषांतत्स्थानानुक्त्यान्यूनतास्पेदितिभा
वः॥जिह्वाग्रादाविति॥अत्रतद्व्यवहारःप्रातिशाख्येम्नोर्लघुप्रयत्नतरइत्यत्रचबोध्यः॥तत्रहिलघुतरःप्रयत्नोजिह्वाग्रा
दिर्यस्योच्चारणइतिविग्रहेजिह्वाग्रादीनांप्रयत्नशब्देनव्यवहारात्॥लघुतरत्वंचशिथिलत्वं॥कडयोःसावर्ण्येआनुना

सिकमेषामधिकोगुणइतिभाष्येणनासिकायाआस्यशब्देनतत्रत्यप्रयत्नस्यप्रयत्नशब्देनाग्रहणबोधनरूपायुक्तिर्वस्य
माणागुणशब्दस्यसावर्ण्यानुपयुक्तत्वांतरतम्यपरीक्षोपयोगित्वरूपार्थबोधकत्वेगुणशब्देनापिसूचिताभवति॥इत्य
भिप्रेत्याह॥वर्णाभिव्यक्त्यनंतरइति॥ननुगुणशब्दस्योक्तार्थकत्वेवृत्तिरादेजितिसूत्रस्थस्यभेदकत्वाद्गुणस्येत्यस्यापि
तथैवार्थः स्यात्॥तथाचैकोयमात्मोदकंनामतस्यगुणभेदादन्यत्वंभवति॥अन्यदिदमुष्णमन्यदिदंशीतमितिदृष्टांत
भाष्यमसंगतं स्यात्॥तेनतस्यधर्मार्थकत्वलाभादित्याशंक्यगुणपदस्यानेकार्थत्वेनसमाधानमभिसंधायाह अकार
दिनिष्ठेति॥तर्ह्युदात्तत्वादीनांगुणत्वव्यवहारानुपपत्तिः॥स्वाश्रयवर्णजनकस्थानविशेषावच्छिन्नवायुसंयोगातिरिक्त
स्यतज्जननेऽनुपयोगादित्यतआह उदात्तत्वादीनामिति॥नचोदात्तत्वाद्यंशेउक्तदृष्टांतभाष्यंनस्वारसिकमितिवाच्यं
॥तस्यानुनासिकांशेऽप्यस्वारसिकत्वेनोदात्तत्वाद्यंशेकथंचिद्योजनीयत्वात्॥उदात्तत्वादीनांसावर्ण्यानुपयुक्तत्वंतूदा
त्तादिजनकयत्नस्येत्यादिनाव क्ष्यमाणंद्रष्टव्यं॥ननुवेंडनदीनामपिस्वरूपोत्पत्तौकंठाद्यवच्छिन्नवायुसंयोगस्यैवहेतु
त्वं॥तद्वत्तानुनासिकजननेतुनासावच्छिन्नवायुसंयोगस्यहेतुत्वमितिकडारोरपितुल्यस्थानत्वंनासिकायाआस्यांत

र्गतत्वेपिसुवचमितितस्यास्तद्वहिर्भावोपपादनप्रयासोऽग्रिमोव्यर्थइत्याशंक्याह॥डनदीनामिति॥ननुवेवंशिक्षायांडन
दीनांनासिकास्थानानुक्त्वान्यूनतेत्याशंक्याह॥अनुस्वारेति॥एतेनप्रथमदूषणंनिराकृतंवेदितव्यं॥द्वितीयंनिराचष्टे क
ङ·योस्त्विति अतएवबात्वेति॥नासिकायाआस्यशब्देनतत्रत्यप्रयत्नस्यचप्रयत्नशब्देनाग्रहणादेवेत्यर्थःअन्येतुमुख
नासिकावचनइतिसूत्रेमुखनासिकमावचनमस्यमुखनासिकावचनः॥किमिदमावचनं॥ईषद्वचनमावचनं॥
किंचिन्मुखवचनंकिंचिन्नासिकावचनमितिभाष्येणभागस्यमुखेनोच्चारणाद्भागस्यनासिकयेतिकैयटग्रंथेनचडनदी
नांभागतोनासिकास्थानत्वंभागतोमुखस्थानत्वमितिपक्षोऽवतिष्ठते॥मुखेोपसंहितावानासिकावचनमस्यसोयंमुख
नासिकावचनंमितिभाष्येणमुखस्यनासिकायाश्चेदंतरालंस्थानांतरमेवानुनासिकस्येतिदर्शयतीतिकैयटेनचमु
खनासिकयोरंतरालंस्थानांतरमेवेत्यपरः पक्षः॥मुखद्वितीयावानासिकावचनमस्येतिभाष्येणयदातुसर्वएववर्णोमुखेननासिकयाचोच्चार्यतेइतिकैयटेनचसर्वभागावच्छेदेनमुखेननासिकयाचोत्पत्तिरितितृतीयः पक्षः॥त्रिष्व
पिपक्षेषुनासिकानास्यांतर्गतेतिस्पष्टमेव॥किंचमुखग्रहणंकिमर्थं॥नासिकावचनोनुनासिकइत्युच्यमानेयमानु

स्वाराणामपि प्रसज्येत॥अथनासिकाग्रहणंकिमर्थंमुखवचनोनुनासिकइत्युच्यमानेकचटतपानामेवप्रसज्येतेतिभाष्येणनासि
कानास्यांतर्गतेतिस्पष्टमेवोक्तंभवति॥नासिकायास्तदंतर्भूतत्वेनासिकास्थानानांयमानुस्वाराणामपिमुखवचनत्वेनकचतटपानामे
वेत्यवधारणासंगतेः।प्रासादवासिन्यायेनमुखग्रहणखंडनपरभाष्येणचनासिकानास्यांतर्गतामुखनासिकावचनमितिसूत्रमपि
नासिकायाआस्यबहिर्भावेसमंजसं।तथाच।सानुनासिकाकारादीनांडकारादीनांचोभयावच्छिन्नवायुसंयोगेनैवस्वरूपोत्पत्तिः।आनुनासि
क्यंतूभयेषांधर्मः॥इयांस्तुविशेषः।अकारादीनामनुनासिक्यादयोननियताः ङकारादीनांतुनियताइत्यनुस्वारयमानांचेतिशिक्षायास्त्वे
षांनासिकैवस्थानमित्यर्थः।गुणशब्दस्तुधर्मपरएवतथैवलोकप्रसिद्धेः।सावर्ण्यानुपयुक्तत्वंतुनगुणशब्दार्थः मानाभावात् एकोयमा
त्मोदकंनामतस्यगुणभेदादन्यत्वंभवत्यन्यदिदमुष्णमितिभाष्यस्वारस्येनचगुणशब्दोधर्मपरइतिलभ्यते॥आंतरतम्यपरीक्षोपयु
क्तश्चेतिविशेषणवैयर्थ्यंच॥नचपृथक्पृथक्प्रयप्रवृत्तिनिमित्तत्वेपितद्विवक्षितुंशक्यं।त्वन्मतेआभ्यंतरप्रयत्नानामपिगुणत्वाप
त्तेः।स्थानार्थगुणप्रमाणकृतमित्यभियुक्तोक्तोप्रमाणस्पृष्टथक्करणंब्राह्मणवसिष्ठन्यायेन।यद्वापाणिनीयशिक्षायांयस्ययस्यवर्ण
स्ययद्यत्स्थानमुक्तंतत्तदेवास्यशब्देनगृह्यते।पंचमानांचनासिकास्थानानुक्त्यानतस्यास्यशब्देनग्रहणं।अनुस्वारयमानांचेति॥चश्

धारणेसचभिन्नक्रमः॥नासिकैवस्थानमित्यर्थः॥तथाचयस्यवर्णस्यपाणिनीयशिक्षायामुक्तंस्थानंवर्णांतरस्यापितत्रोक्तं
तदूर्ध्वंपरस्परंस वर्णसंज्ञाभवतीतितुल्यास्यसूत्रार्थबलयोस्तुनसावर्ण्यम्॥शिक्षोक्तकंठादिस्थानपर्याप्तस्थानतायाएवसवर्णसंज्ञो
पयोगित्वात्॥नचैवंकडुयोःसावर्ण्यापत्तिः॥शिक्षांतरेडुकारस्यनासिकास्थानत्वोक्त्याकंठपर्याप्तस्थानत्वाभावा
दितिवाच्यं॥पाणिनीयशिक्षोक्ततत्स्थानकत्वेसति तदुक्ततदितरस्थानराहित्यस्यैवतत्पर्याप्तस्थानकत्वशब्दार्थत्वेनवि
वक्षितत्वात्॥शिक्षांतरोक्तस्यचप्रायेणेतच्छास्त्रीयकार्यनिर्वाहानुपयुक्तत्वात्॥अतएवाइउण्सूत्रेऽकारस्यविवृतोप
देशःकर्तव्यइतिवार्तिकभाष्येसंगच्छेते॥अन्यथाशिक्षांतरेआकारस्यविवृततरोक्त्यातदसंगतिःस्पष्टैव॥यावत्साम्यंतु
नतुल्यशब्दार्थःतेजसासूर्यतुल्योब्राह्मणइत्यादौयत्किंचित्साम्येपितुल्यशब्दप्रयोगदर्शनात्॥लुग्वेतिसूत्रेउदोष्ठ्येतिसू
त्रेचपर्याप्तिर्नविवक्षितेति॥अदुङ्हिवुउर्षतीत्यादौनदोषइत्याहुः॥समुदितमिति॥तदेवस्थानत्वपर्याप्तधिकरणमित्य
र्थः॥तथाचनवलयोःसावर्ण्यमित्यर्थः॥प्रत्येकमिति॥अतएवाग्नेयंपंचतुर्धाकरोतीत्यग्नीषोमीयेऽप्रवृत्त्योर्भीवाविरो
धादितिकात्यायनसूत्रस्याप्रामाण्यंजैमिनिनोक्तं॥वस्तुतःदेवतार्थकतद्धितस्यैंद्राग्नादेश्चतुर्धाकरणादिवारणायतथा

स्वभावांगीकारेपिइतस्तत्थितेतथाऽनंगीकारात्॥अतएवदेवदत्तस्यतद्भार्यायाश्चापत्येदैवदतिरित्याद्यप्रयोगप्रतिज्ञाविरो
धाच्चेत्युक्तरीत्याऽदुक्हिवुर्ऊर्षतीत्याद्यसित्थिरितिदूषणंद्रष्टव्यम्॥नाज्झ लावितिसूत्रेणेति॥वस्तुतस्तूष्म णामीषद्विव
तत्वेपीषत्स्पृष्टलृकारलकारयोः सावर्ण्यहेतूक्तारइत्यत्रतोर्ल्लीतिपरसवर्णापत्यातयोस्तदभावायनाज्झ लावितिसूत्रस्या
वश्यकत्वात्॥अधिकंनाज्झ लावितिसूत्रेऽस्मत्कृतव्याख्यायांकौस्तुभप्रभायांबोध्यम्॥स्पर्शेत्यादेः क्रमेणस्पृष्टेषत्स्पृष्ट
विवृतसंवृतव्याख्यानरूपत्वं ईषद्विवृतत्वंचेति। ईषत्स्पृष्टत्वमित्यर्थःयणामितियणामीषत्स्पृष्टत्वस्यापिव्यापकधर्मस्यसत्वेनयकार त्वे स्पृ
रस्यचवर्गेणरेफस्यटवर्गेणसावर्ण्यापत्तिः तथाचस्यानांप्रइवप्रयत्नोपिपावत्साम्यमेवविवक्षितमितिभावः॥अंचितइति न
नुयकारगतानुनासिकस्यनासिकास्थानत्वेपियकारस्यतत्स्थानत्वाभावान्नतस्यानुस्वारेणस्थानतआंतर्य॥किंतुञकारस्येवेति
सएवप्रवर्तते॥अतएवञ्नुडुवेत्यत्रञकारेपरसवर्णेनेतिविवरणेउक्तमित्यरुचेराह॥आदाविति॥तेनयरेनुनासिकइत्यत्रसव
र्णग्रहणापकर्षेपिचतुर्मुखइत्यादौणकारापत्तिर्न॥प्रयत्नभेदादिति॥ननुअनेनैवविवृतस्यसंवृतादेरीतस्यासित्थत्वेनोक्तरेण्य
कारोविवृतएवेतिदीर्घोदुर्वारइतिचेन्न॥अअइतिएथङ्रैरीनोत्तरकारस्यमूलतएवसंवृतत्वकल्पनात्॥घत्यजश्चानुनासि

केष्विति॥ननुघत्वेकृतेजश्त्वमपवादत्वात्बाधित्वाऽनुनासिकंचांतरंगत्वाद्बाधित्वाभष्भावेनकश्चिद्दोषइत्यरुचेराह॥वस्तु
तइति॥परत्वाज्जश्त्वेति॥नचझयइतिवत्वंजश्त्वा नुनासिकत्वयोरपवादः॥तांतेचरितार्थत्वात्॥तत्रतसौमथत्वर्थेइत्यने
नभत्वाज्जश्त्वाद्यप्राप्तेः॥इदमुपलक्षणमधिकारत्वाभावेगोमानित्यादौतलोपाद्यापत्तेः॥अतएवनमुनेति॥अतएववाक्यभे
देनान्वयादेव॥तन्निषेधेऽसित्यत्वनिषेधः॥पदैकवाक्यतयान्वयेतुअदसोसेरित्यादिनाऽसित्यत्वविशिष्टस्यमुत्वस्यविधानेन
मुनेइत्यनेनापितद्विधस्यमुत्वस्यैवनिषेत्यत्वेनामुनेत्यत्रमुत्वानापत्तिः॥असित्यत्वस्यप्राधान्येना विहितत्वेनतन्निषेधा
योगात्॥शास्त्रप्रवृत्ताविति॥तेनाग्नीइतीत्यत्रप्लुतेप्रवृत्तेपित्तस्यासित्यत्वात्प्रगृह्यसंज्ञाप्रवृत्तिः॥अंतरंगत्वादिति॥पूर्वत्रासि
द्धत्वनिमित्तकत्वादित्यर्थः॥वस्तुतोऽस्यांतरंगशब्दार्थत्वाभावात्॥उदाहरणाभावाच्चासंगतमेतत्॥सपादसप्ताध्यायीस्थकार्य
संभवनायांत्रैपादिकस्याप्रवृत्तेः॥अग्नीइतीत्यादावपियथोद्देशपक्षाश्रयणेनप्लुतात्पूर्वमेवप्रगृह्यसंज्ञा॥शास्त्रप्रवृत्तौनित्या
मकमिति॥पूर्वोक्तंत्वणोप्रगृह्येतिसूत्रस्थवक्ष्यमाणशेखरदिशोपपन्नं॥सोदीर्णमिति॥सोचिलोपेचेतिसुलोपः॥उदीर्णइति
ऋगतावित्यस्योत्पूर्वस्यरूपम्॥आत्मांतःकरणमिति॥इदमसंगतं॥आत्मपदस्यजीवपरत्वेबाधकाभावात्॥इच्छयोत्पन्नय

त्नेति॥इकयोप्रत्नोयत्नोयस्मिन्नितिविग्रहः॥तथाचविवक्षयेत्येतत्॥यत्नेनेत्येतस्याप्युपलक्षणमितिभावः॥ततोयत्नविशे
षेणेति॥इदमेकएवयत्नः कार्यजनकोवर्णनाशकश्चेतिपरः सन्निकर्षइतिसूत्रस्थभाष्यविरुत्थं॥तस्मात्तेनैवयत्नेनेतिव
क्तुमुचितम्॥औपाधिकभेदाभिप्रायेणवाकथंचिद्योज्यं॥वायुप्रेरणारूपमिति॥अल्पवायुमहावायुप्रेरणारूपमित्यर्थः॥अवि
वक्षेति॥कार्यानुपयोगित्वमित्यर्थः॥अतएवेति॥पूर्वत्वाभावादेवेत्यर्थः॥तथाचवर्गेष्वाद्याश्चत्वारएवयमाइतिप्राचीनविवर
णंतत्सदृशार्थकतयायोज्यमितिभावः॥ननुएत्तामज् त्तामित्यादौश्चुत्वंनस्यात्यमेनव्यवधानादितिचेन्न॥अशरीरंयमंप्राहु
रित्यादिवचनेनयमादीनामशरीरोक्तेर्यातद्व्यवधानस्याकिंचित्करत्वात्॥अयोगवाहाइति॥द्वितीयचतुर्थयमभिन्नाइत्यर्थः॥ञि
ण्हामूलीयइति॥उपध्मानीयस्यस्थानकथनंतूपध्मानीयोपधसोस्योष्ठ्यत्वेनबकारार्थंकथंचिद्भवतीतिभावः॥यमादीनामि
ति॥आदिपदेनानुस्वारविसर्गौअत्रयमानुस्वारयोर्नासिकास्थानकथनं॥अथमुख ग्रहणंकिमर्थंनासिकावचनोऽनुनासिकइती
यत्युच्यमानेयमानुस्वारणामेवप्रसज्येतेइतिभाष्योक्तदिशमुखग्रहणंव्यावृत्तिबोधनाय॥आदंतइति॥स्कः कचेतिकप्रत्ययांतो
दंतस्ततष्टाप्॥नित्यस्त्रीलिंगोयम्॥अंतस्थाभिश्चसंयुतमितिशिक्षावाक्यानुरोधादितिभावः॥एतेनविश्वपाशब्दवदादंतत्वे

ईषत्स्पृष्टमंतस्थानामितिनिर्देशसंगतिरित्यपास्तम्॥स्पर्शोष्मणोरिति॥मातृकापेक्षयेदं॥नाज्झ लावित्यादिनिर्देशेनेति॥
चझयोः सावर्ण्याभावेहस्यस्थानेझः पूर्वसवर्णोनस्यादितिभावः॥अशक्यत्वंस्यादिति॥इदमयुक्तं॥अयोगवाहानांदीर्घादीनां
सानुनासिकपवलानांदुःस्पृष्टसंज्ञकडकारस्येषत्स्पृष्टऋकारलृकारयोश्चासत्वापत्तेः॥अक्षरसमाम्नायेएषामनुपदिष्टत्वात्
एओङ्सूत्रस्थमनुपदिष्टंसत्कथंविज्ञातुंशक्यमितिभाष्यंतुवेदलोकसाधारण्येनसावर्ण्यानित्यत्व ज्ञापकत्वायोगात्॥नच
स्थानेंतरतमसूत्रेणनिर्वाहः॥वकारस्यस्थानेलृकारस्वरूपसंप्रसारणापत्तेः॥तस्माद्दकारस्यलृकारणभावायवर्णोपदेशेलृका
रपाठइत्येवतत्त्वं॥इथगनुबंधत्वेति॥गम्लृसृप्लृगतौएज्झभ्राज्झदीप्तावित्यादौ॥ओकारस्योष्ठ्यत्वमिति॥एतच्चप्रकृतानुपयु
क्तत्वादुपेक्ष्यं॥एकारशकारादीनामिति॥अन्येत्वाकारहकारयोरादिपदेनग्रहणमित्याहुः॥अत्रादिशब्दग्राह्यंचिंत्यमिति के
चित्॥यजुष्येकेषामितिनिर्देशाद्विकारेकारयोर्नसावर्ण्यं॥नन्वकारहकारयोः सावर्ण्येशिवोर्च्यइत्यादौहशिचेत्येवसित्येऽ
तोरेरितिव्यर्थंतस्मात्तयोस्तन्नेत्याशंक्याह॥हशिचेत्येवेति॥तथाचअकारहकारयोरपिसवर्णसंज्ञासत्वादाकारेपरतोपिहशि
चेत्युत्वेप्राप्ते ह्रस्वाकारएवेतिनियमार्थमतोरेरितिसूत्रमितिभावः॥अतएवभाष्येइति॥आकारप्रश्लेषादेवेत्यर्थः॥अणमु

द्दिश्येति॥तेनसंज्ञायाः संज्ञिनः पूर्वमुच्चारणंनदोषाय॥तस्माएवोद्देशत्वादिसूचितंभवति॥एतत्परिभाषाज्ञापकमिति॥
स्थालीपुलाकन्यायेनैकदेशानुमत्येतिबोध्यं॥दूषणांतरंचाह॥जातिपक्षेइति॥अप्रत्ययइत्यस्याविधीयमान्नार्थकत्वेतु
जातिपक्षप्राप्तस्यनिषेधोनस्यात्अनंतरस्येतिन्यायात्तस्यपर्युदासत्वाच्चेतिभावः परस्तमितितथाचाणुदित्सूत्रेचग्रह
णमेवकार्यंहयवरट्सूत्रस्थमथकिमर्थमंतस्यानामण्सूपदेशः क्रियतइतिभाष्यंत्वेकदेश्युक्तिरितिभावः॥सवर्णस्यचे
ति॥चकारस्यादसवर्णस्यापीत्यर्थः स्यादित्यतआह॥चोभिन्नक्रमइति॥ग्राहकसूत्रएवेति॥एतन्नियमपरेतरसूत्रेपि
वोध्यंइतितुनयुक्तमिति॥तपरसूत्रेऽणपदानुवृत्तौतुयुक्तमेवैतत्॥अत्रपरेणाण्ग्रहणेउरऋदितितपरकरणंभाष्योक्तम
पिज्ञापकबोध्यं॥तदुपपादनप्रकारस्तुकौस्तुभप्रभायांबोध्यःनप्राप्नोतीति॥अत्रहेतुर्व्यक्तिपक्षेतत्रत्यात्वत्यव्यक्त्योर्भेदेनेत्येता
वानेवचारितार्थ्येनेत्यंतस्तुअण्ग्रहणसार्थक्यप्रदर्शनपरः॥नन्वाद्यवर्णेप्युरणित्यादौकथंग्रहणकंशास्त्रप्रवृत्तिः॥व्यक्ति
पक्षेपाणिन्युच्चारितस्याक्षरसमाम्नायस्याभेदात्इत्यतआह॥णकारादिचिन्हेनेति॥नन्वादिरंत्येनेत्यत्रसहग्रहणात्समुदाय
स्यैवसंज्ञात्वं॥तथाचाणित्यत्राकारस्यनिरर्थकत्वात्कथंतत्राणुदित्सूत्रप्रवृत्तिरित्यतआह॥तत्रत्येति॥ननूपस्थितस्यानु

च्चारितत्वात्कथंप्रत्यायकत्वमतआह॥उच्चारिताभेदेनेति॥नन्वेवंवचनकाणदिचिन्हेनेतिपूर्वग्रंथोऽसंगतः॥अण्पदेनवर्णस
माम्नायस्यानामेवोपस्थितेः॥आद्यावर्णोपस्थितेरितितुअसंगतमनुपयुक्तंच॥तस्यनिरर्थकत्वेनानुपस्थापकत्वात्इतिचेन्न
प्रत्याहाराद्यवर्णेणकाणदिचिन्हेनाक्षरसमाम्नायस्योभेदग्रहणंविनोच्चारिताद्यवर्णाभेदेनाक्षरसमाम्नायस्यसग्रहणासंभव
इत्याशयात्॥प्रकृतेरिति॥अस्यच्चावित्यादेदूषणांतरंचाह॥प्रत्याहारघटकेति॥तत्रहेतुमाह॥उच्चारितस्यैवेति॥अण्ग्रहणं
चेतिचेननाज्झ लाविति सूत्रसंग्रहः॥ननुऋलृवर्णयोः सावर्ण्येपिऋकारेणनलृकारग्रहणंविभिन्नजातित्वात्सावर्ण्यंतुहो
तृलृकारइत्यत्राकः सवर्णेदीर्घाथैस्यादित्याशंक्याह॥ऋलृवर्णयोरिति॥ननुसमानजातित्वादेपेसावर्ण्याभावात्होतृलृकार
इत्यत्रसवर्णदीर्घोनस्यादित्यतआह॥एतद्व्यतिरिक्तेति॥तथाचसावर्ण्य मपिसमानजातित्वाव्यापकत्वात्समानजातित्वादे
पेनैवातिदिष्टमितिभावः॥ननुऋलृवर्णयोः सावर्ण्य स्याविधानेनष्टथगनुबंधकरणेनकस्यानित्यत्वंज्ञाप्यमित्यतआह॥ष्टथमि
ति॥अत्रपक्षेइतिपाठः व्यक्तिपक्षेइतिनुअपपाठः॥अनन्वयात्॥तस्यसर्वस्येति॥संयोगांतलोपादेः॥शब्दबोध्योवर्णइतिइद
मयुक्त मुच्चारितस्यैवप्रत्यायकत्वात्॥इण्प्रत्याहारेलृतेचोऽघटकत्वापत्तेश्च॥भाष्यप्रामाण्यात्तपर

करणाच्चतात्परशब्दः स्वबोध्यसमकालग्राहकइतितूचितं॥संख्याकृतव्यवहारस्येति॥इदमयुक्तं॥आकडारादधिकारादन्य
त्रसंज्ञयोर्बाध्यबाधकभावाभावात्॥नचस्वतोविरोधरहितयोस्तदबहिर्भूतयोर्बाध्यबाधकभावेपिस्वतोविरुत्थयोस्तदबहि
र्भूतयोरपिसोस्त्येवेतिवाच्यं॥संकोचेमानाभावात्॥किंचतपरः षण्णांसंज्ञा॥अण्त्वष्टादशानांसंज्ञेत्यनुवृत्त्यासवर्णग्राहकत्व
तात्कालिकसवर्णग्राहकत्वयोरविरोधेनचविप्रतिषेधपरिभाषाप्रवृत्तिः॥एतेनगुणानामभेदकत्वेत्वनवकाशत्वाद्धाधइत्य
प्रिमग्रंथोप्यपास्तः॥तस्मादण्ग्रहणानुवृत्त्यानियमार्थएवायंयुक्तः॥गोतोणिदित्यादौतुतकारोच्चारणसामर्थ्याद्दकारोवि
वक्षितः॥सित्यंतपक्षेपीति॥इदंगुणानामभेदकत्वेत्वनवकाशत्वाद्धाधइतिपूर्वग्रंथेनविरुत्थं॥तत्रविधित्वमंगीकृत्या
नवकाशत्वाद्बाधोक्तेः॥पंचमीसमासाभावेति॥एओङ्·ऐओजितिसूत्रेकिंदकारेप्रयोजनं॥अथकिंतकारेयद्यसंदेहार्थस्त
कारोदकारोपीतिभाष्यस्यपंचमीसमासतदभाववादिपरतयाकैयटेनयोजितत्वात्तदनुसारेणेदं॥नतुपंचमीसमासस्यपा
रिभाषिकत्वाभिप्रायेण॥धकारस्थानिकइति॥इदमप्ययुक्तं॥दकारंप्रतिपंचमीसमासानाश्रयणेनादोषात्॥त्रिमात्रश्चतुर्मा
त्रव्यावृत्तयइतियुक्तः पाठः॥अन्यत्र विस्तरइति॥इतिमंजूषादौविस्तरइत्यर्थः॥वस्तुतस्तुपदपदार्थयोस्तादात्म्यमयु

क्तं॥वन्हिरित्युक्तेमुखेदाहापत्तेः॥ नचभेदाभेदयोरंगीकारेणोक्तदोषनिस्तारः॥भेदमात्रांगीकारेणोक्तदोषनिरसनोपप
त्तेःअभेदांगीकारेमानाभावात्॥रामेतिद्व्यक्षरंनामेतिलक्षणयार्थेपरं आदेचोवृत्तिपदाभिन्नाइतिवाक्यार्थइत्यप्यपुक्तं
तथासतिशक्तिग्राहकत्वानुपपत्तेः॥अभेदस्यत्वयासंसर्गत्वानंगीकाराच्च॥तत्पदाभिन्नत्वेनतच्छक्यत्वानुमानात्॥परं
परयाशक्तिग्राहकत्वमित्यपिन॥वृत्तिपदाभेदस्तद्वाच्यत्वयोःसहकारग्राहकमानाभावात्॥तयोर्व्याप्तिग्रहासंभवात्॥वृत्ति
सूत्रेभाष्येसाक्षात्संज्ञासंज्ञिभावस्यैववाक्यार्थत्वोक्तेश्च॥तद्वाक्यंचोपपादयिष्यामः॥तस्मादादेचोवृत्तिपदवाच्याइत्येववा
क्यार्थः॥आदेचोवृत्तिपदस्यचवाच्यवाचकभावस्यसंसर्गमर्यादयाभानांगीकारात्॥नचसमानविभक्तिकनामार्थयोरभेदे
नैवान्वयइतिव्युत्पत्तिभंगः॥प्रतीतपदार्थकतदर्थयोरभेदान्वयः॥अप्रतीतपदार्थकतदर्थयोस्तुवाच्यवाचकभावेनान्वय
इतिव्युत्पत्त्यंगीकारात्॥तदुक्तंभाष्ये॥इदंखल्वपिभूयःसमानाधिकरण्येनैकविभक्तिकत्वंचद्रव्योश्चेतद्वृत्तिकयोर्विशेष
णविशेष्ययोर्वासंज्ञासंज्ञिनोर्वातत्रैतत्स्याद्विशेषणविशेष्यइतितच्चनद्रव्योर्हिप्रतीतपदार्थकयोर्विशेष्यविशेषणभावोभ
वति॥नचादेश्चब्दःप्रतीतपदार्थकःतस्मात्संज्ञासंज्ञिनावेवेति॥वाच्यवाचकत्वेपीति॥सर्वार्थवाचकत्वेपीति॥सर्वस्यप्र

दस्य सर्वत्रार्थसंकेतयितुमशक्यत्वादितिभावः॥ सामान्यतस्तथाज्ञानमिति॥ पटशब्दोजातिमद्वाचकः शब्दार्थस्यवाचकइ
त्येवंरूपेणशक्तिग्रहेपिघटपदेनघटत्वविशिष्टार्थाबोधात्॥ प्रकरणादिति॥ प्रकरणंस्वविषयविषमकशब्दबोधेहेतुत्वा
त्॥ अन्यार्थाग्रहणमर्थसिद्धं॥ अतएवष्फडि·ति॥ संपूर्णसंज्ञाशब्दोपस्थितेरेवेत्यर्थः॥ एतेनेति॥ उक्तभाष्यविरोधेनेत्यर्थः
भूवादयोधातवः॥ कालसंबंधाभावेनेति॥ तथाचकालपरिच्छिन्नत्वंक्रियात्वंतच्चसाक्षात्क्रियायामेवेतिकालाःपरिमाणिने
तिप्राचीनग्रंथेषुस्फुटं॥ एतेननतावत्धात्वर्थत्वंक्रियात्वंक्रियावाचित्वेज्ञातेसतिधातुत्वज्ञानंधातुवाच्यत्वेचक्रियात्वंज्ञा
नमित्यन्योन्याश्रयात्॥ नापिलिंगसंख्याकारकानन्वयितत्निपातसंज्ञकवाशब्दार्थेपितत्सत्वेनोक्तदोषानिस्तारात्॥ नापि
साध्यतयाप्रतीयमानंतत्॥ धात्वर्थेतथात्वस्यनिपातार्थेतद्भावस्यचशब्दपर्येकनिर्णेयत्वादित्यपास्तं॥ साध्यत्वेनप्रतीयमा
नत्वस्यापिधात्वर्थमात्रवृत्तित्वसमर्थनसंभवाच्च॥ अभिव्याप्येति॥ आङोध्याहारइतिभावः॥ विप्रादिघटकेति॥ विपूर्वात्पूरण
इत्यस्मात्कर्तरिरूपमितिभावः॥ इत्यर्थबोधनायेति॥ अयंभावः॥ क्रियेतिलुप्ततृतीयांतं॥ योगइतिपदांतरस्याध्याहारःस्तो
भ्वुनेत्यादिवत्॥ अयंयोगपदंचअर्थीआघजंतं॥ प्राद्यन्वयिधात्वर्थपरंविषयसप्तम्यंतं॥ तथाचक्रिययायुक्ताःप्रादयःस्वा

न्वयिक्रियाविषयेक्रियावाचकंप्रतिउपसर्गसंज्ञकाइति॥विगताःसेचकाइतिपाठः॥अभेदविवक्षेति॥इदंप्राचामनुरोधेनस्व
मतेतद्भावस्यवक्ष्यमाणत्वात्सांतग्रहणइति॥निसक्तपतावित्यादौ॥यत्रतुरुत्वमसित्थमिति॥रुत्वमसित्थमिति॥इदम
युक्तं॥इणनिष्ठायामितिसूत्रस्थभाष्यविरोधात्॥तथाहि॥इडित्यनुवर्तमानेपुनरिट्ग्रहणंकिमर्थंनित्यार्थमारंभः॥नैतदस्तिप्र
योजनं॥सित्थात्रविभाषानिरःकुषइत्यनेन॥तत्रारंभसामर्थ्यान्नित्योविधिर्भविष्यतिनात्रपूर्वेणविभाषाप्राप्नोतिकिंकारणंप
स्यविभाषेतिप्रतिषेधात्॥तत्रारंभसामर्थ्यादिभाषालभ्येत॥पुनःपुनरिड्ग्रहणादिडेवेति॥इणनिष्ठायांतत्रयदुपाधेर्विभाषा
तदुपाधेःप्रतिषेधइतिभाष्यकृतासित्थांतितत्वात्॥निरःकुषोनिष्ठायायस्यविभाषेतिप्रतिषेधेपिनिसःकुषोनिष्ठायाइट्सं
भवेननिष्कुषितंनिष्कुष्टमितिरूपद्वयस्यसित्थोनात्रपूर्वेणविभाषाप्राप्नोतीतिभाष्यासंगतेः॥इट्ग्रहणेक्रियमाणेप्युक्तरी
त्येड्विकल्पापत्यापुनरिड्ग्रहणादिडेवेतिभाष्यासंगतिश्च॥उक्तरीत्याविकल्पप्राप्तावितिनिष्ठायामितिसूत्रवैयर्थ्यंच॥तस्मा
दितिनिष्ठायामितिसूत्रारंभसामर्थ्यादुक्तभाष्यप्रामाण्याच्चयत्ररुत्वस्यासित्थत्वंसित्थत्ववंवातत्रसर्वत्रसांतग्रहणेसांतग्रहणंव्य
र्थमेवेत्युक्तंतद्वैयर्थ्यस्यस्पष्टमेवेति॥ननुरेफांतदुर्पूर्वकात्स्याधातोःकुप्रत्ययेषत्वाभावघटितप्रयोगवारणायसुषामादिषुदुष्शब्दप

ष्ठइतिचेन्न॥अपसुदुःषुस्कइतिन्यासेरेफांतस्परोःसुपीतिनियमेनविसर्गाप्राप्तेःसांतपूर्वकात्स्थधातोरेवकुप्रत्ययविज्ञानेनादे
षात्॥श्रुतक्रमानुरोधादिति॥यद्यपिशब्दस्यविरम्यव्यापारभावस्तथापिशब्दबोधोत्तरकालिकोबोद्धृणांप्रतिपत्तिक्रमोप
मित्यदोषः॥व्यक्तिपक्षेतुलक्ष्यभेदेनलक्षणभेदात्कचित्किंचिल्लक्षणंविधिमुखेनप्रवर्त्ततेइतीष्टसित्यासूत्रंनकर्त्तव्यमि
तिकेयटोक्तमयुक्तमित्यभिप्रेत्याह॥जातिव्यक्तिपक्षयोरुभयोरपीति॥स्वरूपंशब्दस्य॥कल्पितान्वयव्यतिरेकेति॥पदस्या
खंडत्वेनतत्रप्रकृतिप्रत्ययान्वयव्यतिरेकौकल्पितावितिभावः॥ईहल्यघोरिति॥नात्रशब्दस्यरूपग्रहणसंभवः॥तस्याकाणसं
भवात्॥प्रकारतयाभासमानस्येति॥नसोस्तिप्रत्ययोलोकेयःशब्दानुगमादृतेइत्यभियुक्तोक्त्याग्रंथेशब्दबोधेशब्दस्वरूपस्य
प्रकारतयाभानाभ्युपगमात्॥येनविधिःसर्वसंमतत्वादिति॥उपलक्षणमेतत्॥विधिरित्यस्यानन्वयापत्तेः॥अचाधातोर्यतं
विधत्तइति॥अत्रचैत्रसमक्षीलोधातुःसंग्रामसमक्षीलश्चयतहस्त्यादिसमक्षीलः॥अच्सेनापतिसमक्षीलश्चाचार्यःहस्त्यश्व
दिभिर्विधत्तइत्यत्रसेनापतिःकर्त्ता॥तत्रयद्यचैत्रस्यसंग्रामोल्यत्तोहस्त्यश्वादयःकरणमेवंधातोर्यदुत्पत्तावच्चकरणं॥यत्रधा
तावंतेऽचतत्रैवयतउत्पत्तेः॥भाष्येउदाहरणांतरंचदेवदत्तस्यसमाप्तःप्राणैरोदनेनचयज्ञदत्तःप्रतिविधत्तइति॥अन्येनच

न्यस्येत्यस्याचाधातोर्विधिरित्यर्थः॥ननुअन्येनचान्यस्येत्यनेनकार्यसंबंधिभिन्नस्यैवकरणत्वसूचनेपियस्मिन्न्यस्तःकार्यंत
स्याकरणत्वंकथंदर्शितं॥नचान्यस्येतिसंबंधसामान्यषष्ठ्याधातुप्रातिपदिकयोःपंचम्यंतार्थयोरिवसप्तम्यंतार्थस्यापिसंग्रहद्
तिवाच्यं॥अन्यस्येत्यस्योद्देश्यत्वार्थकषष्ठ्यंतत्वेनप्रत्ययविधौपंचम्यंतार्थस्योद्देश्यत्वेनतेनतस्यसंग्रहेपिसप्तम्यंतार्थस्या
संग्रहादित्यतआह अन्यस्मिन्नित्यस्यापीति॥ननुसप्तम्यंतार्थस्याकरणत्वेएतदपवादोयस्मिन्विधिरित्यपिसप्तम्यंतेनप्रव
र्त्तेतेतिचेन्न॥सप्तम्यंतंविनातस्याविषयाभावात्॥साक्षात्कार्यनिमित्तस्यविशेष्यस्यैवाकरणबोधनात्च॥अन्येतुविधिरिति
कर्मणिकिःतदंतस्येतिसंबंधिनउपादानन्तस्येत्यध्याहारः॥तथाचायंसूत्रार्थः॥यत्संबंधीयोविधिर्यत्कार्ययत्करणकंतदं
तस्यतस्यबोध्यमिति॥अचोयदितिधातुसंबंधीयद्विधिरचूकरणकइतितदंतस्यधातोःसंबंधीसबोध्यः॥तदंतस्येतिसं
बंधसामान्येषष्ठ्यंतमितिप्रत्ययविधौप्रकृतेरादेशविधौस्थानिनआगमविधावागमिनःसंग्रहः॥तथाचदेवदत्तस्यस
मापंशपणवैरेदनेनचयथायज्ञदत्तःप्रतिविधत्ते॥यथाधातोर्यंतमचाप्णुल्विधत्ते॥इकोयणित्यादौतुनतदंतविधिः
यत्संबंधीविधिर्यत्करणकंस्तदंतस्यतस्येत्यनेनकार्यसंबंधिभिन्नेकरणएवतदंतविधिःप्रवृत्तितल्लाभात्॥इदंचकार्यसंबंधि

व्यधिकरणविशेषणेकरणेनप्रवर्तते॥कार्यसंबंधिनःकरणत्वासंभवात्॥एवंयत्रकार्यसंबंधिनिसमानाधिकरणात्वमसंभवी॥तत्रापिनतदंतविधिः॥एवंचतदंतस्पेत्युक्तिबलात्॥समानाधिकरणविशेषणरूपमेवकरणंपर्यवस्यति॥तयोरकरणत्वंदर्शितमितिमूलोक्तंतुनयुक्तं॥इकइत्यनेनानिकोचीत्यनेनहल्परकेकश्चव्यावृत्तिकरणत्वसंभवात्॥तत्त्वांतरंगत्वात्समानाधिकरणमेवेत्यपिन॥शब्दतोविशेषणमित्युक्तौत्यंतरंगत्वात्समानाधिकरणेएवैतिकथंचिल्लभ्येत॥येनेतिशब्देनहिकरणमेवात्रोपात्तम्॥अंतरंगत्वमपि॥अंतरंगत्वंचयत्रद्वयोर्ग्रहणासंभवः॥किंत्वन्यतरस्यैवतत्रह्यन्यतरस्यग्रहणंनियामकंप्रकृतेतुद्वयोरपिग्रहणसंभवेनांतरंगत्वनियामकसकृदुच्चारितशब्दस्यैकार्थकत्वेपिप्रतिलक्ष्यंतस्यप्रवृत्तेः॥समानाधिकरणत्वेप्रायेणतदंतविध्युत्तरकालिकसंभावनासमधिगम्यत्वाविशेषणत्वस्याचोयदित्यादेरनेकास्वपिप्रवृत्तेः॥तदंतत्वसंबंधित्वंचात्रपरंपरयापिबोध्यं॥तेनोतश्चप्रत्ययादित्यत्रहेरेवसाक्षात्कार्यसंबंधित्वेष्यंगस्यपरंपरयातथात्वान्नदोषः॥एवंतथाविशेषणत्वयोग्यतापीत्यसंगतं॥समानाधिकरणविशेषणत्वस्यतदंतविधिप्रयोजकतायाः सूत्रारूढस्यैत्यादितिदिगित्याहुः॥तस्यचेतिपाठ्यमिति॥ननुव्यपदेशिवद्भावेनसित्यैरिदंमर्थमितिचेन्न॥वनोरचरेणीत्यादौव्यपदेशिवद्भावाप्रवृत्तेः॥व्यपदेशिवद्भावोऽप्रातिप

दिकेनेतिनिषेधात्॥ गृह्यमाणप्रातिपदिकेति॥ ननुकिमिदंगृह्यमाणत्वं॥ नतावदानुपूर्वीइविशेषरूपेणोपादीयमानत्वं॥ क्रव्यध
कवृष्णिकुरुभ्यश्चवृत्या क्रस्तत्रजनपदतदवध्योश्चदृगोष्ठश्वेत्यादीतदंतविधिनिषेधानापत्तेः नाविद्यथाकथंचिदुपादीयमा
नत्वं॥उगिदूर्णग्रहणेष्वपिनिषेधापत्तेः॥ नाप्युगिदूर्णग्रहणभिन्नत्वं॥उगिदूर्णइतित्वेकदेशानुवादइत्युत्तरग्रंथासंगतेरितिचे
न्न॥ प्रातिपदिकत्वव्याप्यधर्मपुरस्कारेणोपादीयमानत्वमित्यर्थेनादोषात्॥ प्रत्ययग्रहणेति॥ सोप्येतन्मूलइतिभावः॥ वाचनिकःस
इत्यन्ये॥ विरामोवसानं॥ वर्णानांनित्यत्वादभावासंभवादाह॥ उच्चारणेति॥ वर्णवदिति॥ यावद्द्रव्यविष्ठितंतावतीवागितिन्यायेन
र्णानांसर्वदेशकालवृत्तित्वेनदेशिककालिकक्रियासंभवादितिभावः॥ परःसन्निकर्षइति॥ वर्णादूर्णांतरोच्चारणोर्ध्वमात्राकाल
व्यवायस्यनित्यत्वेनतदधिककालव्यवायरहितत्वमेवपरःसन्निकर्षइत्यभिप्रेत्याहस्वभावसित्येति॥ संहिताधिकारइति॥ तयोर्यावधिसंहितायां
मित्यधिकारइत्यर्थः॥ विषयभेदेइति॥ इदमयुक्तं॥ तदुद्देश्यतावच्छेदकव्याप्योद्देश्यतावच्छेदकत्वबाधकत्वेतंत्रं॥ तदुद्देश्यतावच्छेदकव्याप
कोद्देश्यतावच्छेदकत्वंचबाध्यत्वेतंत्रं॥ यथाद्वितीयैकाच्द्विर्वचनमुद्देश्यतावच्छेदकमजादिधातुत्वप्रयोजकंचद्विर्वचनोद्देश्य
तावच्छेदकंधातुत्वमात्रं॥ नचतथाप्रकृतेऽवसानसंज्ञोद्देश्यतावच्छेदकंवर्णोच्चारणाभावत्वंसंहितासंज्ञोद्देश्यतावच्छेदकत्वंतुव

मिसर्वनामानीतिसूत्रेभाष्येतयाहिनेदंसंज्ञाकरणंपाठविशेषणमिदंसर्वेषांयानिनामानितानिसर्वादीनिसंज्ञोपसर्जनेतिविशेष णेषतिष्ठते॥यद्येवंसंज्ञाश्रयंयत्कार्यंतन्नसिध्यति॥सर्वनाम्नःस्मेअन्वर्थंग्रहणंतत्रविज्ञास्यतेसर्वेषांयन्नामतदादुत्तरस्यङेः स्मेइति॥यद्येवंसकलंकृत्स्नंजगदित्यत्रापिप्राप्नोति॥एतेषांचशब्दानामेकैकस्यसप्तविषयइतिकैयटश्चैतेषांचापीति॥तत श्चसर्वस्मिन्नोदनइत्यादौओदनशब्दस्यापिसर्वनामकार्यंप्राप्नोतिसामानाधिकरण्यादनयोरिति॥गौरिब्राह्मणतरेति॥नेदंपरिनि ष्ठितंकिंतु ह्रस्वापादनायकल्पितमलौकिकमेवपरिनिष्ठितत्वेगौरीशब्देपुंवद्भावापत्तेः॥ननुघसंज्ञायांतदंतविधभावेपिप्र देशेषुतदंतनिषेधोपुनरुक्तदोषतादवस्थ्यमित्याशंक्याह एतन्निषेधेति॥इदमप्ययुक्तं॥संज्ञाविधौतदंतविधभावेघरूपेत्यत्रापि नतदंतविधिः॥हृदयस्यहृल्लेखेत्यत्राण्ग्रहणेनसप्तम्यंतेप्रत्ययग्रहणेतदंतविधभावज्ञापनात्संज्ञाविधौतदंतविधौतुघरू पेत्यत्रपुनस्तदंतविधिर्दुर्वारः॥सप्तम्यंतप्रत्ययग्रहणाभावेनोक्तनिषेधाप्रवृत्तेः किंचप्रगृह्यत्वस्यप्रत्ययाप्रत्ययसाधारणत्वेनप्रदे शेतदंतविधभावेनेदूदेत्द्विवचनमित्यादौसंज्ञाविधावितिनिषेधश्चरितार्थइतिक्वसामर्थ्यमित्येषादिक्॥इत्याघनुवृत्तेरि ति॥यद्यपितदंतांशेप्रवृत्तावपिप्रत्ययेगृह्यमाणेयस्मात्प्रत्ययविधिस्तदादीत्युपतिष्ठतइतिपरिभाषाबलेनापिपदसमुदाय

स्यपदत्वंवारयितुंशक्यं॥तथाप्यनुवृत्यापिनिर्वाहप्रदर्शनपरमेतत्॥सर्वस्यद्वेइतिसूत्रेकैयटेप्येवमेवोक्तं॥ननुइयानित्यत्रैकदे
शविकृतन्यायेनस्यानिवद्भावेनवाप्रातिपदिकत्वंसुलभमतआह अतएवेति॥इदंसर्वमयुक्तं॥प्रकृतिसत्वघटितस्ययस्माद्धि
तस्तदादित्वस्यव्यपदेशिवद्भावासाध्यत्वात्॥अवयवत्वतद्व्याप्यंतत्वादित्वमवहारमात्रस्यतदतिदेशसाध्यत्वात्॥अत
एवासित्थवत्सूत्रेभाष्येप्रस्तनय्यगतइत्यादावल्लोपस्यासित्थत्वादयादेशाभावमाशंक्यव्याश्रयत्वेनसमाहितं॥त्वद्रीत्यात्वसित्थ
त्वेपिस्वात्मगतलघुपूर्वत्वमादायायादेशसित्थ्यातदसंगतिः॥अतएवचहरिशब्देनार्दतत्वं॥नन्वेवंपूर्वादिनिःसपूर्वीच्चेतिसित्थे
योगविभागोव्यपदेशिवद्भावोऽप्रातिपदिकेनेतिपरिभाषाज्ञापनार्थइत्याकरासंगतिरितिचेन्न॥सपूर्वादितिपूर्वशब्दस्यपूर्वावय
ववाचित्वात्सपूर्वादित्यस्यप्रातिपदिकविशेषणत्वात्॥एवमेकगोपूर्वादित्यत्रापि॥पूर्वादित्यस्यसामर्थ्यात्पूर्वातादित्यर्थः॥अ
न्यथाव्यस्तेप्यापत्तेः॥इयन्मात्रमित्यादौत्वंतरंगानपिविधीन्बहिरंगोलुग्बाधतइतिन्यायेनयस्येतिलोपंबाधित्वापूर्वमात्रच्प्रत्य
यस्यतोलोपइतिनकश्चिद्दोषः॥एवमस्यापत्यमिरेर्युवापत्यमायानइत्यादौयञिञोश्चेतिफक्सित्थिरपिबोध्या॥नन्वस्यमा
त्रचःफकश्चांतरंगनिमित्तविनाशकलुक्प्रयोजकत्वाभावइतिचेत्सत्यं॥प्रक्रियायामुपसर्गसमानाकारइत्येतद्व्याख्यावसरेय

स्माद्धितइत्यनेनाधिकव्यावृत्तिरेवनतुन्यूनव्यावृत्तिरितिगौरवरोक्तस्कदिशोक्तस्थलेषुदोषाभावात्॥नन्वेवंहरिष्वित्यादौसोः
पदत्वापत्तिः॥हलिसर्वेषामितिनिर्देशेनसात्यदाघोरित्यत्रसातिग्रहणेनचाधिकस्ययस्माद्धितस्तदादेःसंग्रहसंभवेन्यूनस्या
पिव्यावृत्तिकल्पनात॥सुमनायतइत्यादौतुपृथक्करणेनस्वादेःक्यङ्प्रकृतिघटकत्वासंभवादधिकस्यसंग्राह्यत्वासंभवेनन्यू
नव्यावृत्यभावः॥एतेनव्यतिसइत्यादौतिङ्तिङइतिनिघातोव्याख्यातःअसेत्यस्यस्थानेसेइत्यादेशकल्पनाद्व्यर्थवतएवा
देशत्वादभावस्यानर्थकत्वेनादेशत्वासंभवात्॥हरिष्वित्यादावेकस्मिन्नित्यस्याभावेपिसोःपदत्वमुक्तरीत्यावारयितुंशक्यमि
त्येकस्मिन्नितिव्यर्थमितिचेत्न॥सभासन्नयनशब्दस्यवृत्र्थत्वाभावायदरिद्रातेरिवर्णोतत्वाभावायचतदावश्यकत्वात्॥स
सहायेइति॥असहायत्वंचमुख्यव्यप्रदेशभागघटकत्वं॥नन्वेवंकुंभकारेभ्यइत्यादौकृन्मेजंतइतिसूत्रेभाष्येऽव्ययत्वमापाद्य
सन्निपातपरिभाषयासमाहितं॥तदेतदसंगतं॥एकारस्यमुख्येजंतत्वव्यपदेशिभागघटकत्वमितिचेन्न॥कृत्त्वसमानाधिकर
णमुख्येजंतत्वव्यपदेशभागघटकत्वेनासहायत्वस्यसमुपपादत्वात्॥अतएवखट्वेइत्यादौव्यपदेशिवद्भावेनद्विवचनस्येदंतत्वं
त्रगृह्यत्वं॥द्विवचनत्वसमानाधिकरणेदंतत्वंव्यपदेशभागघटकत्वस्यतत्रसत्वात्॥एतेननिजोचत्वारएकाचइतिभाष्यमपि

योजितंवेदितव्यम् ॥ धात्ववयत्वविशिष्टेकाच्त्वव्यपदेशस्यनिजावप्यमुख्यत्वेननहूटकेकारेमुख्यधात्ववयवत्वविशिष्टेकाच्
त्वव्यपदेशभागघटकत्वस्यसत्वात् ॥ ध्वनितंचेदमिति ॥ ससहायेव्यपदेशिवद्भावाप्रवृत्तिरित्येतत्प्रमेयमित्यर्थः ॥ असहायएवे
ति ॥ यद्यपीयायेत्यादावपिप्रत्ययःसहायोस्त्येवतथापिप्रकृतिघटकःस्वसजातीयःसहायोनास्ति ॥ एतावतैवासहायत्वव्यप
देशः ॥ एकाकीहयमारुह्यजगामेत्यादौविजातीयहयरूपसहायसत्वेपितथाव्यपदेशदर्शनात् ॥ तथाचार्यवत्तव्यपदेशइत्यत्रा
र्यवत्यदमर्यवत्सहचरितासहायत्वेलाक्षणिकमितिभावः ॥ हलोनंतराः ॥ नन्वानंतर्यस्योपलक्षणत्वेएकस्यापिहलोहलंतराअनंतर्यो
पलक्षितस्यस्यादेवसंसा । उपलक्षणत्वंचसंज्ञिकोट्यप्रविष्टेसतिसंज्ञिव्यावर्तकमित्याशंक्याहविशेषणतायाएवेति ॥ विशेषण
त्वंचसंज्ञिकोटिप्रविष्टत्वं ॥ यथोक्तंमधुसूदनेन ॥ सर्पज्ञानस्यभयकंपादिजनकत्वेसर्पस्यापितज्जनकत्वं ॥ सर्पादेर्ज्ञानविशेषण
त्वसंभवेउपलक्षणत्वायोगादिति ॥ तत्रोपलक्षणत्वंचभयादिजनकव्यावर्तकत्वेतिभयादिजनककोट्यप्रविष्टकत्वं ॥ वस्तुतस्त्वे
तदनंतरोब्राह्मणोभोज्यतामित्युक्तेआनंतर्यस्यतत्प्रतियोगिनश्चकार्यान्वयादर्शनात् ॥ आनंतर्यविषयविषयिभावस्वस्वामिभा
वादिप्रतियोगिनामुपलक्षणत्वमेव ॥ यत्रहिविशेषणत्वोपलक्षणत्वयोर्दर्शनंतत्रविशेषणत्वमेवन्याय्यमितिन्यायविदः ॥ नहि

आनंतर्यादिप्रतियोगिनांविशेषणत्वंकुत्रापितान्त्रिकानांसंमतं॥एतेनसर्पादेर्भयजनकत्वोक्तिरप्यपास्ता॥व्युत्पन्नत्वेनेति॥इद
मप्ययुक्तं॥व्रीहयःसंयुज्यंतेयत्रराशावित्यादावुक्तनियमव्यभिचारात्॥यद्यपिघटपटौसंयुज्येतेयत्रेत्यत्रघटपटातिरिक्तंसैवा
न्यपदार्थतयाप्रतीतिः॥व्रीहयःसंयुज्यंतेयत्रेत्यत्रव्रीहीणामेवतथाप्रतीतिस्तथापिप्रकृतेहलांविशेषणत्वेनव्रीहयःसंयुज्यंतेयत्रेति
वदेवव्यवस्थायुक्ता॥तद्धूटितेति॥हल्यदस्योक्तव्युत्पत्त्यनुरोधेनहल्यदंतद्धूटितेलाक्षणिकंस्यादितिभावः॥हलोचहलश्चेति॥
स्वरितात्संहितायामितिसूत्रस्थभाष्यप्रमाण्येनहिवचनबहुवचनांतयोरेकशेषःशिष्यमाणंचद्वित्वविशिष्टहलोर्बहुत्वविशिष्ट
हलांचबोधकमितिभावः॥फलाभावादिति॥भूयादित्यत्रतुस्कोरितिसुटोनिवृत्तौपश्चात्तेनैवयासुटस्सस्यनिवृत्तिरितिभावः॥इदम
प्ययुक्तं॥मंक्तेत्यादौसंयोगादिलोपानापत्तेः॥अंत्यात्पूर्वोमस्जेर्मिदितिवार्तिकेनजकारात्पूर्वंनुम्प्रवृत्तेः॥नचजकारेझलिपरतो
द्वयोःसंयोगमाश्रित्यसलोपःसुलभः॥सडि॰त्यधिकारेणझलादौप्रत्ययएवतत्प्रवृत्तेः॥भूयास्तामित्यादौतुद्वयोःसकारयोःश्रवण
मिष्टमेव एवंचसतिन्यादिषुवर्णेषुसंयुक्तेष्वित्याद्यभियुक्तव्यवहारएअपिसंगच्छंतेइत्येषादिक्॥इतिस्वचितेति॥अभिरित्युक्त
वृक्प्रत्याहारसंज्ञायापनिरितिभावः॥वस्तुतस्त्वल्याच्चूतरंनाज्झलावजीदीगुणवचनादेवोकालोऽङ्स्वोपदेशेऽजनुनेत्यादि

निर्देशेनाच्यदेनपदांतेकृत्वाभावकल्पनेनादोषात्॥सुप्प्रत्ययपरत्वेतुकृत्वेभवत्येव॥अस्विति भाष्यप्रयोगात्॥अतएवा
च्संधिग्रहणेनग्रहणमच्कार्यीणियथास्युरित्यादयोभाष्यकारणामभियुक्तानांचप्रयोगाउपपद्यंते॥तितउदेवेति॥इदंप्रत्ये
कंसंज्ञापक्षेसमुदायेसंयोगसंज्ञायांतुवाक्येसंहितायाअविक्षायांतितउआगच्छेत्युदाहर्तव्यम्॥नचसंहितायाअविवक्षायांसन्नि
कर्षाभावइतिवाच्यं॥एवमपितितओइतीत्युदाहरणसंभवात्॥अत्रहिसंबुत्थौषाकल्पस्येतिप्रगृह्यत्वं॥लोपसंज्ञेति॥यद्य
पिलोपसंज्ञास्तत्तद्रेरीत्यादिसंधिकार्योपयोगिनीलोपसंज्ञा॥यदिचसंधिकार्यैकार्यितयानिमित्ततयावानोपयोगिनीसासं
ज्ञेतिब्रूषेतर्हिवृत्तिसंज्ञापिनतथेतिवक्तव्याभवतिचसोचिसोपेचेत्द्वलोपइत्यनयोर्लोपसंज्ञापिनिमित्ततयोपयोगिनी॥किं
चलघुसंज्ञानकथंचिदपिसंधिकार्योपयोगिनी॥यदिचगुरुसंज्ञाबाध्यतयातदुपन्यासःतर्हिपदसंज्ञाबाधकतयाभसंज्ञापुप
न्यस्यतां॥किंचस्वादिष्विति पदसंज्ञापिमाभ्यामित्यादोसंधिकार्योपयोगिनीतितदनुपन्यासान्न्यूनता॥एवंटिसंज्ञायाअनुपन्यासे
नापिन्यूनता॥एवंनिपातसंज्ञापिनसंधिकार्योपयोगिनीतिसापिनवक्तव्यास्यात्॥एवंसंप्रसारणसंज्ञासंप्रसारणाच्चेतिसंधिकार्यो
पयोगिनीतिवक्तव्यातथापिप्रायेणसंधिकार्योपयोगिनींसंज्ञानांप्रकरणंप्रायेणसमाप्तमित्यर्थान्नकश्चिद्दोषः॥शेखरोक्तविशे

षणेतुव्यर्थेएवातद्ग्रहणेप्यननुगमादितिसर्वंइष्टसिद्धिः॥ ॥इतिविषमपदविवृतौपञ्चरव्याख्यायांसंज्ञाप्रकरणं॥इकोगुण॥ संज्ञाकरणेनेति॥वृद्धिरादैजितिसूत्रेऽदेङ्गुणइतिसूत्रेचवृद्धिगुणसंज्ञयोः संज्ञिविशेषेसंकेतकरणेनान्यत्रोच्चारिताभ्यांताभ्यांसंज्ञिनएवप्रतीतेरित्यर्थः॥पूर्वंसंज्ञाशास्त्राप्रणयनात्॥संज्ञासूत्रेसंज्ञाशब्दस्यशब्दस्वरूपपरत्वेपिततोन्यत्रसंज्ञित्वमेव॥संज्ञिविशेषेततःपूर्वंशक्तियहात्॥तदप्यनुवर्त्तेइति॥गुणवृद्धिग्रहणमनुवर्त्तेत्यर्थः॥अनुवर्त्तमानंचशब्दस्वरूपपरमर्थाधिकारानुरोधादितिभावः॥पूर्वंगृहीतशक्तिकस्यनशब्दस्वरूपपरत्वंकिंतुयत्रार्थसंकेतस्तत्परत्वमेवेतिनियमादिदमप्ययुक्तंइत्याशंक्यसनियमोप्यसित्थइत्याह स्वादिष्विति॥नियमस्तुसंज्ञाशास्त्राद्यत्रसंज्ञापदमनुवर्ततेतद्भिन्न स्थलएवेतिभावः॥ननुसंज्ञासूत्रादनुवर्त्तमानसंज्ञापदस्यार्थाधिकारानुरोधाच्छब्दस्वरूपपरत्वंगीकारेणांतेतिसूत्रेऽनुवर्त्तमानसंख्यापदस्यापितथात्वापत्तिरित्याशंक्याह।णांतेति।इतिवार्थादिति। इतिचार्थादितियुक्तःपाठः।आद्यस्योदाहरणंविभाषायइतिअङ्क्यस्योदाहरणंविभाषादिक्समासेइतितत्रहिदिक्शब्देनदिग्वाचकशब्दाननूद्यविहितसमासस्यैवग्रहणंप्रकृतेतुभिदेर्गुणइत्यादावपिगुणशब्देनगुणसंज्ञकाननूद्यनकश्चिद्धितइतिनप्रतिपद्योक्तपरिभाषावसरइतिभावः॥ननुलाक्षणिकत्वंविलंबोपस्थितिकत्वंप्रतीतिपद्योक्तस्यत्वंचभवेदित्युपस्थितिकत्वंत्यदादीनामइ

तिचनझटित्युपस्थितिर्कगुणशब्देनाकारादेरविधानादित्युक्तपरिभाषयेवोक्तार्थिकयानिर्वाहेतस्याभवदुक्तार्थोनोचितइत्याशं
काह॥ध्वनितंचेति॥तत्रचेत्थंभाष्यंसंज्ञाविधानेनियमःसंज्ञयायेविधीयंतेतेषुनियमःकिंवक्तव्यमेतत्नहिकथमनुच्यमानंगं
स्यतेगुणवृत्धिग्रहणसामर्थ्यात्तथाचद्यौःपंथाःसइममित्यादौनदोषइति॥यदिचोक्तपरिभाषयानिर्वाहःस्यात्तदासंज्ञयाविधाने
इत्युक्तप्रकारेऽनर्थकःस्यात्तेनमन्यामहेलक्षणप्रतिपदोक्तयोर्मदुक्तएवार्थोभाष्यकृतोभिप्रेतइति॥तंदाहेति॥गुणवृत्धिश
ब्दाभ्यांयत्रगुणवृत्धीविधीयेतेइत्यस्यगुणवृत्धीभवतइत्यर्थेकेगुणवृत्धिपदेयत्रश्रूयेतेइत्यर्थइतिभावः॥एवमचश्चेत्यत्राप्यज्
भवतीत्यर्थकानिह्रस्वदीर्घपदानियत्रश्रूयंतेइत्यर्थः॥एतेनगुणवृत्योर्लक्ष्येविधानेननत्रैकपदोपस्थितिःस्यादित्यपास्तं॥अ
तएवेति॥तथाचभवंतिघ्नालीयइत्यादौचनदोषः॥अन्यथाएधेक्रोपगवीयइत्यादावेवंतोस्यातामितिभावः॥इत्यपास्तमिति॥न
न्वतोगुणइत्यत्रगुणइति प्रथमांतंपदंनश्रूयतइतिनदोषइतिचेन्न॥वृत्धंशएवदोषइत्यभिप्रायात्॥प्रत्ययस्यादिति
आपिपरेइदंकारस्यविशेषणमितिभावः॥तदंतस्येति॥वृत्धिर्यस्येत्यादौतुयच्छब्दसमभिव्याहाएत्तदृत्थ मितिविधेयनिर्देशा
श्रवृत्धिपदस्यप्रथमांतत्वेपिनविधेयसमर्पकत्वनिर्णयइति॥एतेनगुणवृत्योर्विधेयत्वस्यवाक्यार्थबोधोत्तरकालिकत्वेनतदुत्तर

मेवास्योपस्थित्याऽलोंत्यस्येत्यस्यापितदुत्तरमेवोपस्थित्यातस्यानेनबाधःस्यादित्यपास्तं॥वाक्यार्थबोधात्पूर्वमपियच्छब्दासमभिव्या
हृतप्रथमांतत्वेनमिदेर्गुणईत्यादौगुणपदस्यविधेयसमर्पकनिश्चयसंभवेनास्यालोंत्यपरिभाषातःपूर्वमेवप्रवृत्तेःआद्यंतौ॥सूत्रा
रंभसामर्थ्यादिति॥नचहलोयमामित्यादौतच्चरितार्थं॥लोकेउपस्थितिक्रमेणान्वयस्यकृप्रतयातेनैवनिर्वाहात्॥संज्ञयानिर्द्देशेषु
लोकन्यायेनसित्थेर्यथासंख्यसूत्रेभाष्येउक्तत्वेनसंज्ञयाद्वंद्वेनचनिर्द्देशेएतत्सूत्रारंभसामर्थ्येनेवक्रमेणान्वयस्यवक्तव्यत्वात्॥लोके
त्वेवमिति॥समूहयोरन्वयबोधोत्तरंपुनःप्रत्येकान्वयविवक्षयाप्रयोगोऽसाधुरितिभावः॥तथाचतीर्णदग्धाद्धिलंकइतिप्रयोगोऽसा
धुरितिकेचित्॥अन्येत्वत्राजाविधनौदेवदत्तयज्ञदत्तावित्युक्तेर्नज्ञायतेकस्याजाधनंकस्यावयइतिभाष्यस्वरसात्द्वंद्वगर्भबहुव्री
ह्यर्थस्यसमूहस्यद्वंद्वार्थसमूहेनान्वयोत्तरंनप्रत्येकमन्वयः॥परस्यद्वंद्वार्थयोस्तुप्रत्येकमन्वयोभवत्येवेत्याहुः॥भाष्येस्पष्टमिति॥
तथाचभाष्यंयद्यपितावल्लोकेएषदृष्टांतोदृष्टांतस्यापिपुरुषारंभोनिवर्त्तकोभवतिकःसंख्यातानुदेशोनामेति॥परत्वादितिगइदम
युक्तं॥प्रत्ययःपरश्चेत्यस्यपदैकवाक्यतयान्वयस्यवक्ष्यमाणत्वेनवाक्यार्थबोधात्पूर्वमेवप्रकृत्तेः॥अस्यचटकितीयमुद्दिश्यविहितो
तदाद्यंतोभवतइत्यर्थेनवाक्यार्थबोधोत्तरमेवप्रवृत्तेरुभयोर्योगप द्याभावात्॥यथासंख्यंसित्थ मिति॥ननुगुणानांचपरार्थत्वादसं

बंधःसमत्वाच्चस्यादितिन्यायविरोधइतिचेन्न॥एतत्सूत्रभाष्यप्रामाण्येनोभयनिर्देशेपंचमीनिर्देशोबलवान्यरत्वादितितत्रतत्रभा
ष्योक्त्याऽदेःपरस्येतिसूत्रेऽपवादविप्रतिषेधात्सर्वादेशोभविष्यतीतिभाष्येणचतन्न्यायस्येतच्छास्त्रेऽनाश्रयणबोधनात्॥अतएवोरण्
रपरइग्यणःसंप्रसारणमित्यादौषष्ठीस्थानेइत्यादेःप्रवृत्तिः॥पर्यायेणेति॥इदमप्ययुक्तं॥इतावित्यस्याभावेटकावार्द्यर्थौभवतइत्यर्थः
नुबंधविनिर्मुक्तपदार्थोपस्थितेःस्वसित्थांतत्वेनाद्यवयवत्वस्यैवापत्तेः॥इडादेटकारेश्चारणसामर्थ्येनेत्संज्ञकटकारादिसंबंधिन
ष्टकारांतस्यवाऽदित्वादिबोधनंतुक्लिष्टमितीत्ग्रहणंसार्थकमितिबोध्यम्॥मिदचोंत्यात्॥निर्देशादिति॥उपलक्षणमेतत्भ्रमोमि
त्त्वस्य॥सौत्रमेकवचनमिति॥कारकेइत्यत्रनिर्धारणसप्तम्यंतत्वेकारकेष्वितिवदेदितिभाष्येणनिर्धारणार्थकविभक्तेर्बहुवचनरू
पायाएवविभक्तेःसाधुत्वबोधनादितिभावः॥इतिभाष्यमिति॥मिदचोंत्यादितिसूत्रस्थमितिशेषः॥परिभाषाणामिति॥इदमप्ययुक्तं।
अलोंत्यस्यादेःपरस्येत्येतयोरनियामकत्वात्॥तयोरभावेइत्यस्यानंत्यस्यादेरनादेश्चाप्राप्तेः॥संदेहेनियमः॥नचावयवषष्ठ्यादिषु
संदेहइतिप्रकृतसूत्रस्थंभाष्यंतुसामान्येनार्थोपदेशस्यसंशयस्थलएवप्रवृत्तिरित्यभिप्रायकं॥लौकिकोयंदृष्टांतः॥तद्य थालोकेक
श्चित्कंचित्प्रतिग्रामांतरंगमिष्यामिपंथानंमेभवानुपदिशत्वितिसतस्माआचष्टेऽमुष्मिन्नवकाशेहस्तदक्षिणोगृहीतव्यइतियस्त

त्रतिर्यक्पथोभवतिनतत्रसंदेहइतिनासावुपतिष्ठतेएवमिहापिसंदेहेनियमइतिभाष्येणतथैवलाभात्॥यद्वापाक्षिकप्राप्तिकबाधे
नोपपत्तेोनियतप्राप्तिकबाधोनन्याप्यइत्यभिप्रायकंभाष्यं॥निपातनात्साधुत्वस्येति॥स्थानत्वस्येवसंबंधत्वेतुस्थानंयोगोऽस्याइ
तिवदेदितिभावः॥संबंधस्यप्रतियोगिता नुयोगितान्यतरसंबंधेनदृष्टत्वनियमात्स्थानस्यचातथात्वादितिभावः॥दर्भाणांस्याने
इति॥इष्टिविशेषेइदम्॥शराग्रवस्थूलास्तृणविशेषाः ॥प्रस्तरोमुष्टिविशेषः॥किंचेति॥अस्मिन्यक्षेशब्दानित्य
त्वंरेवागवयन्यायेनसमाधेयं॥तृज्वत्क्रोष्टुरिति॥यद्यपिनात्रस्थानषष्टीतथापिवतिंविहायप्रथमायाःषष्ठ्यर्थत्वमंगीकृत्यक्रो
ष्टुशब्द स्थानेतृजंतआदेशइत्यभिप्रेत्येदं॥इतिशब्दइति॥इदमयुक्तं॥इतिशब्दस्यस्वसमभिव्याहृतपदेपदार्थविपर्यासकारित्वं
स्वभावेनतुतद्बोध्यस्यशब्दस्यार्थपरत्वव्यवस्थापनं॥तस्मादितिशब्दःकार्यिकार्योभयस्यापकोनिपातामनेकार्थत्वात्॥तच्छ
ब्दःसप्तम्यंतार्थपरामर्शकः॥तथाचसप्तम्यंतार्थोपस्थिष्टस्यकार्यिणोयत्कार्यमितितस्मिन्नितीत्यस्यार्थः॥निर्दिष्टइत्यादेश्चस
प्तम्यंतार्थेव्यवहितोच्चारितेपूर्वस्मिन्बोध्यमित्यर्थः॥एवंतस्मादित्यस्याप्यर्थोबोध्यः॥यद्वेतिशब्दःप्रकारेएवंप्रकारेणवर्त्तमानंका
र्यमिति॥अर्थेलिंगमिति॥नतुस्वरूपसतीसप्तमीपंचमीचनिमित्तं।यस्मिन्विधिरित्यादेस्तुस्वरूपसतीसप्तमीनिमित्तं॥तेननेइ

प्रीत्यादौतदुपस्थितिः॥एतदुपस्थितिश्च ॥उपपदविभक्तेरितिकारकविभक्तिसंभवेउपपदविभक्तिर्नन्यायेत्यपितन्न्यायार्थ इतिभावः॥वेत्थमिति॥वर्णानांसर्वदेशकालवृत्तित्वादितिभावः॥इयमेवेति॥औपश्लेषिकेऽधिकरणेसप्तम्येवेत्यर्थः॥ननुप्रत्ययःपरश्च गाङ्कुटादिभ्यइत्यत्रदावंशविशेषविकलपरिभाषोपस्थितौपरिभाषांनियमत्वेनसंभवति॥प्रत्ययार्थान्वितप्रकृत्यर्थबोधासंभवेन षष्ठ्यर्थाद्यंशविकलनियमशरीरस्योपपादयितुमशक्यत्वादुक्तविषयद्वयेपरिभाषायांनियामकत्वासंभवादित्यतआह॥परिभाषाणा मिति॥यद्वापतिःसमासएवेत्यादिनियमाविषयेहरिशब्दादौचरितार्थायाधिसंज्ञायाःपतिशब्देतेननियमउपपद्यते॥प्रकृतेतुतस्मि न्नितिपरिभाषार्थंविनाङ्कोयणित्यादीनांवाक्यार्थबोधमात्रेणलक्ष्यसंस्कारकत्वमेवनेतिकथंनियामकत्वमित्यतआह॥परिभाषा णामिति॥अथवासाक्षाल्लक्ष्यसंस्कारकयोःपूर्वबोध्यसखिपतिःसमासइत्यनयोर्भवतुनियम्यनियामकभावःपरिभाषाणांतुविधिवाक्ये नसहवाक्यार्थबोधमंतरानलक्ष्यसंस्कारकत्वमितिननियामकत्वसंभवइत्यतआह॥परिभाषाणामिति॥यद्वापरिभाषाणामंगत्वेनांगी भूतप्रधानविधिसंकोचकत्वेलक्षणनियामकत्वासंभवइत्यतआह॥परिभाषाणामिति॥अलोंत्य॥ऋकारात्पूर्वइति॥आद्यंतौटकिता वलोंत्येत्यनयोःसमावेशःस्यादितिभावः॥नियमद्वयमिति॥इदमयुक्तंसिध्येसत्यारंभाभावात्॥अन्येत्वनेकालशित्सर्वस्येत्यस्यारंभ

सामर्थ्यादेकालादेशस्यस्थानषष्ठीनिर्दिष्टवद्वयवस्थानकत्वंकल्पयित्वानियामकत्वंवर्णयंति॥तन्नयुक्तम्॥इतःपूर्वंनियमेनाने
कालित्यस्यवाक्यार्थबोधकल्पनेतद्वैयर्थ्यमूलकोक्तार्थकल्पनेचातिगौरवेणलघुभूतविधित्वस्योचित्यात्परिभाषाणामनियमेनि
यमकारिणीत्वमपवादस्तुयदिपरिभाषात्वसमानाधिकरण्येनतदोमितिब्रूमः॥यदितदवच्छेदेनतदुक्तिस्तदानिर्युक्तिकःप्रवादोन
प्रेमवद्भिरादर्त्तव्यइतिब्रूमः॥परस्येत्यावर्ततइति॥इदमप्ययुक्तं॥विभाषादिक्समासइत्यादाविवपरशब्देमपरत्वबोधकशब्देन
वापरस्यपदहितंतत्रैवैतत्प्रवृत्याऽवृत्तिवैयर्थ्यात्॥तस्मात्परस्येतिलघुन्यासंभवात्तस्मादित्युत्तरस्येतिन्यासाभिप्रायेणेदंकर्थ
चिद्योज्यं॥भूतपूर्वानेकालत्वमादायेत्युक्तमुपपादयतिविधाविति॥ननुकिमिदंविधौनिर्दिष्टत्वंनतावदनेकाल्पदबोध्यत्वं॥ख
रवसानयोर्विसर्जनीयइत्यादिविहितविसर्जनीयलोपानुनासिकोदात्तादीनामपिसर्वादेशत्वापत्तेः॥नापिइशादिपदजन्यप्राथमि
कोपस्थितिविषयत्वंतथासतिसानुबंधस्यैवविधेयत्वापत्तेः॥पदार्थोपस्थितिशब्दबोधयोःसमानविषयकत्वेनैवकार्यकारणभावा
दितिचेन्न॥द्वितीयपक्षांगीकारेणदोषात्॥नचतत्रोक्तदोषःगंगायांघोषइत्यादावपिगंगापदेनप्रथमोपस्थितप्रवाहस्यशब्दबोधेभा
नवारणायशब्दबोधस्यप्राथमिकपदार्थोपस्थित्यासमानविषयकत्वानंगीकारात्॥यदिचप्रवाहोपस्थितिर्नशब्दबोधकारणंयाच

कारणंतीरोपस्थितिः साण्णाद्देसाण्णाद्बोधेनसमानविषयैवेतिब्रूषेतर्हिप्रकृतेपियासानुबंधकोपस्थितिर्नसाण्णाद्बोधकारणंयाच
कारणंसाऽनुबंधविनिर्मुक्तविषयिणीपदार्थोपस्थितिरनुबंधविनिर्मुक्तस्यैवेतिग्रंथोपिण्णाद्बोधकारणोपस्थितिपरइतिसमा
नंतदेतदभिप्रेत्याह॥उद्देश्यत्वविधेयत्वाबिषयतयेति॥धान्येनधनवा नित्यादिवत्प्रकृत्यादिभ्यइत्यभेदेतृतीया।णित्वस्य
प्रयोजनांतरमाशंक्यतिण्करोतिध्वसोरिति॥नन्वनुबंधानामनेकांतत्वेइण्शादेरनेकाल्त्वाभावेनसर्वादेशत्वासिद्ध्याण्दितिसार्थक
मित्याशंक्याह॥अनुबंधानामिति॥ज्ञापनेनेति॥ननुज्ञापितेपिण्कारोच्चारणसामर्थ्यादनुबंधकृतमप्यनेकाल्त्वमादायसर्वादेशत्वं
भविष्यतीतिपुनः ण्द्रहणंव्यर्थमितिचेन्न॥अनुबंधकृताऽनेकाल्त्वस्यसर्वादेशत्वेप्रयोजकत्वेसिद्धेण्कारोच्चारणसामर्थ्येनाद्यादे
शत्वस्यापिकल्पनापत्तेः॥इत्संज्ञकण्कारस्याद्यादेशत्वेसर्वादेशत्वेचनिमित्तत्वाभावविशेषादितिदिक्॥इत्यादीनामिति॥आदिप
देनार्वणस्तृसस्जुषोरुरित्यादेःसंग्रहः॥एतेनेतिरेसिआदेःपरस्येत्यस्यप्राप्तत्वेनेत्यर्थः॥इतिपरिभाषेति॥ननूरण्रपरेयथासंख्य
मित्यादिपरिभाषाणामनुत्त्यान्यूनतातासामपिप्रथमाध्यायस्थत्वात्॥संधिकार्योपयोगित्वाच्च किंचज्ञापकन्यायसिद्धानांवाचनि
कीनांचकासांचित्यागःकासांचिदुपादानमर्धजरतीयांदकोगुणवृत्थीइत्यादिनासंधिकार्यानुपयुक्तानांचात्रकथनंव्यर्थमितिचेन्न

प्रथमाध्यायस्थानांप्रायेणसंधिकार्योपयोगिनीनांसंज्ञानांप्रायेणकथनस्यप्रक्रांतत्वेतथाभूतानांपरिभाषाणामपिप्रायेणकथनंक
र्तव्यमित्यभिप्रायेणतासांकथनस्यकृतत्वात्॥परनित्यांतरंगानामितितुपरत्वादनेनबाध्यतइत्येतदुपादानायेत्यादिक्रमेणसूत्रभि
न्नपरिभाषाकथनस्योपपत्तिःकथंचिच्चिंत्या॥ननुकिमिदंपरिभाषात्वंनतावत्स्वोतरत्वेनेरपेक्षेणविध्युपकारकत्वं संज्ञाशास्त्रेष्वति
व्याप्तेः॥नापिशक्तिग्राहकभिन्नत्वेसतितत्वं॥षष्ठीस्थानेयोगायस्मिन्विधिःप्रत्ययग्रहणेयस्मात्सइत्यादिष्वव्याप्तेः॥किंचस्यानिषदा
देशइत्या द्यतिदेशेष्वतिव्याप्तेः॥यदिचातिदेशभिन्नत्वेसतितत्वंतत्॥तदाऽसित्थंबहिरंगमंतरंगेइत्यादिष्वव्याप्तेः॥इतिचेन्नसंज्ञा
तिदेशयोरपिपरिभाषात्वस्यांगीकारात्उक्तपरिष्कारस्यनिर्दुष्टत्वात्॥तथाचाहुःपरितोव्याप्तांभाषांपरिभाषांप्रचक्षत इति॥संज्ञाच
परिभाषाचविधिर्नियमस्तथा॥अतिदेशोधिकारश्चेत्यभियुक्तोक्तोसंज्ञातिदेशयोःपृथगुक्तिर्ब्राह्मणवसिष्ठन्यायेनेत्येषादिक्॥इतिप्रथ
माध्यायस्यानांपरिभाषाणांप्रायेणप्रकरणंसमाप्तिमियात्॥ इकोयणचि॥ननुयथासंख्यशास्त्रेणननिर्वाहःस्वोजसित्यत्रानुनासिक
स्यस्थानेताहशयण्प्रवृत्तयेस्थानतआंतर्यस्यावश्याश्रयणीयत्वात्इत्याशंक्याह॥अनुनासिकस्थानेपीति॥ननुतिबादिसूत्रेणलस्यो
च्चारणप्रसंगेतिब्घटितस्साधुरितिबोधयितुमशक्यंतत्स्थानिककार्यांतराणामपिसत्वादित्यतआह॥यदिहपरिनिष्ठितेति॥इहलस्ये

प्रवृत्तियोग्यसकलशास्त्रविषये॥ एतेन॥ यथासंख्यशास्त्रेणस्यानेंतरतमसूत्रापेक्षयापरेणव्यवस्थांगीकारेण॥ सर्वत्रइति॥ य त्रप्रमाणकृतमादेशांतरंस्थानकृतंचादेशांतरंयथाचेतेत्या दौअकारएकारश्चतत्रस्थानतआंतर्यंबलवत्॥ यत्रापिस्थानप्रमाणो भयकृतमेकंकेवलस्थानकृतंचापरंस्थान्यादेशा न्यतरत्तत्रा ऽपिस्थानकृतांतर्यमेवव्यवस्थापकमितिस्थानेंतरतमसूत्रस्यार्थ इत्यभिमानः॥ सूत्रकृतेति॥ वस्तुतोयरोनुनासिकइत्यतोवाग्रहणानुवृत्तिर्बोध्या॥ प्रत्यासत्तीति॥ ननुस्थान्यपेक्षयाऽदेशएवप्रत्या सन्नइतिचेन्न॥ सूत्रेआदेशस्यप्रत्यासन्नत्वेपिशब्दबोधायकल्प्यमानेआदेशः स्थानिवदितिवाक्येस्थानिनः प्रत्यासन्नत्वमित्या शयात्॥ अतएवेति॥ तन्मात्रवृत्तीत्यनिविश्यतद्वृत्तीत्येवंनिवे शादेवेत्यर्थः॥ पुनरिति॥ संज्ञासुलक्ष्मेलक्षणस्येतिन्यायानाश्रयणा दितिभावः॥ तस्यापीति॥ इदंचिंत्यं॥ द्विरुक्तोत्तरभागात्पूर्ववृत्तित्वस्यदेवदत्तयज्ञदत्तोदेभतुरित्यादोसत्वाद्देवदत्तादेरप्यभ्याससंज्ञा पत्तिः॥ अभ्यासकार्यैगाधिकारेणतद्दोषवारणेतुउर्णुनावेत्यत्रह्रस्वहलादिःशेषइत्यनयो रनापत्तिः॥ एवमेधामासेत्यादावेधामित्य स्यतत्वापत्तिः॥ अस्यापीति॥ धिन्वंतीत्यस्यापि॥ एतेनधिन्वंतीतिप्रयो जनमपिशिथिलमितिसूचितं नव्यानांत्वयंभावः॥ क्वाचित्क पंचमीसमासंविनेवधिन्वंतीत्यस्यसित्थीगुरुभूततन्मात्रवृत्तिधर्माश्रयइत्यर्थोनोचितइति॥ स्थानिसंबंधीचयोहलित्यस्यफल

माह॥प्रदीव्येति॥उपदेशप्रवृत्तौ॥शास्त्रप्रवृत्तौ॥यच्चतादृशवल्त्वघटितमितिसमस्तपाठः॥तादृशेतिचवल्त्वविशेषणं॥कार्यएवेति
नतुकार्याभावइत्यर्थः॥व्यवहारएवेति॥अतिदिश्यतइतिशेषः॥इदंतुल्यमिति॥तन्निमित्तात्तिरिक्तेत्युक्तमित्यर्थः॥शास्त्रीयमेवेति
अतएवस्थानिभूतादचः पूर्वत्वेनदृष्टत्वंतासौनित्यानिट्त्वंचनातिदिश्यते॥वस्तुतस्त्वशास्त्रीयमप्यतिदिश्यतएव॥कथमन्यथाप्र
दीव्येत्यादेवलादित्वस्यातिदेशप्रसक्तिः॥नचैवंउवयिथेत्यादेतासौनित्यानिट्त्वमादायेड्विकल्पापत्तिरितिवाच्यं॥वस्तुतस्तासि
सतइत्यर्थाश्रयणेनादोषात्॥अन्यथातास्वदित्यनेनैवसित्यौनासीत्यस्यानुवृत्तिर्वैयर्थ्यं॥नचैवंकंडूतिरित्यत्रउडनापत्तिरितिवाच्यंस्था
निभूतादचःपूर्वत्वस्यवलादित्वस्येवविशेषणतयाऽलघटितत्वेनादोषात्॥दकशब्दस्येति॥नत्रभाष्येपूर्वोत्तरपदनिमित्तकार्यात्
प्रागंतरंगोप्येकादेशोनेत्यपिसमाधानांतरमुक्तं॥परिछिन्नपरिमाणेति॥गुडोदकमित्युक्तंभाष्यंतुअभ्युपेत्योक्तिरितिभावः॥लौकि
कन्यायानाश्रयणेपूर्वपक्षस्योत्थानमेवनस्यादितिपूर्वंग्रंथाशयः॥एवंचनकश्चिद्दोषइति॥नचाप्रत्ययइत्यस्येत्युक्तदोषोनेत्यर्थः॥क
चित्तदनाश्रयणं॥लौकिकन्यायानाश्रयणं॥उवङि॰यणिवेति॥कंडूयेत्यस्ययगंतत्वेउवङ्॥क्यजंतत्वेयणितिविवेकः॥द्विधाहिकंडूया
दयोधातवः प्रातिपदिकानिचेत्यभियुक्तोक्तेः॥अतएवार्थवत्सूत्रेति॥अतिदिश्यमानधर्मविरुत्थेत्युक्तशास्त्रार्थागीकारएवेत्यर्थः

अचश्च॥इटईटीत्यत्र॥नन्वग्रहीदित्यत्रदीर्घेदृत्वंदुर्लभं॥प्रदीव्येत्यादावविशब्दतःस्थानिनयोपात्तसमुदायइडितिनदवयवेकार
रूपालूवत्तीदृत्वरूपधर्माश्रयेदीर्घविधौस्थानिवत्वस्यदुर्लभत्वादितिचेन्न स्थान्यवयवाल्लृत्तित्वमित्यत्रमात्रपदनिवेशेनादोषात्॥
यद्वासमुदायसत्तादशायांतदवयवाल्लृत्तित्वंविवक्षितमितिनकश्चिद्दोषः॥लिंगाच्चेति॥कित्वस्यत्काविशेषधर्मत्वात्॥अस्मालिं
गात्अशस्त्रीयधर्मातिदेशोपिकित्वस्याशस्त्रीयत्वात्॥अलत्वव्यवहाराभावेति॥इदंचिंत्यं॥नदटष्टकारमादायनदइत्यत्रहलङ्या
दिलोपप्रसंगात्॥अचःपरस्मिन्॥परनिमित्तइति॥परस्मिन्निति त्यस्योपश्लेषिकसप्तम्यंतस्याज्विशेषणत्वेतुनपदांतेतिसूत्रेचग्रह
णंवैयर्थ्यंजक्षत्तुरित्यत्रस्थानिवत्वाप्राप्तेः॥स्थानिवत्वंसित्थतीत्युत्तरं॥अतएवचङ्परनिह्रासइतिपाठः॥अग्रिमदेशेस्पाठस्त्व
संगतः॥यलोपोनस्यादिति॥यलोपेनस्यानिवदितिनिषेधस्तुन॥स्वरदीर्घयलोपेषुलोपाजादेशएवनस्थानिवदित्युक्तेः॥निगाल्प
तइति॥इदंवव्रश्चेत्यादेरुपलक्षणं॥पूर्वविधावित्यत्रषष्ठीस्थानेयोगेतिनप्रवर्त्ततेषष्ठ्याअश्रवणात्॥अतएवअचः किमागत्येति
भाष्यंसंगच्छते॥सवर्णदीर्घइति॥इदंप्रयोजनमन्यथासित्यर्थं॥अभ्यासकार्यप्रतिबंधकस्तदुत्तरखंडस्याजादेशस्यानिवद्भावोने
त्यनेनसित्थेः॥उक्तार्थफलंतुश्लेष्माश्चेत्यत्रसंयोगसंज्ञायांस्थानिवत्त्वाभावः॥नकारस्थितिरिति॥वस्तुतस्तुधर्मिग्राहकमानात्सन्नि

योगशिष्टन्यायोलुग्विषयइतिनात्रदोषइतितंत्रवेयर्थ्यं॥ विधेयस्याभावादिति॥इदंचिंत्यं यस्येतिलोपस्यविधेयस्यसत्वात्॥भावसाध
नइति॥इदंभाष्यमेकदेशयुक्तिःफलाभावात्॥नपदांत॥वतिघटितान्येति॥असित्यंबहिरंगमित्यस्यव्यावृत्तयेवतिघटितेति॥ अचः
परेत्यस्यव्यावृत्तयेऽन्येति॥वतिघटितायेऽचःपरेत्यतोऽन्येऽतिदेशास्तेषामित्यर्थः॥इदंफलितार्थकथनंनज्ञाप्यांशकथनंस्वस्मिन्
चारितार्थ्याभावप्रसंगात्॥भावसाधनइति॥विधिष्वितिबहुवचनंतुविधेयभेदेनविधिभेदात्॥वस्तुतःकर्मणिकिः॥कर्मधारयःस
मासः॥तत्रसुलोप स्यानिवत्वादित्यस्यसुलोपोनेत्यनेनान्वय ॥उत्वेचेति॥इदंचिंत्यं॥रेःस्थानिभूतादचःपूर्वत्वेनदृष्टत्वाभावात्त
स्योत्वेस्थानिवत्वाप्रसक्तेः॥परेतुपदांतस्यस्थानेइत्यर्थःशंकितुमशक्यः॥पदांतस्यस्थानेविधौद्विर्वचनादेश्चविधौइत्यर्थाश्रयणेवै
रूप्यापत्तेः॥एषोयन्नित्यसाधुःपरत्वान्नित्यत्वाच्चसुलोपस्यन्याय्यत्वात्॥नचतत्रस्थानिवद्भावः॥पादस्यलोपइतिलोपस्येवसुलो
पस्यापिपदचरमावयवत्वात्॥लक्ष्यानुरोधेनपदसंस्कारपक्षस्यैवात्राश्रयणाच्च॥अतएव॥यएवास्मिससन्यजेतिश्रोतप्रयोगए
षयन्निति छांदोग्यप्रयोगश्चसंगच्छते लोकेपिससन्नित्येवप्रयुंजतेनतुसःसन्नितीत्याहुः॥नदोषइति॥ननुपदेऽतइतिसप्तमीस
मासेऽमतुपःपदत्वाभावेनैववेतस्वानित्यत्रदोषवारणेपरपदस्याजादेशइत्यस्यनोपयोगइतिचेन्न॥वेतस्वानित्यादावित्यादिपदे

नापीपचन्देवदत्तयज्ञदत्तविष्णुमित्राइत्यस्यग्रहणेनतत्रोक्तार्थस्योपयोगसत्वात्॥तत्रहिपदेपरतोऽतेजुस्अजादेशस्तुनपर
षदस्यः॥पदचरमावयवविधायकातिरिक्तस्येति॥नचैवंपिपठीरित्यत्ररुत्वंनस्यादितिवाच्यं॥पूर्वत्रासित्यइत्यस्याप्रवृत्तावपिक्वो
लुप्तमित्यस्यप्रवृत्त्यादोषाभावात्एतेनपिपठीभ्यामित्यादिप्रयोगा उपपादिताविज्ञेयाः।नचैवमपिगर्दभॅयंतितनःक्विपिगर्धयइत्यत्र
जश्त्वाद्यापत्तिः॥नहितत्रक्वोनुप्तमित्यनेननिर्वाहःअल्लोपस्यक्विनिमित्तत्वाभावादितिवाच्यं॥नपदांतसूत्रस्यभाष्यप्रामेण्येन
डुमतुपित्रेपादिकंकर्त्तव्येपूर्वत्रासित्थेनेत्यस्याप्रवृत्तिरित्यर्थाश्रयणेनसर्वसामंजस्यात्॥वेतस्वान्महिष्मानित्यनयोः॥पूर्वत्रासि
त्थेत्यस्याप्रवृत्तावपिजश्शिनस्थानिवदित्यस्यप्रवृत्त्याजश्त्वंदुर्वारमित्याशंक्याह॥सूत्रेजश्पदेनेति॥इदंचिंत्यं॥गर्धब्वानित्यत्रज
श्त्वानापत्तेः॥ननुपदचरमावयवसाधकस्यानिवद्भावस्यैवनपदांतेतिनिषेधः॥यथागोचेत्यादौतथाचवेतस्वानित्यत्रस्थानिवद्भावो
नतत्साधकःकिंतुरुत्वप्रतिबंधकइतिनतस्यनपदांतेत्यनेननिषेधइतिपदेतदित्यर्थाश्रयणेनतत्रदोषवारणपरंभाष्यंनसंगच्छत
एवेत्याशंक्याह॥प्रतिबंधकश्चेति॥तिङि॰त्यादीति॥आदिपदेनचिण्णमुलोरितिसूत्रस्थंभाष्यं॥इदंचदीर्घग्रहणवर्जमित्यंशोसाध
कं॥ननुद्विर्वचनग्रहणादित्ययुक्तं॥द्विर्वचननिषेधस्यात्रकर्तव्यत्वात्इत्यरुचेराह॥पूर्वत्रासित्थेइति॥अनुत्यत्तेरेवेति॥प्रक्षालनाद्धि

पंकस्येतिन्यायात्प्रक्रियादृशायामिति। परिनिष्ठितेतुजश्त्वेनदकारइतिभावः सार्थकेति।वस्तुतोऽभावोनाकृतिरितितन्न्याय विषयेनात्राभिन्नार्थ
त्वंभावनेति।यथागवामम्वेषुचस्वामीत्यत्र। यएवेति।तेनलिंगविशिष्टपरिभाषयापुत्र्यादिनीत्यत्रनद्भित्वनिषेधः।येननाव्यवधानन्यायेनैकवर्ण
व्यवधानएवतत्प्रवृत्तेः।किंचपुत्रशब्दस्यविशेषणत्वेउभयतआश्रयणेनांतादिवदिनिनिषेधात्पुत्रशब्दस्यादिनीपरत्वमेकदेशविकृतन्यायेनोपप
दनीयंस्यात्एकदेशविकृतन्यायश्चोक्तपरिमाणेनप्रवर्त्ततेयर्विशेषणत्वेतुपूर्वांतवद्भावेनपुत्रशब्दत्वंपरादिवद्भावेनचादिनीशब्दत्वेपौर्वापर्याश्र
यणेएवोभयतआश्रयणइतिनिषेधःअचःपरस्मिन्निितिस्थानित्वंपूर्वत्रासित्यइतिनिषित्थं।नचादिनीशब्दस्ययर्विशेषणत्वेयणोमयइतिरेफस्य
प्राप्तंद्भित्वमेवनिषिध्येत।तस्यादिनीशब्दपरत्वात्तत्शब्दस्यतदभावादितिवाच्यं।अचःपरस्ययरइत्यर्थाश्रयणेनादोषात्। नेमोरहोकार्यिणावेति
भाष्येणरेफस्यद्भित्वकार्यित्वाभावाच्च।अतएव।ङ्यंतानुकरणत्वादेव।आदिनीशब्दोयस्मादिति।अन्यथाऽदिन्शब्दोयस्मादितिवदेत्।पुत्रह
तीति।पुत्रोहतोययेतिविग्रहः॥बहुव्रीहे श्चांतोदात्तादस्वांगपूर्वपदाद्दृतिर्ङीष्।अतएवेति॥सजातीयानांग्रहणादेवेत्यर्थः।इदंचिंत्यं।विजाती
यानांग्रहणेप्यचःपरस्ययरइत्यर्थस्यवक्ष्यमाणत्वेनाचोरहाभ्यामित्यस्यवैयर्थ्याभावात्।शेषार्थेत्यस्यफलमाह।आपत्यस्येति।यमामितिकिमि
ति।हलःपरस्यलोपइत्युक्तावबध्यवधिमतोःसाजात्यात्थलएवलोपोभविष्यतीत्याशयः।इतरांशेइकारोकारांशे।नन्वयाद्यादेशेसंवृतस्यश्रूयमाणस्या

द्विवृत्तत्वमेवेतिचेन्न॥एतद्भाष्यप्रामाण्येनासित्थत्वाभावकल्पनात्॥किंचसवर्णसंज्ञादृष्त्याअअइतिविहितस्यसंवृतस्यासित्थत्वे
पिस्यानेंतरतमसूत्रदृष्त्यानासित्थत्वंतस्यलोकन्यायसित्थार्थानुवादकत्वस्यभाष्यसंमतत्वात्लोकिकन्यायेचसंचरणीयेनासित्थ
त्वं॥यस्मिन्विधिरितिपरिभाषांविनैवयांतप्रत्ययासंभवाद्यादावित्यर्थोभविष्यतीत्याशंक्याह॥तस्मान्नुडिति॥वाचनिक्येति॥इदं
चिंत्यं॥नल्पीतिलिंगेनतत्सित्थेरितिकेचित्॥यस्मिन्विधिरिति॥सप्तम्यंतेविशेषणेऽल्शब्देउपादीयमानेयस्मिन्लियोविधिः
सतदादेरित्यर्थः॥हलिसर्वेषामित्यत्रवग्रहणंनानुवर्त्ततेइत्यभिप्रेत्याह॥लोपःशाकल्यस्येति॥निमित्तत्वानाक्रांतेइति॥यथाप्रकृते
पूर्ववकारे॥नहितनःपूर्वेलोपकार्यं तिष्ठतियेनतस्यनिमित्तत्वंस्यात्॥अचोरहाभ्यामित्यत्रतुरेफेद्वित्वनिमित्तेनियमेनद्वित्वकार्यि
त्वंप्राप्नोति॥विधेयविषयश्चेति॥अचोरहाभ्यामित्यनेनरेफस्यद्वित्वनिमित्तत्वमपूर्वबोध्यमितिविधेयमेवेतिभावः॥विशेषासंप्र
त्ययादिति॥कुटिलंव्रजतीतिवाक्यात्कुटिलंपंथानंगछतीत्यस्यैवप्रतीतिर्नतुकौटिल्यविशिष्टव्रजनरूपविशेषस्यसंप्रत्ययः॥श
ब्दस्वाभाव्यादित्यर्थः॥अनुकृष्यतइति॥अनुकृष्यमाणस्यचयडं·तेनक्रियासमभिव्याहाररूपविशेषासंप्रत्ययादित्यर्थः॥लौकि
कोदाहरणेति॥छंदसितुजीवेरदानुकिंजीरदानुःस्त्रिवेरास्तेमाणमित्युदाहरणमस्त्येवेतिभावः॥व्यवस्थितत्वादिति॥व्यवस्थि

तविकल्पत्वादित्यर्थः॥ इत्याहुरिति॥ परेतुलोपोव्योरितिसूत्रेवकारप्रत्याख्यानमेकदेश्युक्तिः॥ इकोगुणेतिसूत्रस्थभाष्यविरोधात्
अतएवनपदांतसूत्रेवृक्षवित्यत्रपदांतस्यस्थानेइत्यर्थेलोपोव्योरितिलोपआपादितोदीक्षितेनलण्सूत्रेचवृक्षवित्यत्रक्विपिलो
पोव्योरितिलोपप्रसंगइतिकैयटेनोक्तं॥ लोपःशाकल्यस्येत्यत्रवृक्षवृक्करोतीत्यत्रलोपोव्योरितिलोपस्याग्रिमशेखरेआशंक्यिष्यमाण
त्वात्च॥ अतएवसुधेसुधेचारित्वत्धात्सूत्राणांसुकारणेलाघवतश्चरामः॥ विशेषणेद्वेयइहादिकर्तुर्वेदेदवीतिसहिकैयटीयेइत्यभि
युक्तोक्तिःसंगछते॥ तत्रहिसुधेसुकरितिधिन्विकृण्विभ्यांविचिगुणेरूपं॥ नचसुत्धेइत्यत्रनधातुलोपइतिगुणनिषेधःशंक्यःआ
र्धधातुकत्वतद्व्याप्यान्यतररूपेणार्धधातुकनिमित्तकैलोपस्यतत्प्रवृत्तेः॥ अन्यथानधातुलोपेत्यस्यप्रत्याख्यानेनफलभेदापत्तेः॥
अगुषीदित्यादेतिपूनिमित्तकगुणवारणायलघूपधाद्दितेप्रत्ययेगुणइत्यर्थेतुअत्रगुणोदुर्लभः॥ अतएवचच्छ्वोःशूडितिसूत्रेभाष्येऊठ
ष्टित्वेऊडादिःकस्मान्नभवत्यस्त्वादिर्लोपोव्योरितिवकारस्यलोपोभविष्यतीत्युक्तंभाष्ये॥ तत्रैवकैयटेक्विग्रहणानुनृत्तिपक्षेदिवेर्य
ङ्लुकिदेदेतीत्युक्तं॥ छंदसिसर्वविधीनांवैकल्पिकत्वमाश्रित्यगव्यूतिरित्यत्रवलोपस्तारणंत्वगतिकगतिः॥ लोकेध्वपरिमाणेसव
कारेणैवाध्वपरिमाणप्रतीत्यावलोपोनेत्यपिक्षिथिलं॥ नहिपूर्वपदादित्यत्रेवसवकारेणाध्वपरिमाणेगम्येवांतादेशइत्यर्थोस्ति॥ व

स्तुतपूर्वपदादित्यत्रापिसः॥णत्वेनसंज्ञायांगम्यमानायामित्यर्थोनयुक्तः॥अगइत्यस्यवैयर्थ्यापत्तेः॥रघुनाथादौसुभ्यादित्वाण्णत्वंनेत्या
तदाच्छेनतच्छब्देन॥तत्रधान्यक्रय्यमिति॥तत्पुरुषविषयधान्यंक्रयमित्यर्थः॥तत्पुरुषंप्रतितत्धान्यंक्रय्यमिति फलितं॥तत्रधान्यं
क्रेयमिति॥तत्पुरुषंप्रतिधान्यंक्रेयमितिफलितं॥द्रव्येति॥मूल्यभूतस्वर्णरूप्यादिद्रव्येइत्यर्थः॥लोपःशाकल्यस्य॥बाधकमिति
गार्ग्यग्रहणस्यपूजार्थत्वेनानित्यंतदितिभावः॥शाकल्यमतेइति॥अतएवकोबाहूकाउरूइतिशाकलानांवकाररहितःपाठः॥तेत्ति
रीयाणांसवकारःपाठः॥एतेनेति॥वलोपेस्थानिवत्वेनेत्यर्थः॥अन्योन्याश्रयइति॥यथासनपदांतसूत्रस्थशब्दरत्नेनाविरोधस्तथा
तट्टीकायामस्माभिर्निरूपितम्॥पदत्वादिद्वारकेति॥आदिपदेनपदत्वाभावः॥परंपरयावेत्येतत्प्रापकस्यप्रतिबंधकस्यवेत्युभयत्रा
न्वयि॥अत्रचस्थानिवद्भावःपदत्वाभावसंपादनद्वारापूर्वत्रासित्वीयप्रतिबंधकइतिबोध्यं॥वस्तुतस्तुपूर्वत्रासित्वीयइत्यस्यैवमर्थ
करणेफलस्यप्रमाणस्याभावः॥ननुपाचयतेःपाक्याजयतेर्याट्पिपठिषतेःपिपठिरित्यादौकुत्वादिप्रवृत्तिःफलं॥अन्यथातत्र
पदसंज्ञायांचकारादेःपदांतत्वाभावेनकुत्वाद्यनापत्तेरितिचेन्न॥कार्यकालपक्षेपदसंज्ञायाअपिपूर्वत्रासित्वीयत्वेनादोषात्॥हलोणः
स्नीतिभाष्येक्वचित्यरेणसंतीतिपाठः॥इत्याहुरिति॥परेतुभोभगोइतिसूत्रेभाष्येवृक्षवृक्षेतीतिप्रयोगस्यकंठतएवपठितत्वेना

नभिधानोक्तिः साहसादेव॥ नपदांताहलोऽणः संतीत्यत्रचकार्यभाजइतिशेषइतिकैयटेनैवलण्सूत्रेविस्पष्टमुक्तत्वेनवृक्षवादेरनभि
धानेप्रमाणाभावाच्च वृक्षवत्करोतीत्यत्रचाशीत्यनुवृत्याहलिसर्वेषामित्यस्याप्रवृत्तौवकारस्यनकार्यभाक्त्वं॥ यद्वानपदांताहलोण
इत्यस्यदोषसंपादकाइतिशेषः॥ तेनहरएहिविष्णविहेत्यादौपदांतहलूरूपाणांसत्वेपिनक्षतिः॥ वृक्षवत्करोतीत्य त्राशीत्यनुवृत्यान
दोषइतिस्पष्टमेवभाष्येउक्तं॥ वकारनिवृत्त्यैवात्रतद्वारणसंभवादितितुनयुक्तं॥ हंहूनिर्दिष्टयोरेकदेशनिवृत्यसंभवात्॥अतएवहंहेनि
र्दिष्टैकारस्यनिवृत्यर्थमदसोमादितिसूत्रेमाद्ग्रहणंकृतं॥ भोभगोइतिसूत्रस्थश्चित्यमेतदितिकैयटग्रंथस्तुलण्सूत्रस्यस्वोक्तदिशोपप
त्तिचिंतनंकार्यमित्येवंपरइत्याहुः॥ इतिवदिति॥अनूद्यमानविशेषणेपिसापरिभाषाप्रवर्ततइतिभावः॥वव्रेइति॥स्थानिवत्सूत्रेआरेत्या
दौस्वोक्तदिशादिरुक्तपूर्वभागस्यपुनरभ्यासत्वेऽनादेस्तेननिवृत्तेश्चित्यमेतदितिकेचित्॥अत्रपक्षेइति॥अणमनूद्यरपरत्वंविधीयत
इतिपक्षेइत्यर्थः॥ रलपरानिति॥ वृत्तिरादेजदेड्गुणइतिसूत्रयोरराला अरलौचविशिष्पनिर्दिष्टयो॥ ऋतइत्थातोरित्यादौतुरपरः
पाठ्यः॥ भृञ्जामिति॥इदंनयुक्तं॥अभ्यासेहलादिःशेषेणानादेर्हलोनिवृत्तेर्विशेषाभावात्॥अतएवास्येति॥इदंचिंत्यं॥ विनिगमनावि
रहेणार्थद्वयपरत्वेपिविकल्यालाभात्॥अर्थद्वयपरत्वंतुतंत्रावृत्त्यादिनाबोध्यं॥ एथक्पदमिति॥ पूरणगुणेतिषष्ठीसमासनिषेधा

दितिभावः॥इणेवेति॥ननुवीगतीत्यत्रप्रश्लिष्टइत्यर्थः॥वृक्षेपर्णमिवेतिन्यायेनपेऽवयवस्यावयविन्याधारत्वप्रसित्यावयविनोप्यवयवाधारत्वंप्रसित्थमितिभावः॥एवंतस्यशब्दांतरत्वमभ्युपेत्यतुष्यदुर्जनइतिन्यायेनाह॥किंचेति॥एधत्यवयत्वेइति॥तत्वेनदृष्टेइत्यर्थः॥भेदेनापेक्षायामिति॥इदंवाध्यमित्यपेक्षायामित्यर्थः॥सर्वेबाध्यमितिविवक्षायांतुनायंन्यायः॥यथाऽचिरादेशे॥पूर्वधातुरिति॥अत्रचेदमपिलिंगमितिभावः॥अंतादिवच्च॥पूर्वपरशब्दोचेति॥तथाचपूर्वपरयोरित्यंताघोर्विशेषणं॥यद्वापूर्वपरयोरित्यधाहृतव्यवहारान्वयीतथाचांतादिवर्णवत्स्वघटितसमुदायेप्रातिपदिकत्वादिव्यवहारानादेशःसंपादयति॥समुदायस्यांतादिभ्यामित्यग्रिमशेखरस्वारस्येनतुपूर्वपरयोरित्यस्यांतादिपदार्थेन्वयइतिलभ्यते॥अंत्यपक्षेतुसमुदायेत्यस्यपेक्षव्यवहारइत्यनेनान्वयः॥षष्ठ्यर्थोनिष्ठत्वं॥अत्रचवतिस्तेनतुल्यमित्यनेन॥एकादेशइतिप्रथमांतश्रवणात्॥कृतैकादेशस्येतितुफलितार्थकथनं॥ओइत्यस्येति॥तस्यैकादेशघटितत्वंव्यपदेशिवद्भावेन॥तद्धेयर्थ्य मिति॥अधिपूर्वादेवादिकादीङ्गतावितिधातोःक्तोल्यपितुगभावार्थमसित्थवचनस्यचारितार्थ्याच्चिंत्यमेतदितिकेचित्॥ङ्ष्यतएवेति॥इदंचिंत्यं॥स्थानिवत्सूत्रप्राप्तस्थानिवत्वस्यैवाभयतआश्रयणइत्यनेननिषेधांगीकारादिति॥इतिदिगिति॥अन्येत्विदंदेवदत्तस्येदंयज्ञदत्तस्येत्यादावग्रिमेदमित्यस्योत्तरान्वयित्वेनदेवदत्तस्येदमितिस्था

निसमुदायस्यनिरर्थकत्वेनदेवदत्तस्येदमित्यादेशकल्पनानतत्रसंभवति॥अर्थवत्येवानुमानिकस्थान्यादेशभावविश्रांतेः॥त
याचतत्रेष्टानुरोधेनदेवदत्तस्येतिवेदमितिवाऽऽदेशःकल्पनीयः॥एवंस्वाश्वशब्देपि॥तत्रहिस्वाइत्यादेशकल्पनाऽऽश्वइत्यादेशक
ल्पनावास्यात्॥तथाचानुमानिकस्थान्यादेशभावेएकादेशविषयेप्रत्येकंस्थानित्वेपिएकादेशंतेपूर्ववृत्तिधर्मस्यतदादेपरवृ
त्तिधर्मस्यस्थानिवद्भावेनलाभोननुवैपरीत्येन अत्रैवादिवच्चेतितात्पर्यग्राहकं॥एवंचआश्वशब्देऽश्वशब्दत्वंस्थानिवद्भावेनस्यान्न
स्वशब्दत्वमितिनदोषः॥भियइत्यादौतुभीशब्दत्वंस्थानिवत्वेनस्यादेव॥आनुमानिकस्थान्यादेशभावेएकादेशघटितेधातुत्वा
नयनसंभवात्॥क्षीरपेणेत्यत्रतुपेशब्देआनुमानिकस्थान्यादेशभावमाश्रित्योत्तरपदत्वमात्रमानीयतइतिणत्वसिद्धिरितिभा
वः॥एवंचसत्यंतादिवद्भावस्यस्थानिवत्सूत्रमूलकतयानवाताद्रूप्यानतिदेशादितिप्रतिषेधखंडनंसूपपद्यते॥अतएवङ्याप्प्रा
हणेऽदीर्घइतिस्थानिवत्वनिषेधेऽपरदीर्घग्रहणंचरितार्थं॥एकाजुत्तरपदत्वस्यांतवद्भावेनातिदेशेखट्वाभिरित्यादावदंतत्व
स्याप्यतिदेशापतिः॥पूर्वपरघटितसमुदायस्येत्यर्थेनतुनवाताद्रूप्यातिदेशादितिवार्तिकार्थस्यतुनक्रोडीकारः रामावित्यादौ
भवदुक्तदिशाव्यपदेशिवद्भावोनाभिरित्यत्रपूर्वांतवद्भावेनात्वातिदेशेऽसादेशापत्तिरित्याहुः॥ज्ञापकानुसरणंवेति॥तस्मादित्यु

त्तरस्येतिनिर्देशात्ज्ञापकान्त्रिपादीस्थेंतरंगेप्यंतरंगपरिभाषाक्वचित्प्रवर्ततेइतिद्ध्यत्रेत्यत्रनसंयोगांतलोपः॥ बहिरंगपणे॥
सित्थत्वात्। परेतुपूर्वत्रकर्त्तव्येपरस्यासित्यत्वेपित्तत्रकृतेपरस्यासित्थत्वेमानाभावः॥ एवमेवहल्संधर्यतेशब्दरत्नेस्पष्टमे
वोक्तं॥ तथाचनार्कूटादौपूर्वस्याःकृतत्वेनतांप्रतिपरस्यविसर्गस्यांतरंगस्यपूर्वत्रेत्यनेनसित्थत्वबोधनमशक्यं॥ तथाचबाधकाभा
वात्॥ अंतरंगपरिभाषाकार्यकालपक्षेपरिभाषांतरवत्त्रिपाद्यांप्रवर्ततएव॥ विसर्जनीयसूत्रेशेखरोक्तयुक्तिमुपजीव्यप्रवृत्तं॥
अयुक्तोयंपरिहारोनवाबहिरंगलक्षणत्वादितिभाष्यंशिथिलमेवयुक्तेःशैथिल्यात्॥ अतएवशिथिलयुक्तिमूलकस्तोभोवाविशेषा
दितिकात्यायनसूत्रस्याननुज्ञापकत्वलक्षणशैथिल्यंजैमिनिनोक्तं॥ उभावाग्नेयाग्नीषोमीयपुरोडाशौचतुर्धाकर्तव्यावविशेषात्आ
ग्नेयंचतुर्धाकरोतीतिश्रुतौअग्निदेवताकपुरोडाशेचतुर्धाकरणस्योक्तत्वेनोभयोरपिपुरोडाशयोरग्निदेवताकत्वाविशेषोतितत्सूत्रा
र्थः॥ तत्रचाविशेषादितियुक्तिःशिथिलार्थेद्राग्नेचतुर्धाकरणवारणायश्रुतावाग्नेयपदेनाग्निपर्याप्तदेवताकत्वस्येवविवक्षितत्वात्।
तस्यदोषइतितुबहिरंगासित्थत्वेनसित्थोक्त्यर्थमेव॥ एवंचतत्रतत्रवचनानिनकार्याणीतिमहल्लाघवं॥ तस्मादित्युत्तरस्येत्यादिज्ञा
पकंवाक्वचित्त्रिपाद्यांकार्यकालपक्षेबहिरंगपरिभाषाप्रवर्ततइत्यर्थोऽनुसर्त्तव्यमितिनकश्चिद्दोषइत्याहुः॥ सुबंतप्रकृतिकेइ

ति॥ननुसुबंतेधातावित्यर्थः॥तथासतिऋतधातोःक्विपिसुप्येवप्रवृत्तिःस्यात्॥उपर्षभीयतीति॥नन्वंतरंगत्वादेवात्रपूर्वंगु
णस्यप्रवृत्यानवृत्तिरितिचेन्न॥उपसर्गसमानाकारंपूर्वपदंधातुसंज्ञाप्रयोजकेप्रत्ययेचिकीर्षितेऽथक्रियतइत्यंगीका
रेणादोषात्॥एवंचेत्यत्रवक्तव्यपदाभावेनसूत्रत्वभ्रमंनिराकर्त्तुमाह॥वार्तिकमिति॥गमकत्वादिति॥वृत्यघटकपदार्थान्वि
तस्वार्थावगमकत्वेनशिष्टप्रयुक्तत्वादित्यर्थः॥शब्दज्ञानानुपातीति॥शब्दज्ञानोत्तरमेवजायमानइत्यर्थः॥पतंजलिनाऽत
यःपंचतय्यइत्युपक्रम्यारोपात्त्रथग्विकल्पात्मिकांवृत्तिमुक्तातल्लक्षणमिदंसूत्रंप्रणीतं॥तदुदाहरणंतुचैतन्यस्यस्वरूपंघटस्य
स्वरूपमित्युक्तंतट्टाप्पकृता॥तत्रहिचैतन्यस्वरूपपदार्थयोरभेदेनतत्संबंधरूपंपदस्तुतच्छून्यमविद्यमानंयस्यबिषयःसवि
कल्पइत्यर्थः॥अत्रमार्तंडइत्युदाहरणविषयेऽचोंत्यादिटीतिशास्त्रंविकल्पात्मकज्ञानजनकमितितात्पर्यं॥परेतुसंग्राहकशास्त्र
स्यान्यत्रचारितार्थ्यादेतद्विषयेवचनाभावेउपप्लवएवनस्यात्विकल्पात्मकज्ञानजननंतुदूरेतरं॥किंचसंबंधांशेऽपिविकल्पा
त्मकंज्ञानंनतुआदित्वांशेविकल्पात्मकज्ञानस्यशास्त्रप्रवृत्युपयोगित्वंचनिर्मूलं॥अतएवाद्यंतवत्सूत्रेभाष्येऽपूर्वोत्तरत्वल
क्षणत्वादाद्यंतयोःसित्यनेकस्मिन्नार्थेआद्यंतवद्भावेनेतिवार्तिकमतमुपन्यस्यगोनर्दीयस्त्वाहसत्यमेतत्सत्यंतित्वन्यस्मिन्नि

तिस्वमतेनसूत्रारंभएवकार्यइत्युक्तमित्याहुः॥इतशब्द लोपेइति॥इतिजश्त्वाभावेचेत्यपिपूरणीयम्॥संध्याकरणसमयइ
ति॥सर्परूपेणेतिशेषः॥ओत्वोष्ठयोः॥ननुअत्रसमर्थपरिभाषोपस्थितावस्यवासुदेवस्योष्ठइतिसमासेएवेदंस्यान्नबिंबोष्ठइत्यादौ
तत्राकारस्यानर्थकत्वेनोष्ठेनासामर्थ्यादित्याशंक्याह॥अत्रसमर्थेति॥पदत्वेनेति॥एतस्योदाहरणंमृग्यं।प्रत्युतयुष्मदस्मदोःषष्ठी
त्यादिसूत्रेषुपदस्यपदादित्यधिकारेणेतत्परिभाषाप्रवृत्तेोअसामर्थ्येआदेशानापत्तिः॥परमवइत्यादावेवस्यात्प्रवृत्यापत्तिश्चे
त्यपिबोध्यं॥सुबंतत्वेवेति।तिङंतत्वेनचेत्यपिबोध्यं॥तेनाख्यातमाख्यातेनेत्यादावप्येतत्परिभाषोपस्थितिःसित्था॥तद्धितविधौप्रातिप
दिकत्वेनोद्देश्यत्वेपिघकालतनेष्वित्यादिज्ञापकेनस्वार्थेपरिपूर्णमितिन्यायेननचार्थिकंसुबंतत्वेनोद्देश्यत्वंनहिशब्दस्तेनरूपेणा
द्देश्यत्वेएवतत्प्रवृत्तिरित्यत्रकिंचिन्मानं॥तत्रेवेति॥तेनान्यादितरेत्यादौनततत्प्रवृतिः॥ओत्वोष्ठादिमात्रस्येति॥ओत्वोष्ठयोरादिरो
कारस्तन्मात्रस्यपदत्वाभावादित्यर्थः॥एतदुत्तरंतदुत्तरपदकेसमासेइत्यर्थासंभवादितिशेषः॥तद्घटितेति॥अवर्णोत्वोष्ठसंबंध
चूएतदुभयघटितेत्यर्थः॥अन्यथेति॥अजाद्योरोत्वोष्ठयोरित्यर्थेइत्यर्थः॥अयंभावः॥ओत्वोष्ठयोः॥परत्वेनाश्रयणेहिप्रत्यास
त्यातदुत्तरपदकेसमासेएवास्यप्रवृत्तिःस्यात्॥अत्रत्वोत्वोष्ठयोरजेवपरत्वेनाश्रितः॥तेनोष्ठस्यब्रणःओष्ठव्रणःवृषलस्योष्ठव्र

णः वृषलोष्टव्रणइत्यत्रापिपररूपंभवति॥नह्यत्रोष्ठशब्दउत्तरपदंकिंत्वोष्ठव्रणशब्दःसमर्थपरिभाषानुपस्थितेर्दित्योष्ठ्योवृष
लोष्ठव्रणइत्यपिप्रयोजनंयोज्यं॥नह्यत्रादंतस्यओष्ठेनसामर्थ्यमस्ति॥तयोःपरस्परमनन्वयात्॥एवंसंगस्यकार्यंसंगकार्य
मंगुलेः संगकार्यमंगुलिसंगकार्यमित्य त्रापिषत्वंभवत्येव॥अंगुलिशब्दघटकेणःपरस्यसंगसकारस्यषत्वमि त्यर्थो
ग्रयणेनप्रकृतसाम्यात्॥ईषदर्थेति॥तेननिपातइतिनप्रकृतिभावः॥ऋत्यकइतिपाक्षिकप्रकृतिभावस्तुस्यादेव॥ननुआऋ
षभइत्यत्रऋत्यकइतिप्रकृतिभावेपश्चादद्यशब्देनसंबंधेतेनसवर्णदीर्घेचपश्चादृत्यकइत्यस्यपाक्षिकत्वादप्रवृत्तौगुणेन
अद्यर्षभीयसित्थिरितिचेन्न॥तस्मिन्नेवलक्ष्येप्रथमंभावोपक्रमेपश्चात्प्रकृतिभावस्याभावायोगात्॥अन्यथाप्रुप्लुवतुरित्यादौ
वैकल्पिकत्वांद्विभाषाश्वेरित्यस्यपूर्वमप्रवृत्तौद्वित्वेश्वयतेर्लिट्यभ्यासलक्षणप्रतिषेधइतिअभ्यासलक्षणसंप्रसारणाप्रवृत्तौ
पश्चाद्विभाषाश्वेरित्यस्योत्तरखंडेप्रवृत्तौश्रिप्लुवतुरितिरूपापत्तेः॥अव्यक्तशब्दस्यध्वनौयोगंदर्शयति॥अविद्यमानेति॥अ
विद्यमानंव्यक्तंकत्वादिधर्मोयत्रसोऽव्यक्तइतिविग्रहइतिभावः॥अनुकरणएवेति॥तथाचसूत्रेऽनुकरणशब्दःस्पष्टार्थइति
भावः॥अतइतिकिंवटगित्यपपाठः॥शंकासमाधानयोर्निर्दलत्वात्॥फलकल्पनेति॥पटदितीतिशब्दांतस्यानुकरणेद्वित्वेप

टदितिपटदितीत्यत्रा म्रेडितघटित तकारस्यद्वित्वाभावः अंत्यस्येत्यस्यफलमितिफलकल्पनाभिनिवेशइत्यर्थः॥अइउण्सूत्रानंत
रमिति॥इदंचिंत्यं॥तयोरिक्प्रत्याहारेप्रवेशापत्तेः॥ऋलृक्सूत्रानंतरंतयोः पाठस्सूचितः॥लृकारेइति॥ऋकारात्परतइतिशेषः॥
तादृशस्येति॥विवृतत्वादिमतइत्यर्थः॥प्रत्याख्यातमिति॥लृऋवर्णयोः सावर्ण्यमाश्रित्येतिशेषः॥ननुऋकारस्यलृकारेपरे
विवृतऋकारएवस्यात्नत्वीषत्स्पृष्टलृकारः ततोपिविवृतधर्मद्वयकृतांतर्यंणांतरतमत्वात्॥एवंगमृनित्यत्रलृकारवत्तांतर्यंण
षत्स्पृष्टोदुर्वारइतिचेन्न॥ऋलृक्सूत्रानंतरंपाठस्यहोलूकारइत्यत्राच्त्वसिद्धिद्वारतार्थत्वेनपाठसामर्थ्येनयत्किंचिदांतर्य
पीषत्स्पृष्टलृ कारस्यलक्ष्येप्रवृत्त्यंगीकारात्॥गमृनित्यत्रत्वीषत्स्पृष्टस्पर्शंकेवनास्तिपूर्वसवर्णत्वाभावात्॥एवंधातृणामित्यत्रे
षत्स्पृष्टदीर्घस्यनशंकाऽरेफद्वयघटितत्वविवृतत्वरूपधर्मद्वयकृतांतर्यस्यविवृतेएवसत्वात्॥ननुत्रिषष्टिश्चतुःषष्टिर्वावर्णाः
शंभुमतेमताः॥प्राकृतेसंस्कृतेचापिस्वयंप्रोक्ताःस्वयंभुवा॥स्वराविंशतिरेकश्चस्पर्शानांपंचविंशतिः यादयश्चस्मृताह्यष्टौचत्वा
रश्चयमाः स्मृताः॥अनुस्वारोविसर्गश्चकःपौचापिपराश्रितौ॥दुस्पृष्टश्चेतिविज्ञेयोलृकारःप्लुतएवचेतिशिक्षाविरोधः॥ईषत्स्प
ष्टयो रनयोराधिक्यात्॥तत्रदुःस्पृष्टोलकारोमातृकान्यासेपिनैतौपरिगणितौतथाहितत्रषोडशस्वराः पंचविंशतिस्पर्शा

यादयोष्टौलक्षेतिद्वयंसंकलनयैकपंचाशद्वर्णाभवंतीतिचेन्न॥तुल्यास्यसूत्रस्थभाष्यवार्तिकप्रामाण्येनैतयोरपितत्रपूरणात्य
थाऽक्षरसमाम्नायेमातृकापाठेऽविद्यमानाअपियमाउक्तशिक्षाबलाद्वर्णराशिषुपूर्यंते॥शिक्षायामपरिगणितोपिदीर्घलृका
रोमातृकापाठेपठ्यते॥परेतुत्रिषष्टिश्चतुःषष्टिर्वेतिसंख्याधर्मकृतानतुव्यक्तिकृता॥वर्णानांप्रत्युच्चारणेभेदपक्षेऽसंभवात्
तथाचाभितोज्भक्तिसहितरेफघटितत्वतादृशकालघटितत्वरूपधर्माभ्यांह्राभ्यांविवृतयोरीषत्स्पृष्टयोश्चलृऋवर्णयोर्हि
त्वं॥एवमेवत्रिमात्रचतुर्मात्रयोःप्लुतावेचइदुतावितिसूत्रेभाष्येविस्पष्टमुक्तयोरेओङ्सूत्रभाष्येणत्रिमात्रचतुर्मात्राआदे
शामाभूवन्नित्यनेनसूचितयोर्ह्रिमात्राधिकमात्रिकत्वेनानुगमेनप्लुतमध्येऽतर्भावान्नाधिक्यं॥सत्यभिधानेगमृणामित्यत्रविवृ
तत्वसाम्येनविवृतोदीर्घऋकारोलकारवत्तांतर्येणेषत्स्पृष्टऋकारश्चपर्यायेणभवतएवामातृकापाठेपठितोपिदीर्घलृकारोवि
कृतोनभवति॥तस्योच्चारयितुंशक्यत्वेपितुल्यास्यसूत्रस्यभाष्यकैयटप्रामाण्येनतस्यशास्त्राविधेयत्वात्॥मात्रिकएकारस्तु
उच्चारयितुमशक्यत्वान्नास्त्येवेत्याहुः॥रेफात्परंभक्तेरिति॥रेफाद्भक्तेःपरंनतत्कचिदपिव्यपकृक्तमिति तदर्थंए तद्भाष्येण
तूरेफात्परतोप्यूभक्तिरस्तीत्यागतं॥हयवरट्सूत्रस्थेति॥एओङ्सूत्रस्थेत्युचितं॥तत्रैवतथाभाष्यदर्शनात्॥नऋकार ई

षत्स्पष्टइतिशेषः॥नाशृतीति॥लृकारादितिशेषः॥लृकारईषत्स्पृष्टः॥विषयविशेषएवपूर्वस्यसाधुत्वंविषयविशेषएवोत्तरस्य साधुत्वमितिव्यवस्थांगीकारादेव॥वस्तुतलृकारात्परतऋकारस्यप्रयोगेनमानं॥उक्तव्यवस्थांगीकारेप्रमाणमाह॥अतएववा र्तिकेइत्यादिनासंगच्छतइत्यंतेन॥अतएवहृस्वऋकारहूयेत्यादिव्यवस्थांगीकारादेवअयनंयस्येति॥स्रो स्यायनआम्रयइति षष्ठीतत्पुरुषइतिकेचित्॥अन्यस्तदभावस्येतिअन्योऽवडोनस्मर्त्तेत्युक्तोतदभावस्यस्मर्तेत्यर्थाल्लभ्यतेइतिभावः॥देवत्रातइ ति॥अत्रपक्षेनत्वंन॥गलः॥ अत्रपक्षेलत्वाभावोन॥ग्राह्यअत्रपक्षेऽचून॥इतियोगेसद्विधिः शतृशानचोर्विधिः॥मिथएकैकस्मि न्नर्थेतेनत्वादिविधयोनविभाष्यंतेनविकल्प्यंतेकिंत्वर्थभेदेनैवभावाभावयोर्व्यवस्येत्यर्थः॥अप्रामाणिकत्वज्ञापनार्थइति॥व स्तुतोव्यवस्थितविभाषायाअगतिकगतिकत्वज्ञापनार्थं॥इदंचेति॥एवमेवविकल्पेप्राप्तेनित्यार्थविधयःसंगच्छंते॥सामंज स्यमिति॥नैतिपाठेतुप्लुतप्रगृह्याणामितिषष्ठीनिर्देशःस्यादितिभावःप्लुतप्रगृह्या॥जानूअस्येति॥नन्वत्रस्थानिवत्वेनप्रगृह्य त्वंवाच्यंतच्चदुर्घटंनव्यमतेतस्यालधर्मवृत्तित्वादितिचेत्सत्यं॥परादिवद्भावेनैवप्रगृह्यत्वांगीकारात्अपदांतादावितिं॥आदिपदे नसमासादौ॥वार्तिकमिति॥वक्तव्यपदाभावात्सूत्रत्वभ्रमवारणायेदम्॥एतेनेति॥पदांतग्रहणानुवृत्त्यैवाच्छंदित्यादेर्व्यावर्त्तने

नेत्यर्थः॥अपास्तमिति॥नचान्यार्थमवश्यमाश्रयणीयेनचकारेणेवप्रकृतिभाववारणेपदांतग्रहणानुवृत्तेोगोरवमितिवाच्यं॥
दिवउदित्युत्तरार्थंतदनुवृत्तेरावश्यकत्वात्॥अनंतरस्येतिन्यायेनपुनर्वृत्तिविधानस्यपररूपमात्रबाधनत्वाच्च॥ईषदसमाप्ता
वृत्सकोबह्वृक इत्यर्थंतुप दांतग्रहणस्यावश्य कत्वाच्च॥उपलक्षणमिति॥आयुष्मान्भवसौम्येतिवाच्योविप्रोभिवादनेइतिमनू
क्तेः॥तर्हि धीतिप्रयोगेकिंमूलमितिचेत्॥आयुष्मानेधीतिभाष्योदाहरणमेवेत्यवेहि॥स्मृतिष्विति॥असोनामाहमस्मीतिस्वेना
मपरिकीर्तयेत्इत्यादिमनुस्मृतिषु॥अत्रनामपदंगोत्रस्याप्युपलक्षणम्॥दंडिन्नित्यादाविति॥दृष्टमुत्तरकालंजातस्यपुत्रस्यना
मविद्ध्यात्॥घोषवदाद्यंतर स्थमदृत्यंत्रिपुरुषानूकमनरिप्रतिष्ठितंतत्थिप्रतिष्ठितनंभवतिद्व्यक्षरंचतुरक्षरंवानामकृ
तंकुर्यान्नतत्थितंमितिकल्पसूत्रेतत्थितांतस्यनामत्वप्रतिषेधादितिभावः॥दूरात्थूत्तेचदूरांतिकार्थेभ्यइतिप्रातिपदिकार्थमा
त्रेपंचमीत्यब्लोपनिमित्तावा॥हेहेप्रयोगे॥हेहेंतइत्येवेति॥नचवाक्यस्यडेरित्यधिकारादंतग्रहणवैयर्थ्यं॥तदभावेहेहेग्रह
णस्यानंत्यार्थतापातइत्याशयात्॥एतत्त्रयविषयमेवेति॥प्रत्यभिवादेशूद्रेभोराजन्यविशांवेतिवाच्यंदूरात्थूत्तेचेत्येतत्त्रयविष
यमित्यर्थः॥वृत्तौस्पष्टमिति॥प्रकृतसूत्रेचैवंवृत्तिग्रंथः प्रत्यभिवादेदूरात्थूतेचेत्यादिनायःप्लुतोविहितस्तस्येवायंस्थानिवद्भा

षउच्यतइति॥आदिनाभोराजन्येत्यस्यसंग्रहः॥अनुदात्तंप्रश्नांतइतिसूत्रेना नेनप्लुतोविधीयते॥किंतुदूरात्पूतादिषुविहित
स्यप्लुतस्यानुदात्तगुणमात्रंविधीयतइति॥एतद्विहितानामेवेति॥एतदभ्यनुज्ञातानामेवेत्यर्थः॥पूर्ववृत्तिग्रंथेनास्यस्थानिविशे
षमात्रलाभादितिबोध्यं॥त्रिपाद्यांनप्रवर्ततइति॥तव्यतस्तित्वकरणात्॥अप्लुतवदुपस्थिते॥इतिवदेदिति॥यत्तुप्लुतनिषेधंस्य
त्रिपादीस्थत्वेनासित्थत्वात्प्लुतप्रगृह्याइतिप्रकृतिभावेसंहिताकार्यंनस्यात्॥प्लुतनिषेधस्तुश्रवणार्थंस्यादितितन्न॥प्रकृति
भावदृष्ट्याप्लुतस्याश्रयात्तित्थत्वेनतस्यचलक्ष्येऽदर्शनेनप्रकृतिभावाप्रवृत्तेः॥नहिनिषेधोनदृश्यतइत्येतावतातेनलक्ष्येऽप्रवृ
त्तिःप्लुतोलक्ष्येस्तीतिबुद्धिःप्रकृतिभावशास्त्रस्यसंभवतीति॥नचपर्युदासेप्येतदूषणतौल्यं॥किंचप्लुतप्रकरणेतरंनोपस्थित
इत्युक्तेसंहितायामित्यस्यसंबंधोनस्यात्ते नचतयोर्व्यावचीत्यतः संहितायामित्यस्यसंबंधइतिवाच्यं॥एवमपिपर्युदासेप्लुत
स्योदात्तस्यस्थानेऽतआदेरप्लुतादेशउदात्तोभवतिनोपस्थितइत्युक्तेोउदात्तस्यश्रवणंनस्यादितिविशेषः॥मन्मनेसंहितायाइत्य
स्यसंबंधासंबंधाभ्यांविशेषः॥वत्करणेप्युक्तन्यायेनपर्युदासमेवस्थिरीकृत्यशंकते॥नचेति॥परत्वादिति॥प्लुतत्वप्रयुक्तप्रकृति
भावापवादत्वेपिप्रगृह्यत्वप्रयुक्तप्रकृतिभावानपवादत्वाद्विप्रतिषेधोपपत्तिः॥इदमयुक्तं॥शास्त्रातिदेशेदीर्घस्यपरत्वाभावा

त्कार्यातिदेशोपिस्यानिवत्सूत्रेपरिवीरित्यत्रोक्तातिदेशात्तस्यतत्वाभावात्॥अंतरंगत्वादिति॥इदमप्ययुक्तं॥नधातुलोपइति
सूत्रेऽंतरंगनिषेधदृष्ट्यागुणस्यासित्थत्वेनोपेत्थ इत्यादेर्गुणः प्रवर्ततइतिभाष्योक्तरीत्याप्रकृतिभावेनदीर्घबाधानापत्तेः
किंचवत्करणाभावेप्यप्लुतशब्देनप्लुतस्यस्थानेविहितस्यदीर्घस्योक्तदिशावारणेवत्करणवैयर्थ्यंतदवस्थं॥वस्तुतस्तुप्रकृतिभा
वेनतुस्वापेक्ष वहिरंगस्यापिनिवृत्तिः॥उपसर्गादृतीतिसूत्रेधातावितियोगविभा गेनपुनर्वृधिविधानात्ज्ञापकात्॥तेनसु
स्वार्तइत्यत्रपक्षेवृत्धिनिवृत्तिसित्थेरितिएकादिक्॥नशब्दमर्यादयालाभइति॥इदमप्ययुक्तं॥अचःपरस्मिन्नितिवत्तृतीयादि
षुभाषितपुंस्कमितिवच्चाप्लुतोयथाप्लुतकार्येनप्रवर्त्तयतितथाप्लुतोपीत्यभावातिदेशंगीकारेणोक्तार्थलाभसंभवात्॥तदेतद्
भिप्रेत्यभगवद्भाष्यकारवार्तिककाराभ्यामुक्तं॥वहूचनंप्लुतकार्यप्रतिषेधार्थंवहूचनंक्रियतेप्लुतकार्यप्रतिषेधेर्थमिति॥ईदू
देत्॥एकारस्यगंगेइत्येकमेवोदाहरणमुपन्यस्यपुनरुदाहरणांतरोपन्यासस्यफलंवक्तुमवतारयति॥एदंतमिति॥अर्थवत्वा
दिति॥अनाडितिपर्युदासेनार्थवत्स्वग्रहणादितिभावः॥एतेनेदमदसोरकोरितिप्रतिषेधेनवर्णग्रहणेर्थवत्परिभाषायाअ
प्रवृत्तिज्ञापनादिदमप्ययुक्तमित्यपास्तं॥पर्युदासपक्षेदोषमाशंक्यनिराकरोति॥वासुदेवे॥अमिति॥अत्रप्रगृह्यत्वेपिपदांत

त्वाभावेनप्रकृतिभावाप्रवृत्तेरयुक्तमेतत्॥नचामद्इतएतेइत्यत्रप्रकृतिभावापत्तिरित्याशयः॥अव्ययीभावस्यसमासांतर
घटकत्वेविवादात्॥इतिकेचित्॥एआईएतीत्यत्रप्रकृतिभावापत्तेरित्यन्ये॥नानुपपन्नमिति॥अन्येत्वनाङितिप्रसज्यप्रति
षेधएवयदयमनाङितिप्रतिषेधंशास्तीतिप्रकृतसूत्रस्थभाष्यात्प्रतिषेधार्थीयमारंभइत्योक्तसूत्रस्थभाष्याच्च॥प्रसज्यप्रतिषे
धएवार्यतेनआईएइअत्रेत्यत्रपरादिवद्भावेनप्राप्तमपिप्रगृह्यत्वेनगम्यमानप्रतिषेधाभिप्रायकत्वंतुनयुक्तंओषुयातंमरु
तइत्यादौपरादिवद्भावेनप्राप्तप्रगृह्यत्वस्यनिषेधकाभावेनप्रवृत्तिसौलभ्येनप्रतिषेधार्थीयमारंभओषुयातंमरुतइत्यादिभा
ष्यग्रंथसंदर्भासंगतेः॥नचप्रतिषेधार्थत्वेओतश्चिप्रतिषेधइतिवार्तिकानुत्थानमितिवाच्यं॥प्रतिषित्धार्थीयाअपिओदंतस्य
प्रगृह्यसंज्ञायाः प्रतिबंधकाभावेनादोभवतीत्यत्रापिप्राप्तेः॥ओतश्चेतेनास्यप्रवृत्तिरिति॥यद्यपिनिपातपदेनचादीनामर्थव
तामिवोपस्थितिरितिचाद्यंशेगौणमुख्यन्यायकार्यंप्रवर्तते।द्यंतांशेतुनविशिष्टरूपोपादानमित्यर्थवद्ग्रहणपरिभाषागौणमु
ख्यन्यायोनप्रवृतिः॥द्यंतेमुख्यार्थासंभवश्च॥तथापिचाद्यंशेविशिष्टरूपोपादानमात्रेणप्रवर्तमानगौणमुख्यन्यायोऽमुख्या
र्थकेद्यंतेप्रगृह्यसंज्ञांव्यावर्तयतिभाष्यप्रामाण्यादित्याशयः॥अन्येतुगोभवदित्याद्यर्थंओतश्चिप्रत्ययप्रतिषेधइतिवार्तिकमा

रब्धव्यमेव॥तत्प्रत्याख्यानपरंभाष्यंत्वेकदेशिनः॥ऋषिश्चपादिनाऽगौरवगोःसमभवत्तत्रच्छंतेमुख्यार्थस्यैवसत्वेनिपातसं
ज्ञायागौणमुख्यन्यायेनवारणासंभवात्॥नचतत्रार्थेच्विरेवनेष्यतइतिवाच्यं॥तथासतिसंज्ञोपसर्जनीभूतास्तुनसर्वादयइत्या
दिवार्तिकभाष्यविरोधापत्तेः॥च्छंतांशेविशिष्टरूपोपादानाभावेनमुख्यार्थासंभवेनचगौणमुख्यन्यायप्रवृत्यसंभवाच्चेत्याह॥नि
पातइतिकिमिति॥मियोइतीत्यत्रप्रगृह्यत्वंमा भूत्॥यत्तुदेवोसीतिप्रत्युदाहरणंबृहच्छेखरेदत्तंतन्न॥अदोभवदित्यादावि
वलक्षणप्रतिपदोक्तपरिभाषयावारणसंभवात्॥ब्रह्मबंधविति॥वेदेआपाद्यमानप्रयोगाभावेनप्रगृह्यत्वस्यवैकल्पिकत्वेनचा
नार्षइतिव्यर्थमितिकेचित्॥तदधिकार्थमात्राकालइति॥ततोप्यधिककालव्यवधानेनोच्चारणंतुअर्थबोधानुपयोगित्वाच्छि
ष्टसंप्रदायविरोधाच्चहेयमेवेतिभावः॥उञः॥निपातएवेति॥नतुप्रत्याहारः॥उदित्येववक्तव्येञकारोच्चारणसामर्थ्येनक्विबंत
स्यकृतसंप्रसारणस्यवेञइतिशब्दपरत्वेपिनप्रगृह्यत्वस्योपयोगः॥तुक्प्रवृत्तेः॥नाप्युञादेशः॥तुगंतस्यानिर्दिश्यमानत्वात्
मानाभावादिति॥इदमयुक्तम्॥उञइत्यस्यवृत्त्यास्थानषष्ठ्यंतत्वस्यवाच्यवाचकभावसं बंधार्थकत्वकल्पनेगौरवेणप्र
थमांतार्थेऽस्याभेदेनान्वयस्यक्लृप्तत्वेनचविधेयविशेषणत्वस्यैवोचितत्वात्॥स्यष्टमेवलभ्यतइति॥अन्येतुयोगविभागाभावे

प्रगृह्यत्वस्योमादेशस्यचशाकल्यमतेनयुगपत्प्रवृत्तौतन्मतेऽईतीतिरूपंतदन्यमतेऽइतिप्रगृह्यत्वस्यनिपातएकाजनाङि-
तिसामान्यशास्त्रप्रणयनेनतदन्यमतेपिसत्वनिश्चयेनस्मृत्यंतरानुसंधानद्वाराप्रगृह्यत्वांशेविकल्पासंभवेनादेशांशेएव
स्मृत्यंतरानुसंधानद्वाराविकल्पपर्यवसानापत्तेः॥यथाऋतोभारद्वाजस्येत्यस्याचस्तास्व दितिसामान्यशास्त्रप्रणयनेनऋ-
ष्टेस्मृत्यंतरानुसंधानद्वारानेङिकल्पबोधकत्वं॥नचप्रगृह्यपदानुवृत्तिर्वैयर्थ्यंतस्योत्तरत्रानुवृत्यर्थत्वेनोपपत्तेः॥तथाचैक
योगत्वेशाकल्यमतेऽईत्येकमेवस्यात्॥तदेतदुक्तंभाष्ये॥शाकल्यस्याचार्यस्यमतेनऽईतिविभाषायथास्यात्ऽईइतिऽइतीति॥त
दन्यमतेननिपातएकाजितिनित्यंप्रगृह्यत्वात्ऽइतीतिस्यात्॥तदेतदुक्तंभाष्ये॥अन्येषामाचार्याणांमतेन वेतीति॥योगविभा
गेनऽइत्यनेनप्रगृह्यत्वस्यशाक ल्यमतेविधानेनयोगविभागेनसित्थप्रगृह्यसंज्ञाविज्ञानसामर्थ्यात्स्मृत्यंतरानुसंधान
द्वारासामान्यशास्त्रसत्वेपिप्रगृह्यत्वांशेविकल्पः सिध्यति॥द्वितीययोगेनतुसतिप्रगृह्यत्वेएवादेशविकल्पः॥तत्रापिशाकल्य
ग्रहणानुवृत्तिसामर्थ्यात्॥ननुशाकल्यग्रहणानुवृतिः सतिप्रगृह्यत्वेएवादेशोयथास्यान्नत्वप्रगृह्यत्वेइत्येवमर्थः स्यात्तस्या
हि र्घोच्चारणसामर्थ्येनप्रगृह्यपदानुवृत्तिसामर्थ्येनचस त्येवप्रगृह्यत्वेआदेशकल्पनासंभवात्॥तस्मात्द्वितीययोगेशा

कल्पानुवृत्तिः सतिप्रगृह्यत्वेआदेशविकल्पार्थेत्येवतत्वमित्याहुः॥दीर्घोच्चारणवैयर्थ्यापत्तिश्चेति॥असंहितायांतस्यचारिता
र्थ्याच्चित्यमेतदितिकेचित्॥विकल्पमात्रसंबंधेपीति॥शाक ल्यपदसंबंधेप्रगृह्यपदस्यासंबंधेइत्यर्थः॥अर्थाधिकारादिति
इदमयुक्तं॥उञितिपदस्याप्रगृह्यत्वेशाकल्यभावात्॥तस्मात्प्रगृह्यस्यादेशेयोगविभागवैयर्थ्यापत्तेः॥अप्रगृह्यस्यैवादेशइतिव
क्तुंयुक्तम्॥विचार्यंत्विति॥इदमयुक्तमित्युक्तम्॥मयूत्प्रत्याहारइति॥नतुधातुः॥वैजात्येति॥तच्चतदंतविधिसद्भावकृतं॥नचे
त्यारभ्येतीत्यंतइत्येकोग्रंथः॥अनभिधानमिति॥नचास्तीदूतौसप्तमीतिप्रकृतसूत्रस्थभाष्यादितिभावः॥आधेयार्थेवृत्तिरिति
एकार्थीभाववत्तेनसमासेवापीपदस्यवाप्यधिकरणकाश्वरूपार्थोपस्थितिजनकत्वादितिभावः॥समासेजहत्स्वार्थायामिति॥
जहत्स्वार्थातुतत्रैवयत्ररूढिर्विरोधिनीतिभावः॥मानाभावइति॥नचनामार्थयोरभेदान्वयइतिव्युत्पत्तिभंगःगौरीपदार्थाधिक
रणत्वस्यभेदसंबंधेनाधिश्रयणेऽन्वयांगीकारात्॥तथाचलक्षणाऽवश्यकीतिचेन्न॥दधिपश्येत्यादिवदुपपत्तेः॥नचतत्रैवात्रा
पिविभक्तिस्मरणेनशब्दबोधेसप्तम्यर्थेपर्यवसन्नत्वंदुरुपपादं॥नचाधिश्रयणक्रियायामेवगौरीपदबोध्याधिकरणत्वान्वयइ
तिवृद्धछेखरोक्तंयुक्तं॥नामार्थधात्वर्थयोरपिसाक्षाद्भेदेनान्वयस्याव्युत्पन्नत्वात् इतिवाच्यं॥आधेयार्थानुपस्थापकत्वेस

तिसप्तम्यर्थोपस्थितिजनकत्वस्यसुप्तम्यर्थेपर्यवसन्नशब्दार्थत्वात्॥ प्रकृतेचलुप्तविभक्तिस्मृतिहेतुत्वेनगौरीपदस्यैवसप्तम्यर्थोपस्थितिजनकत्वात्॥ पंचकंप्रातिपदिकार्थइतिपक्षेगौरीपदस्यैवाधिकरणशक्त्युपस्थापकत्वाद्वा॥ पुनःप्रवृत्ताविति कार्यकालपक्षाश्रयणेनतुननिर्वाहः॥ अणोःप्रगृह्यस्येत्येतद्दीर्घस्यप्रगृह्यसंज्ञादृष्यात्प्लुतस्यासित्यत्वेनप्रगृह्यसंज्ञानापत्तेः ॥ ॐ ॥ ॐ ॥ इत्याचार्यार्यकृतव्याख्यायांस्वरसंधिःसमाप्तिमियात्॥ ॐ ॥ ॐ ॥

॥स्तोश्चुनाश्चुः॥ पदस्येत्यधिकृत्येति॥ इदमयुक्तं॥ अपदा तस्यमूर्धन्यइतः प्रागेवैतदधिकारस्तमाप्तेः॥ संबन्धेपिवाडःसीत्यादाविवचैप्यधिकरण्येनान्वयेऽदोषाच्च॥ शादितिज्ञापकादिति॥ विघ्न माचष्टेविघ्नइतीत्यादौसंबुध्यंतेपदांतेशात्यरतवर्गसंभवेनेदमप्ययुक्तमितिकेचित्॥ वैचित्र्यार्थइति॥ जश्त्वचर्त्वयोःप्रवृत्तिमंतरेणसच्चिदित्यादिसित्थिरिहवैचित्र्यम्॥ निर्देशादिति॥ न चतत्रश्चुत्वाभावसित्थोशादितिव्यर्थम्॥ विघ्नाद्यर्थत्वात्॥ यत्तुनासिकास्थानाधिक्येनतोरित्यादिनापंचमाग्रहणमाशंक्यशादितिनिषेधाल्लिंगात्तुल्यास्यसूत्रेनासिकास्थानभिन्नंतालवादिस्थानंगृह्य तइतिकश्चिदुक्तवान्तन्न॥ शजश्त्वंघ्नितपाशपेत्यादौश्चुत्वनिषेधायशादित्यस्यावश्यकत्वात्॥ दिक्संख्येसंज्ञायामितिनियमादाह॥ षडधिकेति॥ स्पष्टार्थमिति॥ समर्थ

सूत्रस्थकैयटरीत्यापदांतविधित्वमेवनपदविधित्वमितिबोधनद्वारासमर्थपरिभाषानुपस्थित्यर्थमितिकेचित्।यरोनुना॥सवर्णा
नसंतीति॥एतदुत्तरमाहुरितिशेषः॥अन्येतुतुल्यास्यप्रयत्नमितिसूत्रंयस्मात्प्रत्ययविधिरितिवत्यत्रानुनासिकोविधीयतेतत्रतु
ल्यास्यमित्युपतिष्ठतइत्यर्थकतयापरिभाषारूपामपिअनुनासिकपदानुवृत्तेः॥अनुस्वारस्ययञीत्यत्रचमंडूकप्लुत्याऽनुनासिक
पदमनुवर्त्ततेतेनचतुर्मुखःकुंडरथेनेत्यादौनदोषः॥नचमह्यिभ्यानित्यत्रषकारस्यऋकारापतिः॥तस्यषकारेणसूत्रमतेस्थानप्र
यत्नोभयसाम्यादितिवाच्यम्॥भाष्यमतेप्रयत्नभेदेनादोषात्॥जश्त्ववारणायस्यानिवत्वप्रवृत्तेरवश्यकतयातेनैवानुनासिकवारण
संभवाच्च॥नचरेफेसानुनासिकेषत्स्टृप्तप्रसंगइतिवाच्यं॥तस्यसानुनासिकत्वेमानाभावात्॥यद्वाकैयटोक्तरीत्यास्यानेंतरतमपरि
भाषोपस्थानात्दोषाभावः॥नचरेफेस्थानप्रयत्नाभ्यामंतरतमस्यताभ्यामंनेतरतमस्यचाप्राप्त्याऽतरतमपरिभाषायाअनुपस्थि
तिरितिवाच्यम्॥व्यक्तिपक्षेप्रतिलक्ष्यमंतरतमानंतरतमयोः प्राप्तावेवतदुपस्थितावपिजातिपक्षेकतिपयलक्ष्येषुतयोः
प्राप्तिमात्रेणांतरतमपरिभाषोपस्थानस्यदुर्वारत्वात्॥णकारस्य स्थानेनरेफांतर्यैपिआभ्यंतरप्रयत्नेनतदभावान्नांतरतमत्वंस्थानप्र
यत्नाभ्यामांतर्यंहिअंतरतमत्वं॥एवंकुंडरथेनेत्यत्रापिअनुस्वारस्यस्थानेनरेफः॥रेफस्यानुस्वारेणस्थानसाम्याभावेनांतर्याभावात्॥

तथाचायंनिष्कर्षः॥ यत्रस्थानप्रयत्नाद्यनेकधर्मकृतांतर्यसंभवस्तत्रशास्त्रेतमप्रत्ययघटितमंतरतमदित्युपतिष्ठते॥यत्रत्वेकैकधर्ममात्रकृतांतर्यसंभवस्तत्रतमपरहितमंतरदित्युपतिष्ठते॥यत्रतस्याप्यसंभवस्तत्रनोपतिष्ठतएवपरिभाषा॥नचैवंनेतेत्यादावेवगुणः स्यान्नचेतेत्यादाविति वाच्यं॥एकारस्यप्रमाणतईकारांतर्याभावेपिस्थानप्रयत्नाभ्यामिकारांतर्यंणांतरतमत्वात्सत्याऽदोषात्॥नहि सर्वैरांतर्यंतमबर्थः किंतुस्थानप्रयत्नाभ्यामपि॥नचैवं ह्रस्वेकारएवयण्स्यान्नदीर्घेतस्य स्थानप्रमाणाभ्यामांतर्यंणतमप्रत्ययघटितपरिभाषोपस्थितेः॥एवंषट्सज्जंतीत्यादौषश्योर्जश्त्वानापत्तिः॥स्थानप्रयत्नाभ्यामंतरतमेस्यर्शेजश्त्वचारितार्थ्यात्॥एवंपात्थसतीत्यादौझयोहइ तिपूर्वसवर्णानापत्तिः॥स्थानप्रयत्नाभ्यामंतरतमेवाकूघरिरित्यादौतस्यचारितार्थ्यादितिवाच्यम्॥ल्वादिभ्यइति निर्देशेनझयूप्रत्याहारपरित्यागेनहल्प्रत्याहाराश्रयणेनव्यावर्त्तनेनचतत्रव्यक्तिपक्षाश्रयणेनादोषात्॥तत्रपक्षेदीर्घादिव्यक्तिष्वंतरतमानंतरतमयोरसंभवेनसकलांगसहितायाउक्तपरिभाषायाअनुपस्थितेः॥सवर्णग्रहणापकर्षस्तुनरेफोष्मणांसवर्णानसंतीतिभाष्याभिप्रेतः॥तत्रतत्रप्रत्ययादित्युभयोःशेषइत्यादिभाष्येणापकर्षस्यभाष्यकारसंमतत्वावगमात्॥दूरेतराबहुसूत्रैर्व्यवहितेऽपकर्षोदर्शनमित्यादौउक्तरीत्यापरसवर्णवारण संभवात्॥यथीतिनकर्त्तव्यमित्याशयेनरेफोष्मणामितिभाष्येऊष्मग्रहणमित्याहुः॥प्रा

चुर्यस्यस्वसमानाधिकरणस्वसजातीयात्यत्वसापेक्षत्वनियमादाह स्वार्थिकइति॥वस्तुतस्तुप्रचुरप्रकाशोरविरित्यादौउक्तनियमव्यभि
चारात्प्राचुर्येपिमयट्तत्सूपपादः॥सामानाधिकरण्यमिति॥प्राचुर्येमयटित्वन्नमयोयन्नइत्यादावन्नयन्नयोरिवचिद्रूपेणाभेदएव
स्यान्नाभेदरूपंसामानाधिकरण्यमित्यर्थः॥हलोयर्मांयमीतिसूत्रेइति॥हलोयार्मांयमीतिसूत्रेऽस्माभिरुक्तेइत्यर्थः॥एतेनहलोय
र्मांयमीतिसूत्रस्यभाष्यकृताऽनुपादानादिदमसंगतमित्यपास्तं॥नादिन्याक्रोशइत्युत्तरंक्रमेणोदःस्यात्तंभोःशब्कोटिअभ्यासेचर्च
झरोझरीतिसूत्राणांभाष्यकृतोपादानात्तथापाठोभाष्यकृत्संमतइतिभावः॥ज्ञापनादिति॥व्यंजनपरसेकस्यानेकस्यवोच्चारणेविशे
षाभावात्पूर्वत्रासित्थमद्विर्वचनइतिद्वित्वदृष्ट्यापूर्वसवर्णस्यसित्थत्वात्परत्वात्पूर्वसवर्णप्रवृत्यासकृन्नतिन्यायेनपश्चात्द्वित्वप्रा
प्तेर्द्वितकारस्यरूपस्यलोपपूर्वसवर्णयोरविशेषाद्देतिभावः॥अनुस्वारस्यययि॥ननुशकारसवर्णईकारःप्रसित्थइत्याशंक्याह॥प्रय
त्नभेदेनेति॥यथासंख्यमनुसंख्यानंगणनमुच्यतेऽनुदेशशब्दस्यसंबंधिशब्दत्वादुद्देश्यापेक्षिप्रस्तेनायमर्थः॥समानांसमसंख्यानां
मध्येयथागणनंउद्देशिभिःसहानुद्देशिनःसंबंध्यंतेइतिकैयटोक्तंतुनयुक्तंसमूलाकृतजीवेषुहलोयमामित्यादौउद्देश्यानामपिपरस्य
रंयथासंख्यस्येष्टत्वादित्यभिप्रेत्याह॥सम्यक्ख्यानमिति॥वस्तुतस्तुकैयटोक्तार्थएवयुक्तः॥सर्वस्योद्देश्यस्यसर्वानुदेशाः प्राप्नोतीति

यथासंख्यसूत्रस्यभाष्यस्वरसादनुदेशपदस्याजहत्स्वार्थलक्षणयाविधेयतदन्वय्युभयपरत्वान्नोक्तस्थलेषुदोषः॥संबंधोयेनेति संबंधइत्यपपाठः॥पदज्ञानंपदादुपस्थितिर्वेति॥आद्यस्योदाहरणं॥समूलाकृतेत्यादि॥द्वितीयोदाहरणंपरस्मैपदानामित्यादिस्थानाख्येति॥स्थानमत्रक्रमः॥स्थानाच्चेतितिसंयोगादितिसूत्रेआध्वरमीमांसकैस्तथैवव्याख्यातत्वात्॥एतेनस्थानमधिश्रानमित्यभिप्रेत्ययत्पाठकेनोक्तंतच्चस्थानेंतरमसूत्रेयान्येतानिगोयुक्तकानिसंघृष्टकानिभवंतितान्यन्योयंपश्यतिशब्दंकुर्वंतिएवंतावत्चेतनावत्सुअचेतनेष्वपिलोष्टक्षिप्तवायुवेगंगत्वानैवतिर्यग्गच्छतिनचोर्ध्वमारोहतिपृथिवीविकारःएष्वामेवगच्छतीत्यादिनासूत्रप्रत्याख्यानायानेकधाप्रदर्शितमितितत्पूर्वमीमांसाऽनध्ययनविजृंभितमितिस्पष्टमेव॥लौकिकेति॥शत्रुंमित्रंविपत्तिंचजयंरंजयंभंजयेत्यादौलोकेक्रमेणान्वयदर्शनादितिभावः॥परस्मैपदानामित्यादि॥परस्मैपदानामित्यत्रक्रमेणनोद्देश्यवाचकपदानामुपादानंनापिपरस्मैपदपदादुद्देश्यानांक्रमेणोपस्थितिः किंतुयुगपदेवसर्वेसंज्ञिनःप्रत्याप्यंतदितिस्थानाख्यलौकिकप्रामाण्याद्यवस्थासंभवः॥एवंहृदेनक्रमेणान्वयप्रदर्शनादितिभावः तथान्वयेहृदस्यैवासाधुत्वात्सहविवक्षायांतस्यविधानात्॥ननूक्तपरिभाषयापिकथमत्रव्यवस्थायेनक्रमेणपदज्ञानंपदादुपस्थितिर्वेत्युक्तपरिभाषार्थस्योक्तरीत्यापरस्मैपदानामित्यत्रासंभवात्॥एवमेचोऽयवायावइत्यत्रापि॥एते

नपदादुपस्थितिरित्यस्यपरस्मैपदानामित्युदाहरणमित्यपास्तं॥किंचपरस्मैपदशब्देनतिबादीनामिवशतृकसोरुपस्थित्यानसंख्यासाम्यं॥आद्येतोटकितावित्यत्रापिययोरर्थयोराद्यंताभ्यांक्रमेणान्वयोनतयोःक्रमेणोपस्थितिः॥नापितत्बोधकपदयोःक्रमेणोपादानं॥टित्कितावित्यनुक्तेः॥ययोःक्रमेणोपादानंटकारककारयोर्नतयोराद्यंताभ्यांक्रमेणसंबंधइतिचेत्सत्यंकैयटोक्तार्थाश्रयणेनादोषात्॥तथाहिलादेशानांपरस्मैपदसंज्ञाविधानेनतज्ज्ञानार्थंतिबादिसूत्रानुसंधानेतत्रपरस्मैपदानांतिबादीनांगणनाक्रमेणोद्देशानुद्देशिनोःसंबंधांगीकारात्॥शतृशसोःपरस्मैपदत्वेपिअसंनिहितत्वात्संनिहितानांतिबादीनांचनवत्वात्संख्यासाम्योपपत्तिः॥आद्यंतावित्यत्रापिटकारस्यप्रथमोपादानात्तद्घटितस्यटितःप्रथमंगणनापश्चात्कितइतिगणनाक्रमेणैवसंबंधः॥असहविवक्षायामपिद्वंद्वस्यसाधुत्वंच॥नव्यमतेपितिबादिसूत्रस्थक्रममादायपरस्मैपदानामित्यत्रटित्किद्घटकटकारककारयोःक्रमेणोपादानमादायाद्यंतौटकितावित्यत्रचयथासंख्यंशास्त्रप्रवृत्तिःकथंचिदुपपादनीया॥यथासंख्येनान्वयइतिसंख्यानतिक्रमस्यकरणत्वविवक्षयातृतीयेतिकेचित्॥संख्यामनतिक्रम्यान्वयबोधइत्यर्थस्याविवक्षितत्वेनतृतीयार्थस्यानुपयोगेनान्वयासंभवेनचायुक्तमेतदित्यन्ये॥भाष्येतुसंख्यातानुदेशइत्युक्ते॥तस्यार्थःसंख्यातंगणितंतत्क्रमेणानुदेशोविधिरित्यर्थः॥अपकृष्यतइति॥तथाचयत्रस्वरितेनयुक्तंशब्द

स्वरूपंतत्रैवयथासंख्यशास्त्रंप्रवर्ततेइत्यर्थः॥ननुचैवमप्यनुदात्तङित आत्मनेपदमित्यादौसंख्यातानुदेशादुर्वारआत्मनेपदशब्देउत्तरत्रानुवृत्त्यर्थंस्वरितत्वस्याश्रयैकत्वादितिचेन्न॥ययोर्यथासंख्यमन्वयस्तयोर्द्वयोरपिस्वरितत्वसत्वेएवैतच्छास्त्रप्रवृत्त्याऽनुदात्तशब्देतदभावेनादोषात्॥ख्यत्यादित्यादाविति॥ननुत्रययोरन्वयेख्यत्योरकारस्यचतयोःसंख्यासाम्ययोश्चसंख्यासाम्यंख्यत्योर्ङ॰सिङ॰सोश्चनंतयोःसाक्षादन्वयदृतिनसंख्यातानुदेशःप्राप्नोति॥एवमेवानुदात्तङित॰तःरदाभ्यांनिष्नातःश्नासोरल्लोपःङ॰सिङ॰सोश्चविदिभिदिछिदेःकुरच्छुरवेस्तिथोरोपधेतोःऋतुयक्तेभ्यश्चेत्यादावपिनसंख्यातानुदेशः॥अनुदात्तङित॰तइत्यस्यलसेत्यनेनरदाभ्यामित्यस्य तइत्यनेनसार्वधातुकइत्यस्यातइत्यनेनङ॰सिङ॰सोरित्यस्यातीत्यनेनताच्छीलादीनांकुरच्कुरणाधिकरणयोरिसंसघञ्जापथिदूतयोरित्यस्यउञाव्याख्यानभवयोष्ठञासाश्वादन्वयादितिचेन्न परंपरासंबंधेप्यस्यप्रवृत्तेः॥अन्यथासमूलाकृतजीवेषुस्यतासीलृलुटोरित्यत्रापिएतद्प्रवृत्त्यापत्तेः॥तत्रहिलृलुटोरित्यस्यधातोरित्यनेनसमूलादीनांचणमुलासाश्वादन्वयइत्याहयात्॥इदंचव्यक्तिभेदेपिधर्मसाम्यमात्रेणप्रवर्त्तते॥तेनस्यतासीलृलुटोर्नैदिग्रहिपचादिभ्यइत्यादौसंख्यातानुदेशःसित्यन्ति॥लृलुटोर्नैद्यादीनांभेदेपिलृत्वनंद्यादित्वरूपधर्मसाम्यात्भाष्येस्वष्टमिति॥तत्रहीत्यंभाष्यं॥किमर्थमिमावनुनासिकावुभावनुबध्येतेनञ्कारएवानुबाध्येतकथंङ॰मोन्हस्वादचीतिएतदप्यस्तुञ्

कारेणनेवंशकंझकारभकारयोरपिपदांतयोर्झकारभकारोआगमौस्यातां॥ नझकारभकारौपदांतौस्तएवमपिपंचागमात्मयआगमिनो
वेषम्यात्संख्यातानुदेशेनप्राप्नोति॥ संतुतावदेषामागमानामागमिनःसंतिझकारभकारौपदांतौनस्तइतिकृत्वाआगमावपिनभविष्यत
इति॥ नित्यानुनासिकापत्येति॥ ननुतद्धानित्यत्रनानुनासिकः॥ कंठावच्छिन्नवायुसंयोगेनोत्यन्नेषुनासावच्छिन्नवायुसंयोगेनतद्रूप
धर्मोत्पत्येत्यादिस्वग्रंथपर्यालोचनयाचकारस्यनासिकास्थानत्वाभावेनमुखसहितनासिकयोच्चार्यमाणवर्णत्वाभावात्अनुनासिक
संज्ञायाअभावादनुनासिकादिप्रत्ययपरत्वाभावेनचकथमनुनासिकापत्तिः॥ आडेनुनासिकोजानुनासिकइत्यादौतुलोकसि ..त्था
नुनासिकगुणस्यैवविधानमितिनकश्चिद्दोषइतिचेत्सत्यं॥ वर्णमात्रस्यनासावच्छिन्नवायुसंयोगेनानुत्यत्तावप्यानुनासिकगुणविशिष्ट
स्यतथात्वेनानुनासिकसंज्ञेत्याशयेनास्यकथंचिद्योजनीयत्वात्॥ एतत्सामर्थ्यादिति॥ इदमयुक्तम्॥ अप्सरावत्साइत्यादावेतस्यचरि
तार्थ्यात्॥ तत्रहिअप्पूर्वात्सर्त्तेरंसिःवदेःसःततश्चर्त्वेएवसस्यसित्यत्वाश्रयणेनैतस्यप्रवृत्तेः॥ तयोरव्युत्पन्नत्वेपिखरिचेत्येतद्रूपवा
दत्वादेवास्मिन्कृतेनतस्यप्रवृत्तिः॥ ऊष्मोदयमूष्मपरं॥ ङमोह्रस्वादचि॥ आवृत्येति॥ इदमयुक्तं॥ ङमंशेपदस्येत्यस्यवैय्यधिकरण्येना
न्वयेऽनुपयोत्॥ पदाधिकारस्यविशेषत्वादितिभाष्यंतुअधिकारप्राप्तस्यत्यागायोगादुपरंजकतयान्वयप्रदर्शनपरं॥ वस्तुतस्तुपदस्ये

तिविशेषणस्यप्रयोजनंवक्ष्यामः॥उभयोःसप्तम्यंतत्वेएवेति॥इदमप्ययुक्तं॥तीषसहेत्यादौतदादिविध्यनापत्तेः॥ङःसीत्यादौपदाधिकारस्यविशेषणत्वेनलिटस्त्वित्यादौधुटस्तित्यावस्यार्थस्यानुपयोगाच्च॥वलादेरित्यादिग्रहणंत्वचिन्मुडितिवत्वलिपरतआर्धधातुकस्येत्यर्थप्रतीतिवारणायपदस्येत्यधिकृतस्यानुवृत्त्यैवनिर्वाहेभाष्यकारीयमंडूकप्लुत्याऽञ्चिचपदेइत्यतःपदेइत्यस्यानुवृत्त्याश्रयणंतुङ·मइत्यस्यषष्ठ्यंतत्वाश्रयणेनाजादौपदेङ·णौङ·मुडित्यर्थाभिप्रायकंङ·मइत्यस्यपंचम्यंतत्वेहिअचीत्यस्यषष्ठ्यंतत्वकल्पनास्यात्॥अजादेःपदस्यङ·मुडित्यर्थेतुप्रत्यङ·र्थइत्यादौसमासेङ·मुडापत्तिः॥आद्यंतौठकितावित्येतदेकवाक्यतयास्यापिपदादिविधित्वात्॥अपदादिविधावित्यत्रोपपदविभक्तेरितिन्यायेनकर्मषष्ठीत्वस्यैवापत्तेः॥कार्यित्वमिति॥पदत्वइत्यस्यपदत्वप्रयुक्तेकार्येइत्यर्थइतिभावः॥इदमुपलक्षणं॥अपदादिविधावितिपर्युदासेनपदांतविधावेवैतत्प्रवृत्तेः॥ननुपूर्ववदंङिप्रियङित्यादौनलोपार्थमावश्यकेनमध्यमत्वानाक्रांतइतिविशेषणेनैवमाषकुंभवापेनेत्यत्रपदव्यवायेपीतिनिषेधःसिध्यतीतिउत्तरपदस्ययत्रकार्यित्वमित्यर्थाश्रयणंव्यर्थमितिचेदत्राहुः॥यणादिपरमितिनिर्देशेनमध्यमत्वानाक्रांतेत्यस्यपूर्वपदाघटकत्वविशिष्टंयन्मध्यमत्वंतदनाक्रांतेइत्यर्थः॥तत्फलंतुप्रत्यङ·र्थकृतमित्यादौनङ·मुट्॥एवंचमाषकुंभवापेनेत्यादौमाषकुंभस्यवापइतिविग्रहेपूर्वपदाघटकत्वविशिष्टमध्यमत्वना

क्रांतत्वस्यकुंभपदेसत्वेनप्रत्ययलक्षणप्रतिषेधवारणायोत्तरपदस्ययत्रकार्यित्वमित्यर्थआवश्यकइति॥नचैवमुक्तवार्तिकप्र
त्याख्यानेनफलेभेदइतिवाच्यम्॥तत्यक्षेपियणादिपरमितिनिर्देशेनप्रत्यङ्‌र्थकृतमित्यादौङ॰मुडभावकल्पनात्॥नचैवंकर्म
धारयपूर्वपदकेपरमदंडिप्रियइत्यादिबहुव्रीहौनलोपानापत्तिरितिवाच्यं॥परमदंडीतिसमुदायगतपदत्वमादायतत्सिद्ध्यैः॥नच
पदव्यवायेपीत्यत्रपदपदंपदत्वयोग्यपरं॥नपदांतेत्यादौतथैवस्वेनव्याख्यातत्वात्॥तयाचकार्यित्वनिवेशोव्यर्थइतिवाच्यं॥पद
त्वयोग्यत्वंयदिप्रातिपदिकसंज्ञकत्वं॥पिबभवेतियस्यांक्रियायांपिबभवासुंदरा पिबभवायेषांसुंदरपिषभवानामित्यादौपिवेत्या
देः प्रातिपदिकत्वाभावेनपदव्यवायेपीतिनिषेधानापत्तेः॥यदिचप्रातिपदिकत्वतिङं॰तत्वेतदन्यतराश्रयत्वंतदागौरवं॥माषकुंभ
वापेनेत्यत्रगतिकारकोपपदानामित्यस्यानित्यत्वेनसुबुत्पत्त्यनंतरमेवसमासाश्रयणेनपदपदस्यपदत्वयोग्यार्थकत्वाभावेपिनदो
षः॥स्फोटीभविष्यतिचैतत्सर्वंसमासप्रकरणेशेखरे॥सोत्रोनिर्देशइति॥यतुतयोर्द्यावचिसंहितायामितिसंहिताधिकारस्यप्रक्रांत
त्वेपिवाक्येचसंहितायावैवक्षिकत्वेनङ॰मुडभावोपपत्तौइदमसंगतमितितन्न॥वाक्येसंहितायावैवक्षिकत्वेपिसंहिताधिकारस्यं
कार्याघटितनिर्देशस्यप्रायशोऽनुपलंभेनासंहितायांनिर्देशेप्रयोजनाभावेनच संहितायाअविवक्षाकल्पनायोगात्॥नचैवमजादौ

पदेङ·मोङ·मुडित्यर्थेभाष्यसंमतेप्रत्यङ·र्थइत्यत्रङ·मुङापत्तिः॥उत्तरपदस्यकार्यित्वाभावेनप्रत्ययलक्षणनिषेधादितिवाच्यं॥उणादयो बहुलमितिनिर्देशेनङ·मुटिउत्तरपदस्यकार्यित्वेऽपिप्रत्ययलक्षणनिषेधाश्रयणात्॥अन्येतूणादयोबहुलंयणादिपरंसनाशंसभिक्ष उरित्यादिनिर्देशेनङ·मुटोऽनित्यत्वंज्ञाप्यते॥तेनाणादिसंज्ञार्थानिअप्रयुतकार्यंयणादिकंकरोतियङ·तप्रक्रिये त्यादिप्रयोगाणांसिद्धिः नपदांतसोपदादौपदव्यवायेपीत्यादौपदपदंपदत्वयोग्यपर्यंयद्यागतिकारकोपपदानामित्यस्यानित्यत्वेनसुबंतेनैवासमासांगीका रात्पदपदंयथाश्रुतार्थकमेव॥उत्तरपदस्यकार्यित्वएवेतिनिवेशस्तुप्रकृतसूत्रस्यभाष्यविरुत्थइतिमाषकुंभइत्यादौनदोषइत्याहुः॥ ननुगणेशोवनेशइत्यादौअसमासेङ·मुट्दुर्वारः॥परादिवद्भावेनैशइत्यस्याजादिपरत्वात्ङ·मःपरत्वाच्च॥नचपंचमीसमासाश्रयणे नवास्यानिवद्भावः॥पूर्वत्रासिद्धेनस्यानिव दितितन्निषेधात्॥नचत्रिपाद्यांनांतादिवद्भावः॥क्षीरपेणेत्याघसित्येरितिचेन्न॥पदाव यवङ·मोऽभावेनादोषात्॥नचपूर्वांतवद्भावेनैकारांतस्यपदत्वं॥उभयतआश्रयणेनांतादिवदितिनिषेधात्॥तस्यपौर्वापर्याश्रयण कत्वेपिपदेत्यस्यावृत्याऽजादौपरेयत्यदंतदवयवस्यङ·मःपदेपरतोङ·मुडित्यर्थाश्रयणेनोक्तनिषेधप्रवृत्तेःसुलभत्वात्॥पदावय वङ·मःपरस्याजादेःपदेङ·मितिव्याख्यानेपियथाकथंचिदत्रङ·मूविशेषणस्यपदस्यविशेष्यपदभिन्नस्यैवग्रहणेनादोषात्॥एतेनङ·

मः पदस्येतिविशेषणंव्यर्थमित्यपास्तं॥नचैकदेशविकृतन्यायेननांतस्यपदत्वं॥अनच्कईद्रः संपन्नइत्यादिभाष्यप्रामाण्येनस
मासांतइत्यादिनिर्देशेनचैकादेशरहितेएकदेशविकृतन्यायेनपदत्वाद्यप्रवृत्तेः॥तेनवनांतः सांतइत्यादेर्नलोपरुत्वादिन ॥अत्रा
नुनासिक॥अतएवेति॥अत्रेत्यनेनरुप्रकरणस्यैवग्रहणंनतुरोरेवेतिहेतोरेत्यर्थः॥नचसमःसुटीत्यादिनारोर्विधानेत्रेत्यनेनरोर्ग्र
हणसंविधानेपितस्यैवेतिरुप्रकरणग्रहणेनेदंतत्साधकमितिवाच्यं॥समःसुटीत्यत्रसकारप्रश्लेषपक्षेपिदीर्घादटीत्यनेनरोरेवधि
धेयत्वात्॥अन्यथामहांइइत्यत्रसत्वस्यासित्यत्वाद्यप्रवृत्तेरूपासित्येः॥वस्तुतस्तुसकारप्रश्लेषपक्षेऽत्रेत्यस्यसप्रकरणेइत्येवार्थो
नतुरुप्रकरणेइति॥कानाम्रेडितइत्यत्ररुप्रकरणस्यविच्छिन्नत्वेनतद्विषयेऽनुनासिकापत्तेः॥अधिकारपक्षेरोः पूर्वस्येत्यर्थोऽसं
भवीपूर्वस्यनित्यंरुत्वंपूर्वस्यत्वानुनासिकइत्युक्तरीत्यारुणासंहेवानुनासिकविधानेनानुनासिकविधानकालेरोरभावादतआह
रोः पूर्वस्येत्यस्येति॥अनवयवएवेति॥आगमत्वंचप्रत्ययादेशभिन्नत्वेसतिसाक्षाल्लक्ष्यसंस्कारकतयाशास्त्रविहितत्वं॥एवमेवन्
ग्वाभ्यामिसूत्रविहितयोरप्यनवयवत्वं नग्वाभ्यामितिपंचमीनिर्देशेनपूर्वशब्दस्यतत्रावयववाचित्वाभावात्॥तेनद्व्यअच्च
यजंतस्यापत्यंऐयजित स्कत्रात्रइत्यर्थः णेवनतुकइतिभावः विसर्गोक्षिप्तेति॥इदमयुक्तं॥आक्षिप्तस्यशब्देऽनन्वयात्॥किंतुभा

प्योक्तरीत्यानिर्बीहीबोध्यः॥ केचित्त्ववसानेरेफस्यविसर्जनीयःखरितस्यसोविधेयः॥ शर्परेट्त्यादिविसर्गस्यानिकंकार्यरेफस्येवविधेयमित्याहुः॥अप्राप्तिरेवेति॥अत्र विसर्गेप्राप्तेइतिमूलंपुमःखयीतिसूत्रेपक्षभेदेन? कःपयोःषत्वस्यचप्राप्तावितिमूलंयदिसत्त्वेनविधीयतेर्किंतुरुत्वमेवतदेत्यर्थकमेवेतिबोध्यं॥अतएवरुप्रकरणस्यग्रहणादेव॥दोषत्वेननोक्तेति॥इदमुपलक्षणं॥समोवालोपमेकइत्यस्य॥संस्कर्त्ता॥सँ स्कर्त्तेत्यनुनासिकानुस्वारघटितरूपस्योदाहरणत्वेन प्रदर्शनादित्यपिबोध्यं॥अपास्तमिति॥इदमुपलक्षणं॥नश्छव्यप्रशानित्यादौपक्षेनकारस्यश्रवणापत्तिरित्यपिबोध्यं॥पूर्वंप्रवृत्त्येति॥इदमयुक्तं॥पूर्वत्रासिद्धीयमद्विर्वचनइतिपरिभाषयापरद्वित्वस्यैवपूर्वंप्रवृत्तेर्युक्तत्वात्॥त्रितस्यनिर्वाहइति॥केचित्त्वेकस्यांव्यक्ताविति न्यायेननपुनर्द्वित्वं॥लक्षणपदस्यकार्यार्थकत्वात्॥अतएवसोषुप्यतेःसनिसोषुपिषतइतिअत्रद्वित्वस्योक्तन्यायेनाप्रवृत्त्याभाष्यकारीयानभ्यासग्रहणप्रत्याख्यानस्यनिर्वीहइत्याहुः॥सूत्रविधेययोरिति॥तयोर्विधायकस्यशास्त्रांतरस्याभावादिदंव्यर्थं॥ननुघसेःकिच्चेतीरनिकित्वादुपधालोपेजातस्यचर्त्वस्यासिद्धत्वात्तवपूरत्वमेवनास्तीत्याशंक्याह॥क्षरधातोरिति॥क्षीरंक्षरतेर्वाघसेर्वेतिनिरुक्तप्रामाण्यादितिभावः॥अवश्यंप्राप्तावितिपाठः॥लुंपेदवश्यमःकृत्येइतिकृत्येएवलोपस्मरणादितिबोध्यं॥भावेक्त इति॥नपुंसकेभावेक्तइतिविहितःगत्यर्थाकर्मकेतिविहितोवास

कर्मकेभ्योपिभवतीतिभावः॥अत्रयदुक्तव्यंतत्त्रिपथगायामुक्तं॥सवर्णकालइति॥ वर्णसहितकालइत्यर्थः॥तदधिकेति॥स्वारसि
कार्धमात्राकालात्योधिकोर्धमात्राकालस्तदधिकेत्यर्थः॥अव्ययमेवेति॥नतुधातुरित्यर्थः॥ध्वनितमेतदिति॥तत्रहिवर्णैकदेशावर्ण
ग्रहणेनंगृह्यतइतिपक्षेआलूयेत्यत्रह्रस्वस्येतितुकमाशंक्याचार्यप्रवृत्तिर्ज्ञापयतिनदीर्घेह्रस्वाश्रयोविधिर्भवति॥यदपंदीर्घादिति
केतुकंशास्तीत्युक्तं॥यदिचह्रस्यायंतुक्स्यात्तदानपूर्वेणसिद्धिः तेनह्रस्वस्यतुविधानादितिबोध्यम्॥स्यानिह्रारेति॥इदमुरदित्येत
दभिप्रायम्॥इतिहल्संधिः॥यद्यपिविसर्गस्यापिहल्त्वेनहल्संधावेवास्यांतर्भावएवंस्वादिसंधेरपितथापिब्राह्मणवसिष्ठन्यायेनश्रोतॄणां
प्रतिपत्तिसौकर्यायएषक्कथनं॥श्रोतारोहिविसर्गस्थानिककार्यसंदेहेविसर्गसंधिप्रकरणमवेक्ष्यनिश्चिन्वंति॥एवंस्वादिस्थानिककार्य
संदेहेपि॥अनुवृत्तिप्रदर्शनायेति॥वस्तुतस्तुविसर्गस्थानिकसंधिकार्याणामुक्तरीत्याश्रोतृप्रतिपत्तिसौकर्यायैकत्रक्रोडीकारस्यावश्यकतयापुनरुक्तिः॥अतएवपूर्वमुक्तमपिभलांजशेतइतिसूत्रंहल्संधौपुनरुक्तं॥वक्ष्यतिपूर्वमुक्तमपिकस्कादिषुचेतिशास्त्रं॥य
द्यपिभलांजशेतेइतिशास्त्रंसंहिताधिकारस्थंतथापिवर्णोत्तरेणसंहितायांवावसानइत्यस्याप्रवृत्त्याजश्त्व श्रवर्णनिर्बाधमित्येतावतासं
धिकार्यत्वमस्य॥अतएवतादृगेववागीशश्चिदूर्मिपत्युदाहृतमित्यलंप्रसक्तानुप्रसक्त्या॥॥खरेवेति॥नावसानं॥तस्याभावरूप

त्वेनविज्ञात्यादित्यर्थः॥अव्ययीभावश्चेत्यत्रभाष्येइति॥तत्रहिअव्ययीभावस्याव्ययत्वेउपपयःकारइत्यादौसत्वाभावःप्रयोजनमित्युक्तं नेतदस्तिप्रयोजनंअनुत्तरपदस्थस्येतिप्रतिषेधोभविष्यतीत्युक्तं॥तेनानव्ययस्येतिवार्तिकेनसत्वप्रतिषेधेःव्ययत्वंनेतिलभ्यतइति भावः॥वस्तुतस्त्वव्ययीभावस्याव्ययत्वेप्रयोजनंलुङ्मखस्वरोपचाराइतिपरिगणनारंभतत्प्रत्याख्यानयोःफलैक्यायेतस्यानभिधा नं॥वाःकाम्यतीत्येतस्याप्यनभिधानं॥सोपदादावितिसूत्रेरोःकाम्येइतिवाच्यं॥किंप्रयोजनं॥निषमार्थंपयस्काम्यतिक्रमाभूत्॥गीःका म्यतिपूःकाम्यतीतिभाष्यात्॥अन्यथासंग्राह्योदाहरणंसत्वस्य॥व्यावर्त्यंतुषत्वस्यापीत्यर्धजरतीयापतिः॥इणःषः॥इदुदुपधस्ये त्येवसित्येइदंव्यर्थमित्याशंक्याह।इदुदुपधस्येतिइतिचसंबध्यतइति।अतएवरोःकाम्येइत्यस्यगीःकाम्यतीतिविसर्गघटितंभाष्येव्यावर्त्यप्रद र्शितं॥अन्यथासत्वस्याप्रवृत्तावपिषत्वस्यप्रवृत्त्यापत्यातदसंगतिः॥अतएवेति॥अनव्ययस्येत्यादेरुत्तरसूत्रेसंबंधादेवेत्यर्थः॥स स्यानेनषत्वमितिकुप्वोःपरयोरितिपोषः॥अपदादिविधावितिचेत्यारभ्यषत्वसित्यिरित्यंतोग्रंथःपूर्वेणगतार्थः॥असंगतइति।ष त्वप्रकरणांतेइणःषइत्यस्यपाठेतुनकश्चिद्दोषइत्याहुः॥प्रकरणेति॥षत्वसत्वयोर्विधेययोर्भेदेपिकुप्वोरितिनिमित्तैक्यात्प्रकर णैक्यंबोध्यं॥नमस्पुरसोर्गत्योः॥गतित्वाभावइति॥कृञायोगाभावेइतिपोषः॥कृञोयोगेतुऊर्यादित्वेननिपातत्वात्स्वरादिपाठंवि

नैवाव्ययत्वसिद्धिः॥तथाचनमः करोतीतिविसर्गघटितमसाध्वितिभावः॥नमःशब्दंयोगतेरित्यस्यसंबंधफलंतुक्रियायोगाभावे
बोध्यं॥द्वित्रिभ्यतुरिति॥इतिशब्दएषामित्यर्थे॥वक्ष्यमाणैरित्येति॥शब्दस्वरूपंविशेष्यमादायसुजंतस्येतिपुनः पदस्येतिविशेष्यमादाय
सुजंतांतस्येति॥तेनपरमद्विष्करोतीत्यत्रषत्वसिद्धिः॥सूत्रयितुमिति॥ननुचतुः करोतीत्यत्रेतस्यासित्यत्वादिदुदुपधस्येतिनित्यंष
त्वापत्तिः॥यथान्यासेतुविशिष्यचतुर्ग्रहणेननित्यषत्वस्यबाधः॥नचव्युत्पत्तिपक्षेप्रत्ययविसर्जनीयत्वात्तद्प्राप्तिः॥चतुष्कपालमि
त्यादिसित्थयेऽव्युत्पत्तिपक्षस्यैवाश्रयणीयत्वात्॥नचप्रकरणेप्रकरणमसित्थंनतुयोगेयोगइतिपक्षाश्रयणेननिर्वाहः॥तस्येत
द्वंयकृदभिमतत्वात्॥नचद्विःकरोतित्रिःकरोतीत्यनयोरिसुसोरित्येवसित्थेचतुःकरोतीत्यत्रनाप्राप्तेऽस्यापवादत्वं द्विःपाक
इत्यादौसमासेसांमर्थ्यविरहात्॥इसुसोरित्यस्याप्राप्तौअस्यावश्यकत्वादितिचेन्न॥कृत्वोर्थइत्यस्यस्थानेसुचइतिसूत्रयितुमुचितमि
त्यापत्तेः॥यद्वासुचइत्युत्तरंचतुरइतिन्यासःसुजंतस्यचतुरःषत्वमितितदर्थइतिनकश्चिद्दोषः॥स्कानिनिमित्तमिति॥तथाच
सस्येतिरेफस्याप्युपलक्षणमितिभावः॥नित्यषत्वापत्तेरिति॥अन्येतुलाघवात्द्वि स्त्रिरित्येववक्तव्येकृत्वोर्थप्रत्ययांतसामान्येप्रवृत्त्य
र्थकृत्वोर्थग्रहणाच्चतुःकरोतीत्यत्रनित्यषत्वंबाधित्वाविकल्पप्रवृत्तेरितिनकश्चिद्दोषः॥स्पष्टंचेदंप्रकृतसूत्रेकैयटे॥अथवासुचइ

त्येवक्तव्यंकृत्वोर्थग्रहणाच्चतुःशब्देपिषत्वं॥सुचइत्युक्तोहिनिर्दिश्यमानपरिभाषयासुचोविसर्गस्येवषत्वंस्यात्नचतुःशब्दविसर्गस्येतिकृत्वोर्थग्रहणंकृतं॥एतेनसुचइतिसूत्रयितुमुचितमित्यपास्तं॥नचसुचतुष्यंचाशादितिसुजर्थबहुव्रीहौषत्वानापत्यासुचइतिसूत्रयितुमशक्यमेवेतिकृत्वोर्थइत्यस्यनसुचइत्यनेनसमानफलकत्वमितिवाच्यं॥कृत्वोर्थइत्युक्तावप्यस्यासित्थत्वेनेदुदुपधस्येतिनित्यषत्वस्येवोक्तस्यलेप्रवृत्त्याफलभेदाभावात्॥तदेतदभिप्रेत्यवार्तिककारभाष्यकाराभ्यांद्विस्त्रिश्चतुर्ग्रहणंप्रत्याख्यातमित्याहुः॥इसुसोःसामर्थ्ये॥तयोरेवसंभवेनेति॥अव्युत्पत्तिपक्षाश्रयणेनेदं॥इदमयुक्तं॥तदाश्रयणेहिजग्मुःपेचुरितियस्यांक्रियायामित्याख्यातमाख्यातेनेतिसमासेनित्यंसमासइतिषत्वापत्तेः॥एवंषष्ठ्याआक्रोशेइत्यलुकिसख्युःपुत्रइत्यत्रापिषत्वापत्तिः सुधीःपचतिसुभूःपचतीत्यादौप्रातिपदिकावयवयोरिसुसोःसामर्थ्यइतिषत्वापत्तिः॥तस्मादिसुसोःसामर्थ्येइत्येतद्विषयेव्युत्पन्नपक्षएवाश्रयणीयः॥तथासतिप्रत्ययाप्रत्ययथोःप्रत्ययस्यैवग्रहणमर्थवद्ग्रहणेनानर्थकस्यलक्षणप्रतिपदोक्तयोःप्रतिपदोक्तस्येतिपरिभाषाभिःसख्युःपाकइत्यादौनषत्वं॥परस्परसाहचर्येणकृतोरेवेसुसोर्ग्रहणात्॥पेचुःकाष्ठैरित्यादावपिनषत्वमित्येवमुक्तं॥व्युत्पत्तिपक्षमाश्रित्यशंकते॥नचेति॥इसुसंतांतस्येत्यर्थेनेति॥अनुत्तरपदस्थस्येत्यनेनपदस्येत्यस्यैवाधिकरण्येनान्वयकल्प

नात्यरमसर्पिष्करोतीत्यादेषत्वमित्यपिबोध्यं॥नकर्तव्यमेवेति॥अन्येतुअयामंतात्वाय्येल्वि ष्णुषितितुत्रतथसिइतिसूत्रद्
यत्रणयनान्यथानुपपत्यापाणिनेर्व्युत्पत्तिपक्षेपिसंमतः नित्यंसमासइतिसूत्रेनित्यग्रहणाच्च॥अव्युत्पत्तिपक्षेहिनित्यंसमासइत्य
स्यषत्वप्रतिषेधमात्रफलकत्वेननित्यग्रहणवैयर्थ्यंस्पष्टमेव॥किंचाव्युत्पत्तिपक्षस्यैवाग्रयणेजग्मुःपेचुरितियस्यांक्रियायामि
त्याद्युक्तदोषापत्तेः॥तदेतदभिप्रेत्यनित्यंसमासेइतिसूत्रेभगवता भाष्यकृतोक्तं॥अथचेत्कृदंतमेतदिति॥अथचेत्सविज्ञानमि
त्यादिनापक्षांतरस्याप्यवलंबनंतुप्रौढिवादमात्रंतदेतदभिप्रेत्याव्युत्पत्तिपक्षेत्वाग्रीयमाणेसर्पिषेत्यादिनसिध्यतीतिव्युत्पत्तिप
क्षएवेसुसंतस्याग्रयणीयइतिनित्यंसमासेइतिसूत्रेकैयटेनोक्तम्॥आदिपदेनभिंद्युःपेचुरित्यादिपूर्वोक्तदोषसंग्रहः॥किंचेसु
सोर्विषयेःव्युत्पत्तिपक्षाग्रयणेसर्पिःकालकमित्यादावसामर्थ्यादनेनषत्वाप्रवृत्तावितुदुपधस्येतिनित्यंषत्वापत्तिःएवंदेवदत्त
स्येदंसर्पिःफांटमिदंयज्ञदत्तस्येत्यत्रेदुदुपधस्येतिषत्वापत्तिः॥कस्कादिषुसर्पिष्कुंडिकाशब्दपाठस्तुव्यपेक्षायांतद्भावेःसमा
सेचनित्यार्थः॥असमासेव्यपेक्षाविरहेचेदुदुपधस्येतिषत्वासित्यैरित्याहुः॥व्यपेक्षायांविकल्पएवेतिबोध्यमिति॥इदमयुक्तं॥वि
कल्पेनमुक्तेकस्कादित्वान्नित्यषत्वप्रवृत्तेः सुलभत्वात्॥किंचाव्युत्पत्ति पक्षस्यैवस्वेनाग्रयणेनाव्यपेक्षायामिदुदुपधस्येत्यनेने

वषत्वसित्यत्राव्यपेक्षायांपाठसामर्थ्यैनैवनित्यषत्वसित्थिः॥ननुपरमसर्पिःकुंडिकेत्यत्रकस्कादित्वात्षत्वंदुर्वारं॥न चानुत्तरपदस्य
स्येतिप्रसज्यप्रतिषेधाश्रयणेनकस्कादिषुचेतिविहितस्यापिषत्वस्यनिषेधइतिवाच्यं॥निषेधदृष्ट्यातस्यासित्थत्वेनतन्निषेधासं
भवात्॥इतिचेन्न॥प्रकरणंप्रकरणमसित्थमितिपक्षाश्रयणेनप्रसज्यप्रतिषेधाश्रयणसामर्थ्यैनवाषत्वमात्रस्यनिषेधांगीकारात्
अत्रचानुत्तरपदस्यस्येतिकिं॥परमसर्पिःकुंडिकेतिभाष्यंमानं॥नचैवंपरमसर्पिष्कल्पमित्यत्रेणःषट्त्यस्यापिनिषेधापत्तिः॥कव
र्गपवर्गघटितेएवसमासेऽनुत्तरपदस्यस्येतिनिषेधप्रवृत्तेः॥नचपरमसर्पिष्कल्पपुत्रमित्यत्रनिषेधापत्तिः॥प्रत्यासत्त्याकवर्गाद्युत्त
रपदकसमासएवोक्तनिषेधप्रवृत्तेः॥ ॥इतिविसर्गसंधिः॥कृतेत्वस्मिन्निति॥सूत्रेइत्यर्थः॥सुप्तिविभक्त्योर्ग्रहणमिति॥सप्तसुविभ
क्तिषुयेप्रथमेविभक्तीइत्यर्थः॥गुणवृत्तिहेतुरिति॥यद्यपिवृत्तिग्रहणंनप्रकृताभिप्रायेणप्रकृतेगुणस्यैवप्राप्तेः॥नापिपूर्वसवर्णदीर्घ
बाध्यकार्यसामान्यप्रदर्शनाभिप्रायेण॥यण्पररूपयोरनुक्तेः॥तथापिनादिचीत्येतद्दिषयेभ्रष्टावसरन्यायाप्रवृत्युपपादनायतद्दिष
येप्रवर्त्तमानपूर्वसवर्णदीर्घबाध्यकार्यसामान्यप्रदर्शनमितिनकश्चिद्दोषः॥कस्यचित्संज्ञेति॥इदंहूयमानार्थकनाम्नएवप्लुतइति
भ्रमेण॥वस्तुतस्तुनाम्नएवग्रहणेप्रमाणाभावात्॥तच्चरूढंलौकिकंवेतिदूराद्धूतेचेतिसूत्रस्यस्वग्रंथाद्योगिकेपिप्लुतःप्रवर्त्तते॥आ

श्रयणसामर्थ्यादिति॥ननुस्त्रिपाद्यांरोःसुपीत्यस्यानंतरंअतउरतिङित्येवपाठ्यमितिचेन्न॥उत्वस्यासित्थत्वेनगुणानापत्तेः॥मनोर
यङित्यत्रोत्वस्यासित्थत्वेनरोरीतिलोपापत्तेश्च॥यद्यप्लुतादितिविशेषणसामर्थ्येनप्लुतस्यसित्थत्वेऽप्लुतइतिव्यर्थं तथापितत्सा
मर्थ्येनदूरात्पूतेचेत्यस्यसित्थत्वेपिगुरोरनृतइत्यस्यसित्थत्वेमानाभावइत्याशयेनाप्लुतइत्युक्तंसूत्रकृता॥प्लुतस्याश्रयणसामर्थ्येन
पूर्वत्रासित्थमित्यसित्थत्वंबाध्यतेनत्वसित्थंबहिरंगमंतरंगइतीत्यभिप्रेत्याह॥पयसीति॥अन्यथाश्रयणसामर्थ्येनास्यासित्थत्व
मात्रबाधने॥नन्वंतरंगस्यासित्थत्वइवपरिभाषादृष्ट्याबहिरंगस्यासित्थत्वेपिपरिभाषानप्रवर्ततइत्याशंक्याह परिभाषादृष्ट्येति॥
स्वदृष्ट्याऽसित्थस्यपरंप्रत्यसित्थत्वप्रतिपादनसंभवंलोकदृष्टांतेनोपपादयति॥स्वदृष्ट्येति॥स्वदृष्ट्याविद्यमानस्यघटादेःपरंप्रत्य
विद्यमानत्वंप्रतिपादनदर्शनादित्यर्थः॥प्रतिपाद्याभावइति॥प्रतिपत्तिक्रियायाःसकर्मकत्वेनप्रतिपाद्यरूपकर्मणोऽभावेयथानिष्प
त्तिर्भोज्याभावेभोजनस्येव॥तथांतरंगंप्रत्यसित्थत्वप्रतिपादिकापरिभाषांतरंगादर्शनेकंप्रत्यसित्थत्वंप्रतिपादयेत्॥उत्वंप्रतीवत
देशस्यपरिभाषांप्रत्यपिप्लुतसित्थत्वमित्यन्ये॥पूर्वत्रासित्थमित्यसित्थत्वस्येवाश्रयणसामर्थ्याद्बहिरंगासित्थत्वस्यापिकुतोनवा
धइत्याशंक्याह॥आश्रयेणेत्विति॥प्रत्यक्षत्वेनचेति॥पाणिनिनासाक्षादुच्चारितत्वेनेत्यर्थः॥तथाचप्रत्यक्षस्यप्रथमोपस्थितस्यबाधे

नोपपत्तावानुमानिकस्यविलंबोपस्थितिकस्यबाधकल्पनानयुक्तेतिभावः॥स्पष्टंभाष्येइति॥अतोरोरप्लुतादितिसूत्रेइत्यर्थः॥ननुप्लुतप्रगृह्याइतिसूत्रेप्लुतस्यसित्यत्वज्ञापनद्वारएकादेशप्लुतेविप्रतिषेधेनकृतेप्रकृतिभावः॥देवदत्त३अत्रत्वमसीतिभाष्यस्यकैश्चिदटेनप्लुतस्यैकपदाश्रयत्वादंतरंगत्वेनैकादेशस्यतुपदद्वयापेक्षत्वेनबहिरंगत्वेनचिंत्यतोक्तौप्लुतस्यापिवाक्यत्वसंपादकपदांतरसापेक्षत्वादेकादेशस्यसमत्वाच्चिंत्यमेवचिंत्यमितिविवरणोक्तिर्विरुध्यते॥वाक्यस्यटेःप्लुतार्थंदेवदत्ताइत्यस्यादावेहीतिशेषपूरणस्यावश्यकत्वात्॥वाक्यद्वयसापेक्षैकादेशस्यैवमपिवहिरंगत्वादितिचेत्सत्यं॥भाष्यकारेणतुपरत्वेनांतरंगत्वेनवापूर्वंप्लुतप्रवृत्तौविशेषाभावादंतरंगत्वंस्थितमप्युपेक्ष्यविप्रतिषेधउपन्यस्तः॥नदोपइति॥आदेःपरस्येत्यादेःस्यादितिभावः॥भोभगोइतिआदीर्घइति॥तत्राचश्वेतिपरिभाषानोपतिष्ठते॥फलाभावादितिभावः॥तथाचस्थानषष्ठ्यंतपदजन्यप्राथमिकोपस्थितिविषयइतिसमुदायएवेतिनतत्रस्थानिवन्निषेधः॥हेरामेति॥इदमुपलक्षणं॥रामइत्यत्रापिपदत्वात्सित्यर्थः॥सुब्लुप्तविसर्गस्यस्थान्यलृत्वात्॥आनुमानिकेति॥रामइत्यत्रापिरेफांतस्यस्थानेविसर्गोतआदेशइतिभावः॥नन्वेवंस्थानिवद्भावेनसुबंतत्वलाभइत्ययुक्तं॥नियमशास्त्राणांविधिमुखेनप्रवृत्तेस्त्वयैवाभ्यर्णमुक्तत्वेनप्रत्यवलक्षणेनैवसुबंतत्वस्यवक्तुमुचितत्वादितितटस्थशंकांपरिहरति॥प्रत्य

यलक्षणेनापीति॥अपिरक्तशब्दार्थे॥एवंचराजपुरुषइत्यादावपिस्यानिवत्वेनैवराजेत्यस्यपदत्वमित्याशयः॥यद्वावार्तिकमतेप्र
त्ययलक्षणसूत्रस्यविध्यर्थत्वेनवर्णाश्रयइत्यस्यवर्णमात्रवृत्तिधर्माश्रयएवप्रवृत्यातन्मतेप्रत्ययलक्षणसूत्रेणसित्यिमार्गंक्यनिए
करोति॥प्रत्ययलक्षणेनापीति॥व्याख्यापूर्ववत्॥वार्तिकमतेलक्षणपदस्यवैयर्थ्यात्॥इदमापाततः॥तन्निमित्तकार्यस्येति॥प्रकृ
तिसंबंधिनइतिशेषः॥अतएवनरवनिर्भिन्नइत्यादावैसन॥तयाचपदसंज्ञायाःप्रकृतिप्रत्ययोभयसंबंधित्वेनप्रत्ययलक्षणसाध्य
त्वमित्यर्थः॥प्रत्ययस्यकार्यकोटिप्रवेशेनपदसंज्ञानिमित्तत्वाभावात्॥उक्तरीत्येति॥आनुमानिकस्यान्यादेशाभावाश्रयणेनेत्यर्थः
तथाचदीर्घाहन्सइत्यस्यादशार्यंयथासुपीतिरत्वनिषेधस्तथादेशेप्यानुमानिकस्यान्यादेशभावस्यसमुदायविश्रांततयाऽल्न
स्थानीतिनानलूविधाविनिषेधः प्रवर्ततइतिभावः॥यद्यपिराजेत्यादौसुलोपेदीर्घोनस्यादित्यपिशंकितंतथापिपरत्वाद्दीर्घ
स्यलोपात्पूर्वंप्रवृत्तिरितिसमाधानसंभवेनानुमानिकस्यान्यादेशभावाश्रयणेनसमाधानक्लेशस्यनोपयोगः॥दीर्घाहोनिदाघइत्यत्र
तुरुत्वस्यासित्थत्वात्पूर्वंलोपइतिआनुमानिकस्यान्यादेशभावाश्रयणक्लेशआवश्यकइतिविशेषः॥नचैवंचिन्मायांन्नातश्चित्रइत्यादौ
ङीप्प्रसंगः॥आनुमानिकस्यान्यादेशभावेआश्रीयमाणेऽलःस्थानित्वाभावात्॥यदिचस्यान्यवयवाल्वृत्तिधर्माश्रयकत्वेनान

ल्विधावि(नि)षेधइत्युच्यतेतदासप्रकृतेपिसमानइतिवाच्यं॥स्थान्यल्वृत्तीत्येतदंशेमात्रपदानिवेशेपिस्थान्यवयवाल्वृत्तीत्येतदंशे
तन्निवेशेनादोषात्॥अन्येतुस्थानिवदादेशइत्यत्रस्थानिपदंनिवर्त्यपरमेवलोकतएतत्सिद्धंतद्यथा॥लोकेयोयस्यप्रसंगेभवति
लभतेसोतत्कार्यीणीतिस्थानिवत्सूत्रस्थभाष्यस्वारस्येनप्रसंगिनएवस्थानिपदार्थत्वलाभात्॥स्थानमस्यास्तीतिस्थानीतिव्युत्पत्तेश्च
उत्तरसूत्रानुरोधाच्च॥तत्रहिणिलोपस्यस्थानिवद्भावायस्थानिपदंनिवर्त्यपरमेव॥अग्रहीत्विशिष्टहेषोनलमाश्रयतेइटंनामेति
स्थानिवत्सूत्रस्थभाष्येएवइत्यनेनलोपःपरामृश्यते॥भोभगोइतिसूत्रस्थंभाष्यंतदनुसारीस्थानिवत्सूत्रस्थःग्रहोलिटिदीर्घइत्यत्रेटए
वस्थानिर्त्वनाचइतिकैयटगंथश्चप्रौढिवादेनैवप्रावृतत्॥उक्तभाष्यादिविरोधात्॥बहुलस्यासित्वेश्च॥तथाहिवारिणीइत्यत्रहिवच
नत्वस्यस्थान्यल् वृत्तित्वेनातिदेशेनादेशेतदलाभे॥प्रश्न ह्यत्वानापत्तिः॥इकारग्रहणंतुहरीइत्यादौचरितार्थं॥अंतादिवत्सूत्रस्था
ल्मात्रवृत्तिधर्माश्रयकेविधावप्रवृत्तावप्यल्वृत्तिधर्माश्रयकेविधौप्रवृत्तेः॥किंचैवंसतिईणमित्यत्रदीर्घः॥वीगतीत्यत्रप्रश्लिष्ट
स्यगुणेउपेतीत्यत्रेङि·पररूपमितिपररूपं॥आदीध्येइत्यत्रएरनेकाचइतियण्॥उवेइत्युत्तमपुरुषेउवङादेशश्चनस्यात्॥धातु
त्वप्रत्ययत्वादीनांस्थान्यल्वृत्तित्वात्॥किंचराजेत्यादौनित्यत्वात्थलड्यादिलोपेदीर्घानापत्तिः॥एवंदीर्घाहोनिदाघेत्यत्रहलड्या

रिलोपेरत्वापत्तिः॥नचानुमानिकस्यान्यादेशभावाश्रयणेनासुपीतिनिषेधः॥अन्होयमान्हइत्यादौरत्ववारणायपदस्येत्यनुवृत्याऽ
नशब्दांतस्यपदस्यरत्वमित्यर्थावश्यकत्वेनदीर्घाहन्सुइत्यस्यादृणोरत्वस्याप्रसक्त्यातन्निषेधस्याप्यप्रवृत्यास्थानिवद्भावेनहल्
ङ्यादिलोपेजातेनिषेधस्यातिदेष्टुमशक्यत्वात्॥सावपिपदंभवतीतिपक्षेपिरत्वनिषेधयोःत्रैपादिकत्वेनलोपात्पूर्वमप्रवृत्तेः॥किं
चानुमानिकस्यान्यादेशभावंगीकारेपिश्रोतस्यान्यादेशभावस्यत्यागाभावेनश्रोतस्यान्यूल्वृतिसुस्वप्रयोज्यसुबंतत्वरत्वनि
षेधयोरल्विधित्वेनहेरामहेदीर्घाहोनिदाघेत्यादावनापत्तिः॥तदेतदभिप्रेत्योच्चारणकालेपःश्रुतःसस्थानित्वेनाश्रीयतेनतुप्रति
पत्तिकालइतिमन्यतेइतिकैयटेनोक्तंभोभगोइतिसूत्रे प्रत्ययलक्षणेनापीत्युक्तमप्ययुक्तं पंचसप्तराजपुरुषइत्यादौप्रत्यय
लक्षणेनपदत्वमित्यस्यप्रत्ययलोपेप्रत्ययलक्षणमितिसूत्रस्यभाष्येग्रंथसंदर्भलभ्यस्यानुपपत्तेः॥उक्तभाष्यप्रामाण्येनास्मन्मते
लक्षणपदेनहिप्रत्ययस्यानिकमैसादिकमेववार्यतेनतुपदत्वादिकमपितथासतिनखनिर्भिन्नइत्यादावैसादेरिवपंचेत्यादौप
दत्वस्याप्यनापत्तिः॥प्रत्ययलोपेप्रत्ययनिमित्तकमेवकार्यंभवतिनतुतदुद्देश्यकमितिभवन्मतेनियमपर्यवसानादित्याहुःतन्नु
वर्तिपदार्थस्यतरबर्थप्रकर्षेणान्यपदार्थेनचयुगपदन्वयेपरत्वात्सरूपितरोबहुव्रीहौलघुतरप्रयत्नइतिस्यादतआह॥अन्यपदार्थ

संबंधोत्तरमिति॥तथाचवार्तिकं॥पूर्वपदार्थातिशयेआतिशायिकेकृतेबहुव्रीहिःसूक्ष्मवस्त्रतरादयर्थइतिपूर्वविप्रतिषेधेनेतित
द्भावप्रदर्शनंकैयटेनकृतं॥पूर्वविप्रतिषेधेप्रमाणंतुलघुप्रयत्नतरइतिनिर्देशएव एतन्मतेतुअन्यपदार्थसंबंधोत्तरमेववर्त्तिप्र
दार्थातिशयविवक्षाभिधानस्वाभाव्यात्॥तेनसूक्ष्मवत्सतरादिसिद्धिः॥अत्रापिप्रमाणंलघुप्रयत्नतरइतिनिर्देशः॥अत्रकैयटोक्त
मेवयुक्तं॥वृत्तपदार्थेविशेषणान्वयकल्पनाभावात्॥वर्त्तिपदार्थप्रकर्षविवक्षयेति॥शक्यतावच्छेदकगतस्यैवशक्यतावच्छेदक
तावच्छेदकगतस्यापिप्रकर्षस्यतरबर्थत्वादितिभावः॥ ॥ओतोगा॥ ॥साहचर्यादिति॥ ॥यद्यपिस्मृतावच्युतेत्यत्रव्योरितिल
घुप्रयत्नेवकारेकर्तव्येस्थानिवद्भावान्नवकारःपदांतः॥पूर्वत्रासित्थेनस्थानिवदित्यस्यपदचरमावयवातिरिक्तविषयकत्वस्यो
क्तत्वात्॥तथाचसाहचर्याश्रयणस्यस्मृतोवच्युतेत्यत्रनोपयोगः॥तथापिजनानवतीतिजनौस्तस्यापत्यंजनावपत्यमित्यादौधा
त्ववयववकारस्यग्रहणवारणायवकारसाहचर्यस्यावश्याश्रयणीयत्वमित्यभिप्रायेणेदं॥वस्तुतोऽयुक्तमेतत्॥स्मृतोवेत्यत्रैव
एतेर्विचिरोरनयनमवनयनमित्यत्रधात्ववयववकारस्यसंभवात्॥एवंनयतेर्विजंतस्यानयनशब्देनसमासेधात्ववयववकार
संभवोबोध्यः॥स्मृतोवच्युत्तेति॥स्मृतांवेतीतिस्मृतोवीस्तमाचष्टइत्यर्थेणिजंतादिविरूपं॥स्थानिवद्भावस्तु॥लोपस्यपदचरमा

नवयवत्वेनपूर्वत्रासित्येनेत्यस्यप्रवृत्तेरितिभावः॥वस्तुतईदृशानामभिधानेदृढंमूलंनपश्यामः॥गार्ग्यमुतेरिति॥शाकटायनम
तेएवलघुप्रयत्नयोर्विधानात्गार्ग्यमतेतदभावात्॥इत्याद्यनुवृत्तेरिति॥लोपःशाकेत्यत्र नचशाकल्पभिन्नमतेलोपोनेतिस्मृत्यं
तरानुसंधानेगार्ग्यमतेलोपाभावापत्यागार्ग्यः स्वस्मान्मतात्प्रच्युतःस्यादितिवाच्यं॥शाकल्पभिन्नो योगार्ग्यभिन्नस्तन्मतेलोपोने
तिस्मृत्यंतरानुसंधानकल्पनोपपत्तेरित्याशयात्॥तदनुवृत्तिरिति॥भोइत्याद्यनुवृत्तिरित्यर्थः॥हलिसर्वेषां॥अपूर्वाल्लघुप्रय
त्नइति॥शाकटायनमतेएवलघुप्रयत्नविधानेनशाकल्पमतेतदभावादितिभावःप्रकरणेप्रकरणमस्तित्वंनयोगेयोगइतिपक्षेतुनायं
दोषः॥तद्धादिति॥वस्तुतस्तुलोपःशाकेत्यस्याभावेहलिसर्वेषामित्यस्यप्रवृत्त्यादोषाभावात्॥अयंप्रयासोव्यर्थएव॥फलाभा
वाच्चेति॥वृक्षवृक्करोतीत्यादावशीत्यनुवृत्याऽस्याप्रवृत्तिः॥वृक्षवृहतीत्यादेस्त्वनभिधानं॥हयोरपिवानभिधानमितिभावः॥नि
र्दीरिति॥सुपिचेत्यत्रतदंतविधौदीर्घानापत्तेरितिभावः॥निष्ठेत्यादाविति॥रदाभ्यांपरस्यनिष्ठातस्ययस्तकारइत्यर्थेदषतीर्णे
त्यादौधातुतकारस्यततःपूर्वदकारस्यचनत्वापत्तिरितिभावः॥वर्त्तिपदार्थस्यवृत्यघटकविशेष्यान्वययोगान्नतदंतविधिरि
तिकेचित्॥सप्तमीस्थइत्यादाविवेतदंतविधिप्राप्तेरित्यन्ये॥नलुमतेतिनिषेधादिति॥तत्रांगपदंपूर्वोपलक्षणं॥रेफविधान

सामर्थ्यात्त्रिपाद्यामपिप्रवृत्तिरितिभावः॥ननुअहन्सुपिरङ्तीत्येवन्यासोस्तुलाघवादितिचेन्नगुरुन्यासेनक्वचिदसुप्पिरुत्व
कल्पनात्॥तदेतत्यज्यते॥रूपरात्रिरघंतरेष्विति॥अकारांतेपरत्वादतोलोपस्येकारोकारांतेचगुणस्यप्रवृत्यानदोषः॥चचाद्रेत्वा
दीचेति॥नन्वंतरंगत्वाद्दीर्घेऽभ्यासह्रस्वत्वेनसित्थमितिचेन्न॥ऊखतुरित्यादावपिसवर्णदीर्घह्रस्वापत्तेः॥यदिचतत्रवार्णादंग
मितिपूर्वंह्रस्वस्ततोदीर्घस्तर्हिप्रकृतेपिसमःसमाधिः॥विप्रतिषेधेपरंकार्यम्॥आवश्यकतयेति॥अकृत्रिमाभावकस्याभावक
ल्पनायोगादितिभावः॥तद्विघ्नोस्यविषयइति॥ननुनित्यांतरंगादीनांज्ञापकन्यायाभ्यांबाधकत्वंपरस्यतुविप्रतिषेधेपरमिति
प्रत्यक्षवचनकृतंत दितिप्रत्यक्षवचनस्यज्ञापकन्यायादितःप्राबल्यादिदमयुक्तमितिचेत्सत्यं॥तुल्यबलविरोधस्यविप्रतिषेध
शब्दार्थत्वांगीकारेणादोषात्॥तदेतदभिप्रेत्यात्रसूत्रेभगवताभाष्यकृतोक्तं॥द्वौप्रसंगोयदान्यार्थौभवतएकस्मिंश्चयुगपत्प्राप्नु
तःसविप्रतिषेधइति॥तत्रान्यार्थावित्यनेनापवादव्यावृत्तिः॥युगपत्प्राप्नुतइत्यनेनांतरंगव्यावृत्तिः॥तत्परिपरस्मात्पूर्वमेवप्राप्नुते
नतेनयुगपत्॥इदंनित्यव्यावर्तकस्योपलक्षणंविशेषणं॥कैयटस्तुअत्रसूत्रेकार्यमित्यर्हार्थेकृत्यःकरणार्हेकार्यतुल्यबलंचकर
णार्हमितिनित्यानित्योत्सर्गापवादांतरंगबहिरंगेषुअस्यसूत्रस्याव्यापारइत्याह॥स्वस्वनिमित्तानंतर्यासंभवइति॥निमित्तंविधेय

विशेषमितिभावः॥सकृद्गताविति॥यद्वाधितमित्यनेनान्वेति॥गतौयुगपत्प्राप्तेपुनःप्रसंगविज्ञान बीजमाह॥यद्वेत्यादिना॥लक्ष्य
प्रेष्ययोरितिवस्तुतस्तुभृत्यसदृशंलक्ष्यंप्रेषणक्रियासदृशीसंस्कारक्रियापर्यायेणकार्यकरणस्थानापन्नंचशास्त्रविहितकार्यस्वी
कारःतथाचयथातुल्यबलयोरेकोयुगपत्प्रेषितोभृत्योपूर्वेनानाद्यधिकरणकत्वेनयुगपदसंभविकार्यद्वयंनकरोतितथातुल्य
बलयोःशास्त्रयोःसंस्कार्यलक्ष्ययुगपदसंभवितद्विहितंकार्यद्वयंनभजतीत्यर्थः॥सतयोःपर्यायेणकार्यकरोतिद्वत्यंतोभाष्यग्रं
थस्तुविभिन्नकालिकाविरोधिकार्यद्वयंतुलक्ष्यंभजत्येवेतिप्रसंगाद्वक्तुंतत्रदृष्टांतप्रदर्शनपरंयुगपदसंभवस्यतत्राभावेनदृष्टां
तासंगतेः॥इहभवतादोहेतूपदिष्टौतृजादिभि स्तुल्यंप्रयायः प्राप्नोतीतिअप्रतिपत्तिर्वोभयोस्तुल्यबलत्वात्॥ ॥ ॥ ॥
॥ ॥ ॥ ॥तंद्यथाद्वयोस्तुल्यबलयोरेकः प्रेष्योभवतिसतयोःपर्यायेणकार्यंकरोति॥यद्यतमुभौयुगपत्प्रेषयतइत्य ग्रिमभा
ष्यंथासंगतेश्च॥पुनर्धिभवतीति॥इदमयुक्तं॥स्थानिवत्सूत्रस्थभाष्यविरोधात्॥तत्रहिभिंत्तादित्यत्रपरत्वात्तातङि·धिभावमाशं
क्यसकृद्गतिन्यायेनसमाहितं॥किंचैवंभिंत्तादितिरूपस्यविलयापत्तिः॥अत्रकश्चिद्विकल्पशास्त्राणामभावेपितात्पर्यस्वीकृत्ये
तातङि·पुनर्द्धिर्भवतीत्यस्यतातङ·भावेपुनर्त्तिर्भवतीत्यर्थमुल्काऽत्रतातङ्·धिभावयोरित्याद्यग्रिमग्रंथस्तुविकल्पघटकता

तङ्-विधिनाधिभावस्यविरोधोपपादनायेत्याह॥तत्तुच्छम्॥विकल्पशास्त्राणामभावेतात्पर्यंहियस्येतिसंघातग्रहणंचेत्क्य
स्यविभाषायांदोषोभवतियदालोपस्तदासर्वस्यलोपःयदाःलोपस्तदासर्वस्यालोपःइतियस्यहलइतिसूत्रस्यभाष्यानुरोधा
त्कल्प्यं॥तच्चभाष्यंसूत्रांतरस्थानेकभाष्यविरोधादेकदेश्युक्तिरितियस्यहलइतिसूत्रेविवरणेनव्यक्तं॥तथाचतत्रयथाव
दन्शून्यहृदयइवतद्विरुत्थंकथमत्रवदेत्॥पुनःप्रसंगोदाहरणंत्वीजतुरिति॥तत्रहिपरत्वात्संप्रसारणं॥यत्त्वेतदुदाह
रणंरक्त्वायामिति॥अत्रहिपरत्वादामिकृतेपुनःप्रसंगविज्ञानाद्याडितिपाठकेनोक्तंतत्तुच्छं॥निरवकाशत्वेनैवाम्प्रवृत्तेः
निरवकाशत्वेनबाधेपश्चादुत्सर्गप्रवृत्तेर्याडितिनकश्चिद्दोषः॥स्पष्टंचेदंनव्यग्रंथेषु॥ननुकार्यकालपक्षेतस्मिन्नितिपरि
भाषायाङ्-मोह्रस्वादचीत्यत्रतत्संस्कारार्थमुपस्थितायानिरवकाशत्वेनकथंतस्मादित्युत्तरस्येत्येतद्दाध्यत्वं॥नहितत्रोप स्थि
तयाविध्यंतरंसंक्रियतेयेनसावकाशत्वंस्यादित्याशंक्याह त्रिपादीस्थेनेति॥तथाचतस्याबाधोनामविधिशास्त्रेणानाकर्षण
मेवेतिभावः॥प्रदेशएवेति॥विधिदेशएवेत्यर्थः॥अत्रप्रमाणंतुसंज्ञाशास्त्रानुसंधानंविनाविधिवाक्यार्थबोधानिष्पत्तिः॥अथा
दिभ्यःपरेवप्रगृह्यसंज्ञेतिभाष्यंच॥यद्यपीयंपरिभाषेति॥नकार्यमितिशेषः॥एवंचेति॥प्रतिहृद्भिभावापन्नकार्यद्वयनिमि

त्तकत्वेचेत्यर्थः॥ यथोद्देशेवेति॥ परोक्षाक्रियेत्यादिवदर्थआद्यजंतमेतत्॥ नन्वसतिङ·मोहस्वादचीत्यत्रेतस्त्रत्यनापत्तिः तथाचोभयनिर्द्देशेपंचमीनिर्द्देशोबलवानितिभाष्यासंगतिरितिचेन्न॥ त्रिपादीस्थेनतयोराकर्षणेपिउक्तरीत्यात्रिपादीस्थत्वाभावेनविप्रतिषेधशास्त्रदृष्ट्यातयोरसित्थत्वस्यपूर्वत्रासित्थमित्यनेनबोधनासंभवेनतयोर्विषयेविप्रतिषेधेत्यस्यप्रवृत्तेर्निर्बाधत्वादित्याशयात्॥ इतिलोपेप्राप्तइतिनिर्मूलं॥ पूर्वत्रासित्थमित्यस्यापर्यालोचनदशायांबोध्यं॥ एतत्तदोः॥ प्रकृतिवदनुकरणमित्यतिदेशेनैकशेषमाशंक्याह॥अनुकार्येति॥ ॐ ॥ इतिस्वादिसंधिः॥ ॐ ॥अर्थवदधातुरप्रत्ययः प्रातिपदिकम्॥अर्थवदधातुरतिप्प्रातिपदिकमित्येवसूत्रैकार्यमस्तिवित्यारभ्यसुपःपकारेणप्रत्याहारः॥तस्थितग्रहणंचोत्तरत्रनकार्यं॥यदाऽर्थवदविभक्तिरधातुःप्रातिपदिकमित्यस्त्वितितन्न॥आद्येप्रत्यासत्तिन्यायाश्रयणेसिपःपकारेणप्रत्याहारापत्तेः॥व्याप्तिन्यायाश्रयणेतुकपःपकारेणतदापत्तेः॥द्वितीयेतुतत्रेत्यादौविभक्त्यंतत्वेनप्रातिपदिकत्वानापत्यातत्थितग्रहणस्यावश्यकतयानलाघवं॥आवर्तितेइति॥ स्वमतेप्रत्यपर्युदासाभावात्प्राचांमतेनेदं प्रत्ययस्ययत्रसंज्ञेति॥ धर्मिग्राहकमानबलादितिभावः॥ अन्येतुकृदतिङ·षः प्रत्ययस्तदन्तस्यसर्वविभक्तिरित्यादावपिनिषेधप्रवृत्तेरिष्टत्वेनायुक्तमेतत्॥अन्यथाव्यतिसइत्यादावेव

निषेधः प्रवर्तेत॥ षड्इत्यादावेव चेत्संज्ञाप्रवर्तेत॥ तस्मात्तत्थितांतस्यप्रातिपदिकसंज्ञाविधानेनात्रतदंतविधिः कल्प्यतइत्याहुः॥ मूलोक्तंप्रत्ययपर्युदासंप्रत्याख्यातुमाह॥ अत्रेत्यादिना॥ ऐत्संज्ञाफलभूतेति॥ इदंवस्तुस्थितिकथनंनतुअर्थवत्वप्रतिषेधघटकंफलाभावात्॥ अतएवशब्दरत्नेएतत्संज्ञाफलभूतेतिनदृश्यतइतिकेचित्॥ वस्तुतस्तुओदनंपचतीत्यादावोदनंपचेतिसमुदायस्यार्थवत्वेनप्रातिपदिकत्ववारणायैतत्संज्ञे ति॥ तत्समुदायस्यतिङ्रूपविभक्त्यपेक्षयाऽर्थबोधजनकत्वेपितदितरानपेक्षयाऽर्थबोधजनकत्वात्प्रातिपदिकंप्राप्नं॥ एतत्संज्ञेत्युक्तौतुएतत्संज्ञाफलभूतविभक्तीतरतिङपेक्षयैवार्थबोधजनकत्वात्तद्धारणंपंचेत्यस्यस्वातंत्र्येणप्रयोगार्हत्वाभात्॥ एतेनैतत्संज्ञाफलभूतेतिव्यर्थमेवशब्दरत्नेऽदर्शनादितिपाठकोक्तमपास्तम्॥ शब्दप्रयोजनानुरोधेनतस्यपूरणीयत्वात्॥ एवंचदेवदत्तस्यपुत्रइत्यत्रस्यपुत्रइतिसमुदायेषष्यर्थस्यपुत्रपदार्थेन्वयेनार्थवत्वेपिनप्रातिपदिकत्वंविभक्तीतरषष्ठीप्रकृत्यपेक्षयैबलीकेऽर्थबोधजनकत्वेनपरिष्कृतार्थवत्वाभावात्॥ समासग्रहणकृतनियमेनतुनास्यवारणंषष्ठ्याःस्वातंत्र्येणप्रयोगानर्हत्वात्॥ अत्रवदंति॥ एवंविधार्थवत्ग्रहणेखट्वशब्दस्यप्रातिपदिकत्वानापत्तिः॥ विभक्तीतरटावपेक्षयैवाखट्वशब्दस्यार्थबोधकत्वात्॥ टाद्विधानंत्वनियतलिं

गेचरितार्थं॥विभक्तीतरवाचकविवक्षणेपिएधांचकारेत्यादावेधामित्यस्यप्रातिपदिकत्वानापत्तिः॥चकारेत्येतदपेक्षयैवलो
केतस्यार्थबोधकत्वात्॥यदिविभक्तीतरोवाचकःप्रत्ययोविवक्ष्यतेतदापंचनावप्रियेत्यादौपंचनावेत्यस्यप्रातिपदिकत्वाप
त्तिःप्रियशब्दापेक्षयातस्यार्थबोधकत्वेपिप्रियशब्दस्याप्रत्ययत्वात्॥एवंप्रत्ययस्यापि॥यदिचविभक्तीतरत्वंस्वगतवृत्या
श्रयइत्युच्यतेतदाहरिष्वित्यादौप्रत्ययस्यप्रातिपदिकत्वापत्तिः॥प्रकृत्यपेक्षयातस्यार्थबोधकत्वेपिप्रकृतेरतादृशत्वात्॥
हारिद्रविणइत्यादौणिनंतस्यप्रातिपदिकत्वानापतिश्च॥तस्यस्वगतवृत्याश्रयाध्येत्रणपेक्षयैवार्थबोधकत्वात्॥यदिचविभ
क्तीतरत्वंस्वसमवेतसंज्ञाश्रयीभूतंतदिवक्ष्यते॥प्रियशब्दश्चस्वसमवेतसमाससंज्ञायश्रयः॥चकारेत्यंतुनतथा॥हरि
ष्वित्यादौप्रकृतिभागस्तुतथाविधपदत्वाश्रयइतिप्रत्ययस्यतदपेक्षयाऽर्थबोधकत्वेनप्रातिपदिकत्वव्यावृत्तिः॥एवंचकुंभ
कारेत्यत्रकारेत्यस्यनप्रातिपदिकत्वमितिस्त्रीप्रत्ययप्रकरणस्थशेखरविरोधोपि॥स्वसमेवेतसमासत्वाश्रयकुंभेत्येतदपेक्षये
वार्थबोधकत्वात्तथाचद्रष्टुंयातिभुक्त्वाव्रजतीत्यादौतुभुनंतादीनांप्रातिपदिकत्वसिद्धिः॥स्वनिष्ठार्थबोधकत्वप्रयोजकत्वे
स्यपातीत्यादेः स्वनिष्ठसंज्ञानाश्रयत्वादित्युच्यते॥तदाख्यात्वाकालकादावित्यादौख्यात्वेत्यादेःप्रातिपदिकत्वानापत्तिःतस्य

स्वगतसमासत्वानाश्रयकालाद्यपेक्षयैवार्थबोधकत्वात्एवंप्रार्द्धदित्यादेःप्रातिपदिकत्वानापत्तिः॥स्वगतसमासत्वाश्र
यत्रूढकाद्यपेक्षयैवार्थबोधकत्वात्॥किंचोत्तरसूत्रेपिएवंविधार्थवत्वस्यैवविवक्षणीयतयाप्रागुक्तसर्वपक्षेष्वपितस्थित
समासयोःप्रातिपदिकत्वानापत्तिः॥अलौकिकेप्रक्रियावाक्येएवप्रातिपदिकत्वस्यवक्तव्य त यातस्यलोकेसर्वथाऽर्थाबो
धकत्वादिति॥अत्रोच्यते॥अंतिमःपक्षएवसाधीयान्॥स्नात्वाकालकादौतुनदोषः॥समाससंज्ञार्थंस्नात्वादेःसुबंतत्वस्यावश्य
कतयाततःपूर्वमेवप्रातिपदिकत्वप्रवृत्तेः॥तस्यांचदशार्यांकालकादेःस्वगतसंज्ञानाश्रयत्वात्॥एवंमूलकेनोपदंशमित्यादा
वप्यदोषोबोध्यः॥मूलकेनेत्यादौसमाससंज्ञातः पूर्वंस्वगतसंज्ञानाश्रयत्वात्॥अलौकिकेप्रक्रियावाक्येतुस्वप्रकृतिकपरिनि
ष्ठितनिष्ठंईदृशार्थवत्वमारोप्यप्रातिपदिकत्वंनिर्वाह्यं यद्वाविभक्तीतरत्वंशास्त्रेयत्स्वप्रकृतिनिमित्ततयानाश्रीयतेतदेवप्र
गृह्यते प्रत्ययस्यप्रकृतिस्तथाविधापंचगवेतिसमासस्यचधनेतितथाविधमुत्तरपदेविहितसमासमुपजीव्यटचःप्रवृत्ते
स्तेनैधांखवद्भुत्क्षाहारिद्रविषणइत्यादौनषः॥चकारेतिंतिडंतस्यटापःव्रजतीतिंतिडंतस्याध्येत्रणश्चामंतादितिनिमित्त
तयाशास्त्रेऽनाश्रय णात्॥कर्मण्यणित्यस्यकर्मोपपदसंज्ञकंभवतिधातोश्चाणितिवाक्यार्थेनिमित्तीभावस्यानाश्रयणेपित

त्रोपपदंसप्तमीस्थमित्येतदेकवाक्यतयाकुंभेत्यादेःकर्मणोऽण्निमित्तत्तयाऽश्रयणमस्त्येवतस्मिंश्चसत्येववक्ष्यमाणःप्रत्य
यइतितदर्थात्॥तेनकारेत्यस्यनप्रातिपदिकत्वमितिस्त्रीप्रत्ययस्यशेखरोपपत्तिः॥वस्तुतस्तुसन्नियोगशिष्टन्यायेनैवतस्मिं
श्चसत्येववक्ष्यमाणःप्रत्ययइत्यर्थलाभेतत्रेत्यस्यतदर्थकस्यानाश्रयणेनकुंभेत्यस्यशास्त्रेननिमित्तत्वेनाश्रयणमितिस्त्रीप्र
त्ययस्यशेखरोऽसंगतएव॥गतिकारकोपपदानामित्यत्रोपपदग्रहणंसार्थकंदधिसेचावित्यादौदधीत्याद्युपपदस्यसुबंतेनस
मासश्चोपपद्यते॥तेनमूलकोपदंशमित्यत्रोपदंशमित्यस्यप्रातिपदिकसित्थिः॥प्रादीनामुपसर्गसंज्ञायांधातोर्निमित्तत्वेपिप्र
योगेऽनिमित्तत्वान्नदोषः॥तेप्राग्धातोरित्यत्रसंज्ञानियमपक्षाश्रयणात्॥नन्वेतत्संज्ञाफलभूतविभक्त्यपेक्षयालोकेऽर्थबोधज
नकत्वमित्येतावदेवास्तुकृतंनञ्द्वयप्रवेशेनेत्यतआह॥अहन्निति॥तथाचाधातुरित्यादिपर्युदाससार्थक्यायनञ्द्वयप्र वेश
इतिभावः॥नचनञ्द्वयप्रवेशोऽधातुरितिपर्युदासश्चमास्त्विति वाच्यं॥दधिपश्यराजपुरुषइत्यादौदधिराजेत्यस्यप्रातिपदिक
त्वानापत्तेः॥नचेतिनहीत्यर्थः॥यद्यप्यस्यापत्यमिर्व्यतिसइत्यादौकेवलप्रत्ययस्याप्युक्तार्थबोधकत्वमस्तितथाप्यादौन
त्थितांतत्वेनप्रातिपदिकत्वभागेवांत्यंतुप्रत्ययांतपर्युदासेनापिव्यावर्त्यम्॥तथाचप्रातिपदिकत्वालक्ष्यप्रत्ययांतपर्युदास

व्यावर्त्यैदृशार्थबोधकंनकिंचित्प्रत्ययसंज्ञकमस्तीतितात्पर्यं॥विद्युत्थानां॥प्रत्ययरहितानांकृत्तद्धितानामित्यादेःकृत्तद्धितानांके
वलानां॥प्रकृत्यसमभिव्याहृतानामर्थोलौकिकः॥लोकेप्रतीयमानइत्यर्थः॥प्राग्विभक्तेः॥विभक्त्युत्पत्तेःप्राक्॥तदंतस्य॥कृत्त
द्धितांतस्य॥तथेवार्थो॥लौकिकोऽर्थः॥नविघतइत्यत्रान्वयः॥एवंचकृत्तद्धितांतस्यविभक्त्यपेक्षयालोकेबोधजनकत्वेपिविभ
क्तीतरानपेक्षेत्यादियुक्तार्थवत्वंसुस्थमितिध्वन्यते॥लौकिकार्थप्रत्यासन्नत्वंचकृत्तद्धितांतार्थस्यविभक्तीतरानपेक्षयाप्रतीय
मानत्वात्॥विभक्त्यंतार्थोहिलौकिकः॥सर्वथेतरनैरपेक्ष्येणलोकेप्रतीयमानत्वात्॥कृदंतार्थस्तुविभक्तिमात्रापेक्षयाप्रतीय
मानत्वात्तत्प्रत्यासन्नः॥कृत्तद्धितार्थस्तुस्वप्रकृतिविभक्त्युभयापेक्षयेवकृदादेःप्रतीयमानत्वादिप्रकृष्टइतिबोध्यं॥तत्ता मर्थ्या
दित्येवेति॥अधातुरितिपर्युदासेनपूर्वसूत्रेऽर्थवत्वलाभात्॥कृदादीनांचानर्थकानामप्रसित्येरितिभावः॥सामान्यतोऽर्थवत्व
ग्रहणेइति॥उत्तरसूत्रेविशिष्टार्थवत्वस्यैवोपयोगेनार्थाधिकारानुरोधात्पूर्वसूत्रेपितादृशार्थवत्वग्रहणेन्यायतःप्राप्तेपितत्प
रित्यागेनसामान्यतोर्थवत्वग्रहणेइत्यर्थः॥सूत्रद्वयेउक्तार्थवत्वग्रहणेफलमाह॥अतएवेति॥अतएवेत्यारभ्यनाप्युत्तरसूत्रेणे
त्यंतमेकंवाक्यं॥प्रातिपदिकत्वेटाबापतिरितिवाक्यांतरं॥तत्प्रत्याख्यानेइत्यस्यचनानेनप्रातिपदिकमित्यनेनैवान्वयः॥प्रत्य

यांतपर्युदाससत्वेततएवपंचनावेत्यस्यप्रातिपदिकत्वंनेत्युक्तविधार्थवत्वस्यात्रसूत्रेग्रहणेनेदंसंभवतीतितत्प्रत्याख्यानेइत्यु
क्तं॥अतएवेत्यस्यसूत्रद्वयेउक्तविधार्थवत्वग्रहणादेवेत्यर्थः॥अस्मिन्सूत्रेईदृशार्थवत्वग्रहेपंचनावेतिप्रयोजनोपन्यासः॥उ
क्तविधार्थवत्प्रत्ययांतस्यचेत्प्रातिपदिकत्वंतर्हितथाविधतस्तिंतस्येवेतिनियमाभिप्रायेणपंचनावेत्यस्योक्तविधप्रत्ययां
तत्वाभावेनोक्तनियमाप्रवृत्तावर्थवत्सूत्रप्राप्तिसंभवात्॥प्रत्ययांतसामान्यविषयेनियमेविज्ञायमानेत्वत्रसूत्रेईदृशार्थवत्वग्रह
णेनेदंप्रयोजनम्॥प्रत्ययांतस्यचेत्प्रातिपदिकत्वंतर्ह्युक्तविधार्थवत्तस्तिंतस्येवेतिनियमेनेतत्सूत्रविहितप्रातिपदिकत्वस्यव्या
वृत्तिसंभवात्॥बहुश्रेयसीप्रियतिसेत्यादौनदीत्वतिस्राद्यर्थमुपसर्जनपदार्थेपिस्त्रीत्वभानस्यांगीकर्तव्यतयाटाबापाद्योप
त्तिः॥स्वार्थविशिष्टार्थांतरोपसंक्रांतत्वमुपसर्जनत्वंतच्चबहुकुरुचरेत्यादावेवपंचनावेत्यादावपीतिडीयोऽप्राप्त्याटाबापादि
तः॥डीबापत्तिरितिपाठेतुयस्मान्डीप्कर्त्तव्यस्तदर्थंप्रतिटिदर्थायाविशेषणस्वरूपमनुपसर्जनत्वमुपपादनीयं भिद्धिदि
त्यादावधातुरितिपर्युदासेनप्रातिपदिकत्वाप्राप्तौरुद्ग्रहणस्यतद्विधानार्थत्वेनियामकत्वासंभवात्तस्थितग्रहणस्यतदुक्तिः॥य
त्त्वस्यापत्यमित्यादौप्रत्ययपर्युदासात्प्रातिपदिकत्वाप्राप्तौतस्थितग्रहणमपिविध्यर्थमेवनियमार्थं यदितुअड्सड्इत्यस्यांद

शयांप्रवृत्तंप्रातिपदिकत्वमेकदेशविकृतन्यायेन॥इरित्यत्रापिसुलभं॥प्रत्ययांतपर्युदासाभावेएवतत्थितग्रहणस्यनियमार्थत्व
प्रक्रमादप्रत्ययांतपर्युदासाप्रवृत्तेरित्युच्यतेतदाभिद्क्तिवित्यस्यांदशायांप्रवृत्तंप्रातिपदिकत्वंभिदित्यत्रापिसुलभमित्तिन
त्तुच्छं॥प्रत्ययपर्युदासस्यमूलतएवाभावेनप्रत्ययांतपर्युदासस्यचव्यर्थत्वेनशंक्यमानत्वेनत्वदुपन्यस्तशंकाडंबरस्यापरास्येषोधो
नुष्कस्यकंठाडंबरत्वात्॥किंचांतरंगत्वात्क्विपोलोपेऽधातुरितिपर्युदासेनभिदित्यादौप्रातिपदिकत्वंदुर्लभं॥अस्यापत्यमित्या
दौप्रातिपदिकत्वंविनासुबलुगेवनेतिमहद्वैषम्यं॥टाप्यक्षेगोस्त्रियोरितिह्रस्वस्तुनशंक्यः॥राजकुमारीपुत्रइत्यादावितद्धार
णसंभवात्॥नचैवंपंचनीशब्दस्याप्रातिपदिकत्वेनटजेवदुर्लभइतिवाच्यं॥समासांतविधौप्रातिपदिकाधिकाराभावस्यवक्ष्य
माणत्वात्॥नचसन्निपातपरिभाषयाटापडीपोर्वारणं॥द्विगुसंज्ञाद्वारोत्तरपदानंतर्यनिमित्तकस्यटचस्तद्विघातकत्वा
दितिवाच्यं॥कृन्मेजंतइतिसूत्रस्थभाष्यप्रामाण्येनरंपरयापितद्धितकत्वस्यग्रहणेपिसन्निपातलक्षणस्यसाक्षादेवग्रहणमित्या
शयात्॥अत्रडीबापाद्यमानोद्विगोरितिवादिट्टितिवाविहितोबोध्यः॥इतिदिगिति॥अन्येत्वर्थवत्वमत्रशक्तिलक्षणाद्योतनान्यत
मसंबंधेनार्थोपस्थितिजनकत्वं॥गोपीत्यादौडीषुत्पत्तेःपूर्वमेवप्रातिपदिकस्यलक्षणावश्यकत्वेनगोपेत्यस्यप्रातिपदिकत्व

सित्त्वयेलक्षणेति॥द्योतकनिपातसंग्रहायद्योतनेति॥नतुविभक्तीतरसमभिव्याहारानपेक्षयेतिपरिष्कृतमर्थवत्त्वंसित्त्वंत्व
न्वयव्यतिरेकाभ्यामित्यारभ्यवर्णितार्थवंतोऽन्वय व्यतिरेकाभ्यामित्यंतेनेतत्सूत्रस्थभाष्यग्रंथसंदर्भेणास्मदुक्तार्थव
त्वस्यैवार्थवच्छब्दार्थत्वावगतेः॥अतएवभाष्येवर्णानामनर्थकानांप्रातिपदिकसंज्ञामाभूदित्यर्थवदित्युक्तं॥नतुप्रत्ययस्य
माभूदिति॥नन्वोदनंपचतीत्यत्रौदनंपचेत्यस्यदेतदत्तस्यपुत्रइत्यत्रपुत्रेत्यस्यदेवदत्तोगार्ग्येतिसमुदायस्यचप्रातिपदिक
त्वापत्तिः॥अन्वयव्यतिरेकाभ्यांप्रकृतिप्रत्ययादेरोदनंपचतीत्यादेश्चलोकेऽर्थबोधनवृत्तिकल्पनेपिओदनंपचेत्यादेःसमुदा
यस्यतत्कल्पनेमानाभावात्॥प्रत्ययपर्युदासस्तुनास्त्येवप्रत्ययस्यफलाभावेनैवप्रातिपदिकत्वाप्रवृत्तेः॥नचहरिष्विंत्यत्र
प्रत्ययस्यप्रातिपदिकत्वेऔत्सर्गिकैकवचनेचतस्यश्रवणापत्तिः॥तस्यसतिगमकएवोत्पत्तेः॥अतएवड्याप्प्रातिपदिका
दितिसूत्रेभाष्येतदधिकारस्यासत्वेप्रत्ययादेरौत्सर्गिकैकवचनापत्तिर्नापादितानचैवंधनंवनमित्यादावपिविभक्त्यनुत्पत्तावर्थवदितिव्यर्थमितिवाच्यं॥निपातस्यानर्थकस्यप्रातिपदिकत्वविधानेनार्थवत्सूत्रस्थशेषभाष्यप्रामाण्येनचानर्थकप्राप्तिपू
र्वकादेकवचनोत्पत्त्यभ्यनुज्ञानात्॥नचकांडेइत्यादेरप्रत्ययस्यप्रातिपदिकत्वेह्रस्वापत्तिः॥नपुंसकेवर्त्तमानत्वाभावेनादे

षात्॥स्पष्टंचेदंभाष्ये॥नचव्यपदेशिवद्भावेनप्रातिपदिकावयवसुव् लुगापत्तिः॥सुप्कार्यंत्वलुक्समासेचरितार्थमितिवाच्यं
धातुसाहचर्येणमुख्यावयवएवसुब्लुक्प्रवृत्तेः॥नचोपगवयतीत्यादावणोणिजापत्तिः॥उपग्वर्थेनैकार्थी भूतत्वेनाणर्थ-
मात्रस्णिजर्थेनान्वयायोगात्॥उत्तरसूत्रेतुशब्दाधिकाराश्रयणेनप्राशस्त्येमतुपाप्राशस्त्यार्थवर्त्वविवक्षितं॥तच्चोपयु
पस्थितयोरर्थयोरन्वयबोधजनकत्वं॥एकार्थी भावयत्वंवा लौकिकार्थप्रत्यासन्नत्वमपिलौकिकार्थसदृशत्वं लौकिका
र्थायथायोग्येतरान्विता सदृशत्वं॥पंचगवइत्यादौतुतत्थितांतत्वेनप्रातिपदिकत्वेपिनटाप्॥स्वार्थिकानांक्वचित्प्रकृतितोलिं
गवचनातिवृत्याऽर्थनावमित्यादाविवक्लीबत्वाश्रयणेनादोषात्॥विशेषणपदार्थस्त्रीत्वस्यानभ्युपगमाच्च॥प्रियतिसेत्यादौतुभा
ष्यप्रामाण्येनभीतपोर्विकंस्त्रीत्वमादायतिस्त्रादेशः॥विभक्तीतरेत्या द्युक्तार्थवत्वंतुगुरुतरमनेकदोषदुष्टंच॥अर्थवदितितु
धनंवनमित्यादौवर्णानांप्रातिपदिकत्ववारणायौत्सर्गिकैकवचनोत्पत्तेरुक्तदिशाऽपादयितुंशक्यत्वात्॥अथवाहरिषुकरो
षीत्यादौषुकरोषीतिसुप्त्रिडं·तसमुदायस्यानर्थकस्यप्रातिपदिकत्ववारणायतत्॥तस्यप्रातिपदिकत्वेतुसुपोधात्वितिलुगाप
त्तिः॥समासग्रहणकृतनियमेनतुनवारणं॥पूर्वभागस्याऽपदत्वात्॥तदेतदभिप्रेत्योक्तंभाष्येऽर्थवदितिव्यपदेशायेति॥विशि

ष्संज्ञिनोनिर्द्देशायेतितदर्थः॥वर्णानांचमाभूदित्युत्तरभाष्यंतुप्रत्युदाहरणदिक्प्रदर्शनपरं॥दशदाडिमानीतिनिरर्थकपद
समुदायस्तुनव्यावर्त्यः॥समासग्रहणकृतनियमेनेवव्यावर्त्तनात्॥नचार्थवत्तांयःसमुदायोर्थवान्सएवनियमव्यावर्त्यइति
वाच्यं॥व्यावर्त्यसमुदायस्यार्थवत्वविशेषणवैयर्थ्यात्॥भाष्येनुदशदाडिमानीतिपदसमुदायस्यानर्थकस्यप्रातिपदिकत्व
माशंक्यानर्थकत्वेनपरिहृत्यततोदेवदत्तगामभ्याजशुक्ला मितिसार्थकवाक्यस्यतदाशंक्यसमासग्रहणकृतनियमेनवा
रितं॥नत्वर्थवदित्यस्यतद्व्यावर्त्ततयाप्रदर्शितं॥समासग्रहणकृतनियमस्यासाधारणंप्रयोजनंप्रदर्शयितुमेवानर्थकसमुदा
यस्यार्थवदित्यनेनव्यावृत्तिः प्रदर्शिता॥नतुतस्यतदेवव्यावर्त्यमित्यभिप्रेत्य॥अप्रत्ययइतितुप्रसज्यप्रतिषेधः॥तेनकांडे
हराविन्यादौपूर्वीतवत्वेनप्राप्तस्यापिप्रातिपदिकत्वस्यनिषेधसिद्धिः॥अन्य थाप्रतिषेधस्यशास्त्रविहितत्वाभावेनस्यानि
वर्त्वांतवत्वयोरप्रवृत्तौप्रातिपदिकत्वेलुगापत्तिः॥शास्त्रतात्पर्यविषयस्यापिशास्त्रीयत्वेतुनमानं॥अन्यथाऽज्झिन्मेऽयादे
शस्यापिशास्त्रतात्पर्यविषयत्वेनतस्मिन्नपिस्यानिवद्भावापत्तौनायकइत्यादावयाद्यनापत्तिः॥अतएवप्रसज्यप्रतिषेध
एवब्रह्मबंधूरित्यादौप्रातिपदिकत्वंनस्यादित्युक्तंभाष्येनपर्युदासे॥अथवापुनरस्तुपर्युदासइतिभाष्यंतुप्रौढिवादपरंअ

न्यथाकांडेइत्य त्रह्रस्वस्यकथंचिद्वारणेपिसुपोधात्वितिलुकः प्रसंगात्॥अंतादिवत्वयोरेकत्रार्थेऽनाश्रयणेनोभयतआ
श्रयणेइतिनिषेधाप्रवृत्तेः॥तस्यव्यपवर्गविषयत्वाच्च॥अस्योदाहरणंत्वव्युत्पतिपक्षेघटः पटइत्यादि॥व्युत्पत्तिपक्षेतुबहुपट
वःपरमगार्ग्यायणःशिवभागवतःराजकुमारीश्रितइत्याद्युदाहरणं॥गार्ग्यभगवत्शब्दाभ्यांसुप्फगण्प्रवृत्त्याशिवपरमै
त्येतत्सहितस्यातत्थितांतत्वात्राजन्ड·सकुमारीअमित्यस्यांदशायांषष्ठीतत्पुरुषयोर्द्वितीयातत्पुरुषयोर्युगपत्प्रवृत्त्यास
मुदायस्यासमासत्वात्॥इत्याहुः॥कृत्तत्थितसमासाश्च॥चक्रपाण्युक्तदूषणमुत्थर्त्तुमाह॥एतेनेति॥साजात्यप्रदर्शनमात्रा
भिप्रायकत्वेनेत्यर्थः॥अर्थाननुगमेपिशब्दानुगमोस्त्येवेत्याशंक्याह॥शब्दानुगमस्येति॥अर्थस्येवनियमशरीरेनिवेशादिति
भावः॥व्यवच्छेद्याननुगमेपीति॥संग्राह्यस्येवानुगमः॥यथासास्नादिमत्वंगोर्लक्षणमित्यत्रसंग्राह्याणांसकलगोव्यक्तीना
मनुगमः॥व्यवच्छेद्यंमहिष्यादिकंतुनकोप्यनुगमयति॥यथाचभगवान्याणिनिःसंग्राह्यान्साधुशब्दानेवानुगमयतिनासाधु
शब्दानितिभावः॥अपास्तमिति॥साजात्यप्रदर्शनार्थमेवयत्रसंघातइतिमूलस्यप्रवृत्तत्वेनानुगमस्यसंभवेप्यनुपयोगेपिक्षत्र
भावादितिभावः॥वस्तुतोरावपिस्थूलदृश्यानी॥तथाहि॥पदसंस्तकपूर्वभागघटितत्वस्यअनुगमरूपस्यसंभवात्॥गामानये

त्यादेरिवबहुपटवइत्यादेरपिप्रातिपदिकत्वाभाववारणायव्यवछेद्यानुगमस्यावश्यकत्वाच्च॥व्यवछेद्यानुगमस्यासंभवम
नुपयोगंचवदन्चक्रपाणिःस्कूलदृश्वा॥तदेततद्वयमभ्युपेत्यसाजात्यप्रदर्शनार्थत्ववदन्नवोतिस्कूलदृश्वा॥यत्तच्छब्दा
र्थयोरननुगमेसाजात्यस्यैवासंभवात्॥समासवाक्ययोरेकधर्मवत्वंहिसाजात्यं॥व्यवछेद्यानुगमस्यानावश्यकत्वेसाजात्य
प्रदर्शनानुपयोगाच्च॥ननुवाक्यसंज्ञावारणायार्थवत्समुदायानामितिनियमशरीरमुत्काबहुपटवइत्यादौदोषमाशंक्यसुबं
तानांसमुदायस्यसमासग्रहणंनियमार्थमित्युक्तंभाष्येनतुस्वातंत्र्येणप्रयोगार्हेतिविशेषणेनपूर्वोक्तनियमशरीरस्थापित
मित्याशंक्याह॥भाष्येसुबंतानामित्यनेति॥तथाचसुबंतानामितिभाष्येणपूर्वोक्तनियमशरीरेस्वातंत्र्येणप्रयोगार्हेतिविशे
षणंदेयमित्युक्तंभवतीतिभावः॥भेदेष्टथक्प्रयोगेक्रियमाणेयाऽकांक्षातन्मूलकोयःसंसर्गःपरस्परमन्वयइत्यर्थः॥भा
ष्यासंगतिःस्पष्टैवेति॥इदमयुक्तं॥तस्मितांतत्वप्रयुक्तप्रातिपदिकसंज्ञायास्तदादिनियमाश्रयणेनवारणेप्यर्थवत्सूत्रेणत
स्यादुर्वारत्वात्॥किंचतदादिनियमाभावेदेवदत्तोगार्ग्येतिसमुदायस्यतस्मितांतत्वेनप्रातिपदिकत्वमापादितंभाष्ये॥तस्
नींचनसमासग्रहणस्यनियमार्थत्वं॥समासस्यप्रत्ययांतत्वात्॥तदादिनियमस्यचाभावात्॥किंतुविध्यर्थमेव॥तथाचदे

वदत्तोगार्ग्येतिसमुदायस्यसूपपन्नंप्रातिपदिकत्वापादनं॥ किंचकुंभकारेत्यादिसमासेउत्तरभागस्यस्वातंत्र्येणप्रयोगार्ह
त्वाभावेनमुक्त्वीकृत्येत्यादौक्त्वस्तियोगेएवश्चेःसाधुत्वात्क्त्वस्तीन्विनामुक्त्वीत्यादिपूर्वभागस्यस्वातंत्र्येणप्रयोगार्हत्वाभा
वेनचपटुपटुरेकैकमित्यादेइतिदिष्टसमासत्वमाश्रित्यप्रातिपदिकत्वस्यवक्तव्यतयातद्घटकपूर्वोत्तरभागयोःस्वातंत्र्येण
प्रयोगार्हार्थकत्वभावेनचस्वातंत्र्येणप्रयोगार्हार्थवत्पूर्वोत्तरभाग कत्वंनसमासमात्रेस्तीतिसमाससाजात्येननियमशरीरेना
यंधर्मःप्रवेष्टुंशक्यः॥एवंपंचगवधनइत्यादिसमासेपंचगवेतिपूर्वभागस्यनस्वातंत्र्येणप्रयोगार्हत्वं॥ किंचैधामासमूल
केनोपदंशइत्यादिवाक्येऽर्थवत्सूत्रेणप्रातिपदिकत्वंदुर्वारं॥एधामासेत्यनयोःपरस्परपरिहारेणोपदंशमित्यस्यमूलकेने
त्येतत्परिहारेणप्रयोगार्हत्वाभावेनोक्तनियमेनाव्यावृत्तेः॥त स्मात्षष्ठीनिर्देशादिभिर्येसुबंतानांसमासाविहितास्तदेकवा
क्यतापन्नंयत्कृत्तद्धितसमासाश्चेतितत्सुबंतानांसमुदायस्यसमाससंज्ञानियमपरं॥ तेननीलोघटइत्यादेःसमुदायस्य
प्रातिपदिकत्वव्यावृत्तिः॥नचैवंगवित्ययमाहेत्यादौदोषः॥गवितीत्यस्यप्रातिपदिकत्वेपिसत्यभावात्॥गवित्ययमितिस
मुदायस्यतुसुबंतसमुदायत्वेनैववारणात्॥देवदत्तोगवित्याहेत्यत्रतुदेवदत्तोवित्यस्यनप्रातिपदिकत्वंपरस्परानन्वयेना

नर्थकत्वात्॥अनुकार्यानुकरणयोर्भेदविवक्षायाश्चवक्ष्यमाणत्वेनगवित्यस्यासुबंतस्यासाधुत्वाच्च॥नन्वेवमपिवृत्रअहन्निति
समुदायस्यप्रातिपदिकत्वंदुर्वारं॥सुबंतसमुदायत्वाभावेनोक्तनियमेनाव्यावृत्तेरितिचेन्न॥जहिकर्मणेत्येतदेकवाक्यताप
न्नेनानेनसुप्तिङंतसमुदायस्यापिप्रातिपदिकत्वनियमनात्॥नन्वेवमपिपचतिभवतीत्येतत्समुदायस्यप्रातिपदिकत्वंदुर्वा
रं॥उक्तनियमहन्याविषयत्वादितिचेन्न॥आख्यातमाख्यातेनेत्येतदेकवाक्यतापन्नेनानेनतिङंतसमुदायस्यापिप्रातिपदि
कत्ववारणात्॥तदेतदभिप्रेत्यार्थवत्सूत्रेभगवताभाष्यकृतोक्तं॥तुल्यजातीयस्यनियमोयथाजातीयकानांचसमासःसुबंता
नांचसमासःसुप्तिङ्समुदायस्यतर्हिप्राप्नोति॥सुप्तिङ्समुदायस्यापिप्रातिपदिकसंज्ञाऽरभ्यते।जहिकर्मणेति॥सानियमा
र्थाभविष्यति॥तिङ्समुदायस्यापितर्हिप्राप्नोतितिङ्समुदायस्यापिप्रातिपदिकसंज्ञाऽरभ्यते॥आख्यातमाख्यातेनेति॥सा
नियमाऽर्थाभविष्यतीति॥नन्वेवमपिदेवदत्तस्यपुत्रइत्यत्र पुत्रइत्यस्यओदनंपचतीत्यत्रओदनंपचेत्यस्यअजांगमय
तीत्यत्राजांगमीत्यस्यप्रातिपदिकत्वंस्यात्॥नचाद्येविभक्तीतरदेवदत्तेत्यपेक्षेयं चैतत्संज्ञाफलमूतविभक्तीतरतिङ्पे
क्षयार्थबोधकत्वेनैतत्संज्ञेत्यादयर्थवत्वाभावान्नप्रातिपदिकत्वमितिवाच्यं॥ईदृशार्थवत्वस्यभवद्भिरनंगीकारात्॥एवंभूतस्ता

यामित्यस्यप्रातिपदिकत्वंदुर्वारं॥भूइत्यस्यसुप्तिङंतभिन्नत्वेनोक्तनियमत्रयाविषयत्वात्॥एतेनकटप्रभृतीणामित्येतदेकवा
क्यतापन्नेनकृत्तद्धितेत्यनेनधातुसुबंतसमुदायस्योपपदमतिङंत्येतदेकवाक्यतापन्नेनचानेनसुबंतसुप्तिङंभिन्नप्रत्ययांत
समुदायस्यप्रातिपदिकत्वनियमा न्नदोषइतिपरास्तं॥देवदत्तस्यपुत्रइत्यादौदोषानिवारणाच्चेतिचेत्सत्यं॥प्रकृतिप्रत्यय
योरन्वयव्यतिरेकाभ्यांपदवाक्ययोश्चलोकेऽर्थबोधजनकत्वेनवृत्तिकल्पनेपिस्पपुत्रइत्यादेस्तत्कल्पनेमानाभावेनवृत्त्याऽर्थ
वत्त्वाभावादेदादोषात्॥कटप्लूपाचककुंभकारादौतुसमर्थःपदविधिरितिशास्त्रप्रामाण्यादेववृत्तिमत्त्वं॥उपपदमतिङंत्येतदेक
वाक्यतापन्नेनकृत्तद्धितेत्यनेनसुबंतप्रातिपदिकसमुदायस्यप्रातिपदिकत्वनियमनात्नभूसत्तायामित्यत्रदोषः॥भेदविवक्ष
याभूइत्यस्यप्रातिपदिकत्वान्निर्देशात्सुबुत्पत्तिर्नेत्यन्यत्॥कटप्लूइत्येतदेकवाक्यतापन्नेनधातुसुबंतससुदायस्यप्रातिपदि
कत्वनियम नाच्च॥प्रकृतिवदनुकरणमितिप्लूइत्यस्यापिधातुत्वात्॥अतएवसुबनुत्पत्तिः॥नियमत्रयप्रदर्शनपरंभाष्यंतूपल
क्षणं नन्वेवमपिपचतिपचतितरामि तिङ्विवचनात्तरपितिङंतसमुदायसत्वेननियमव्यावर्त्यापातः॥एवंशिवभागवतइत्य
स्यापिनियमव्यावर्त्यतापातः॥सुबंतसमुदायसत्वादितिचेन्न॥तिङंतसुबंतमात्रघटितसमुदायस्यैवतेनव्यावर्त्तनात्॥एतेन

प्रत्ययांतानांसमुदायस्यचेत्प्रातिपदिकत्वंतर्हिसमासस्यैवेत्येकएवनियमोस्तुकृतंनियमन्नयेणेत्यपास्तं॥प्रत्ययांतमात्रघटि
तेतिपरिष्कारासंभवेनोक्तस्थलेपाचकिरित्यादौचदोषापत्तेः॥नचप्रकृतिप्रत्ययभावापन्नसमुदायविषयकएकएवनिय
मोस्त्वितिवाच्यं॥पचतितरामित्यत्रातिव्याप्तेः॥तरामित्यस्याप्रत्ययत्वात्॥यदिचप्रकृतिप्रत्ययभावानापन्नोयावर्थवंतावि
त्युच्यतेतदापिपचतिआमित्तिभागद्वयमादायतत्रात्तिव्याप्तिः॥उक्तभागद्वयस्यप्रकृतिप्रत्ययभावमापन्नत्वात्॥आमस्तिङं
ताप्रकृतिकत्वात्कथंचित्तत्रातिव्याप्तिवारणेउक्तधर्मद्वयस्यसमासमात्रवृत्तित्वासंभवः॥बहुखट्वकइत्यादिसमासेपूर्वोत्तरभा
गयोःकबहुखट्वइत्यनयोःप्रकृतिप्रत्ययभावापन्नत्वात्॥कपःसमासांतावयवत्वेनकांतस्यसमासत्वात्॥भामवतशिवेत्य
नयोःप्रकृतिप्रत्ययाभावानापन्नत्वाद्दर्थवत्वाच्चशिवभागवताइत्यस्यनियमव्यावर्त्यत्वापाताच्च॥नन्वेवमपिराजकुमारीश्रि
तइत्यत्रयुगपद्वृत्तिद्वयपक्षेप्रातिपदिकत्वानापत्तिः॥सुबंतमात्रस मुदायसत्वादितिचेन्न॥युगपद्वृत्तिद्वयोत्तरंराजकुमा
रीत्यस्यसमासत्वात्प्रातिपदिकत्वेनपुनःसुपिपुनर्द्वितीयातत्पुरुषेणदोषात्॥श्रितेत्यस्यप्रत्ययलक्षणेनसुबंतत्वाद्द्वितीयपदे
चेतिनिषेधस्यपदांतविधावेवप्रवृत्तेः॥केचित्तुनियमस्यपरस्परसमानाधिकरणसमाससंज्ञाश्रयाधटितसुबंतसमुदाय

विषयकत्वान्नोक्तदोषइतितन्न॥राजकुमारीश्रितस्यपुत्रइतिवाक्येप्रातिपदिकत्वापत्तेः॥उक्तद्वयाश्रयघटितत्वसमास
त्वानाश्रयघटितत्वोभयाभावनिवेशेपिराजाकुमारीश्रितस्यसुंदरवाक्येतदापत्तिरितिदिक्॥उक्तद्वयाश्रयघटितत्वेकार्थीभा
वपर्याप्त्यधिकरणत्वोभ याभावनिवेशोनसंभवतिराजकुमारीश्रितपुत्रेतदभावात्॥राजकुमारीश्रितोमूलकेनोपदंशमि
त्यादौदोषाच्च॥अत्रकुमारी श्रितशब्दादेवसुवुत्पत्तिरित्यपिकश्चित्॥ननुशशशृंगादिसमासेशशशृंगादेरलीकत्वेनानर्थक
त्वात्प्रातिपदिकत्वाप्राप्तेःसमासग्रहणंविध्यर्थमेवस्यान्ननियमार्थमित्याशंक्याह॥शशशृंगादिपदानामिति॥विप्रलब्धा
दिचित्तस्थंनबहिष्ठंकदाचन॥स्वप्नभ्रममदाद्येषुसर्वैरेवानुभूयतइतिकोर्मस्मृतेरनादिवासनारूपेणांतरवस्थितरजतादेः
कामादिवृत्तिसहकारेणबहिर्विषयप्रदेशेआगमंस्वाकारेणविषयभासनंचनतुवाह्यः॥कोपिविषयस्यविशेषाकारोस्ति॥नच
सौत्रांतिकमतप्रवेशः॥तेनतत्रारोपितसत्तायाअप्यनंगीकारइतिभावः॥तदुक्तंतदस्यास्त्यस्मिन्नितिसूत्रेनसत्तापदार्थीव्य
भिचरतीतिभाष्यव्याख्यावसरेकैयटे॥यदितुवृक्षादिनाबाह्यसत्तासमाविष्टंवस्तुवाच्यंस्यात्॥ततोवृक्षइत्यस्मात्सत्तावगमा
दस्तीत्यस्यगतार्थत्वात्प्रयोगोनस्यात्॥नास्तीत्यस्यचसत्ताविरोधात्प्रयोगाप्रसंगः॥अंकुरोजायतइतिचप्रयोगोनस्यात्॥सतो

जन्मविरोधात्॥वोत्थसत्तायांतेदोषानावसरंति॥वुत्थिसत्तासमाविष्टस्यवहिःसत्वासत्वजननप्रतिपादनायास्तिनास्तिजा
यतइतिप्रयोगादिति॥नन्वक्षौहिण्यादौसमासेस्वातंत्र्येणप्रयोगार्हीर्थवत्समुदायत्वंनविद्यतेतदवयवानांनिरर्थकत्वादि
त्याशंकते॥अक्षौहिणीत्यादीति॥अन्यत्रदृष्टार्थारोपेणेति॥प्रातिपदिकत्वसित्थयेऽर्थवत्वारोपस्यावश्यकतयातत्एव
समासेर्थवत्समुदायत्वंसूपपादमितिभावः॥विकारागमेतिपाठः॥एवमग्रेपि॥तमुच्चार्येति॥अर्थबोधकशब्दमुच्चार्येत्य
र्थः॥नभवधाद्यादेशानामितिनाभिनभंच॥हनश्चवधः॥आदिपदाद्विरागविरंगचेत्यस्यसंग्रहः॥श्रमकजिति॥श्रमिप्रत्य
यात्वाभावेशकारस्येत्संज्ञानस्यात्॥अकचितदभावेसर्विकेत्यादावित्वंनस्यात्॥बहुचितुफलंचिंत्यं॥इतिदिगिति॥अन्येतुत्
णहइतिनिर्देशात्प्रत्ययपरत्वाभावेपिप्रत्ययइत्यस्योपस्थितिः॥वहुचितुप्रत्ययत्वस्यनफलं॥अव्ययसर्वनाम्नामित्यत्रापिप्र
त्ययइत्यस्यसंबंधः॥नयासयोरितिज्ञापकात्॥एवंचयत्रगमकंतत्रपरश्चेत्येतत्संन्नियोगशिष्टस्यप्रत्ययइत्यस्यासंबंधः॥आ
घुदात्तश्चेत्यनेनतुनसन्नियोगशिष्टत्वं॥विप्रकृष्टत्वात्॥तेनकिंबिजादेःप्रत्ययसंज्ञासिद्धिः॥किंचेत्याद्युक्तमपिदूषणम्॥दे
शांशेनिराकांक्षत्वेपिपरश्चेत्यस्येसंभवमात्रेणसंबंधसंभवः॥विकारागमयोस्तुपंचम्यंताभावेनान्वयासंभवात्परश्चेत्यस्यानु

पस्थितिः॥ नचसीयुटाव्यवधानात्थातोः परत्वासंभवः॥ यासुट्परस्मैपदेष्वितिसूत्रारंभसामर्थ्येनागमातिरिक्तकृतव्यवधा
नाभावस्यैवपरशब्दार्थत्वात्॥ इतरथासीयुटइवयासुटोपिपूर्वंप्रवृत्त्यापरस्मैपदविषयाभावात्तदसंगतिः॥ किंचस्यान्निनः
प्रत्ययत्वनिर्णयेनपरश्चेत्यस्यासंबंधेपिप्रत्ययइत्यस्यतत्संनियोगशिष्टघुदात्तश्चेत्यच्संबंधः॥ किंचपरश्चेत्यस्याप्रवृत्ता
वपिस्यानिवद्भावलब्धप्रत्ययसंज्ञासंनियोगेनाद्युदात्तत्वोपपत्तिः॥ तदेतदभिप्रेत्यभगवताभाष्यकृतोक्तं॥ विकारागमेषुच
परविज्ञानात्प्रत्ययसंज्ञानभविष्यतिप्रत्ययःपरोभवतीत्युच्यते॥ नचविकारागमाःपरेसंभवंतीति॥ प्रकृत्यर्थमात्रविवक्षायां
सित्थावस्काद्यविवक्षायां॥ ङ्याप्प्रातिपदिकात्॥ तिङ॰तात्त्विति॥ पशुमृगोधावतीत्यादौ॥ तिङोक्तृत्वाच्चेति॥ ननुधावतीतित्ति
ङनकर्तृगतासंख्याभिधीयतेनकर्मगतेतिचेन्न॥ यास्का चार्यमतेतिङ॰र्थकर्तृमुख्यविशेष्यकशाब्दबोधस्याप्यंगीकारा
त्॥ यद्वातिङं॰तात्द्वितीयापाद्यमानाकिंप्रधानक्रियागतैकत्वमादायाहोस्वित्प्रधानक्रियागतसंख्यायाबाधात्तद्विशेषणक
र्त्रादिगतैकत्वमादाय॥ आद्येसंख्याभावादित्युत्तरं॥ द्वितीयेतिङोक्तृत्वाच्चेति॥ धावनकर्तुरेवदर्शनेकर्मत्वात्कर्तृगतसंख्या
याअभिहितत्वेकर्मगताअपितस्याअभिहितत्वमितिभावः॥ तदेतदभिप्रेत्यभगवताभाष्यकृतोक्तम्॥ तिङोक्तार्थैकत्वाद्यय

इतितिङ॰तान्नस्वाद्योभवंतीति॥यद्यपिपचतिभवतीत्यादौप्रथमायाअप्यापादानसंभवः॥तथापिप्रातिपदिकेत्याद्येक
वाक्यतयैवस्वादिसूत्रस्यविधायकत्वेनतिङ॰तस्यप्रातिपदिकत्वाभावेनप्रातिपदिकार्थाभावात्प्रथमानापादयितुंयुक्ताइ
त्याशयेनद्वितीयादिरित्युक्तं॥केचित्वष्टाध्याय्यांकर्मणिद्वितीयेत्यस्यप्र थममुपादानात्तथोक्तिरित्याहुः॥तेभ्यःतिङ॰तेभ्यः
प्रथमोच्चारितबोध्यादिति॥तस्यापत्यमित्याद्यर्थबोधकशास्त्रेषुप्रथमोपात्तयत्तस्येत्यादितद्बोध्योयउपस्वादिसंबंधस्त द्बो
धकयत्उपगुड॰सइत्यादितस्मादित्यर्थः॥प्राधान्यादिति॥इदमयुक्तं॥समर्थादितिसुबंतमेवविशेष्यतयाप्रक्रांतंनत्वन्य
त्॥द्वयोर्हिविशेष्यतयासंभावनायामन्यतरस्यतथात्वनिश्चयायहेतूपन्यासोयुक्तः॥ननुसर्वशब्दोप्याद्युदात्तएव स्वांगधि
टामदंतानामितिसूत्रेणततश्चप्रा तिपदिकादित्युक्तावप्युक्तदोषस्तदवस्थइत्यतआह॥सर्वशब्दस्येति॥कौस्तुभोक्तंदू
षयितुमुपन्यस्यति॥नचेति॥लुङ्निमित्तप्रत्ययादिति॥सन्यायेलुकइवत्तदुपजीव्यस्यकार्यस्यापिप्राबल्यबोधकइतिभा
वः॥सोवरीणां॥स्वरविधायकशास्त्रभवानां॥स्वरशब्दात्तत्रभवइत्यणिद्वारादीनांचेत्येजागमः॥आद्युदात्तत्वसिद्धिरिति॥न
न्वेवंसतिसर्वस्यसुपीत्यत्रसुपीतिव्यर्थंस्यादितिचेत्सत्यं॥किमस्माभिःकर्त्तुशक्यंसर्वशब्दाश्चक्षिपितिपिचाद्युदात्तत्वाभाव

र्थवास्यात्प्रातिपदिकाधिकारेतुतस्यानुदात्तादितिविशेषणेविशिष्टस्यगभीरायांनद्यांघोषइत्यादाविवसमर्थादित्यनेनान्व
यार्थतत्प्रकृतिकेलक्षणायामनुदात्तादिप्रातिपदिकप्रकृतिकषष्ठ्यंतादञित्यर्थेनसित्थेसार्वइत्यत्राजनापत्तिः॥षष्ठ्याभ्
नुदात्तादिप्रकृतिकत्वात्॥षष्ठ्युत्पत्तिसमयेसर्वशब्दस्यांतोदात्तत्वात्॥एवंचसर्वस्यसुपीत्यत्रसुपीत्यपिसार्थकम्॥उंछादि
षुपाठःसफलः॥सर्व इत्यत्राज्प्रवृत्तेरुभयफलत्वात्॥मानाभावादिति॥अनुदात्तादेरित्यस्यषष्ठ्यंतविशेषणत्वसंभ
वादितिभावः॥नलक्षणेति॥इदमयुक्तम्॥तथासतिसार्वइत्यत्राजनापत्तेः॥सुपिपरेसर्वस्यसुपीत्यस्यप्रवृत्यासर्वेतिप्राति
पदिकत्वस्या नुदात्तादित्वाभावात्॥ममतुसुपःपूर्वमनुदात्तादित्वेनानुदात्तादिप्रकृतिकषष्ठ्यंतत्वस्यतत्रसत्त्वेनात्रसु
लभः॥किंचपदोद्देश्यकविधित्वाभावेनसमर्थपरिभाषागौणमुख्यन्यायश्चतत्थितविधौनोपतिष्ठेयातां॥अधिकमग्रेवक्ष्या
मः॥प्रातिपदिकग्रहणस्यप्रयोजनांतरमपिभाष्योक्तंकिंचित्प्रदर्श्यते॥ष्ठ्वचष्टनितिवाचातरतीत्यत्रप्रसज्येत॥घटेनतरती
त्यत्रचनस्यात्समर्थसुबंतस्याद्येद्यच्कत्वात्॥द्वितीयेतदभावात्॥नैग्रहणंतुनियमार्थंस्यात्॥बहुतरोदाहरणेति॥सर्वना
म्नस्तृतीयाचभवत्याहतोः॥कुसूलकूपकुंभशालंबिले॥कुसूलीबिलं॥पूर्वसदृशसमोना॥पित्रासदृशी॥तद्याप्यधर्माइति

आनुपूर्वी विशेषभिन्नाअपीत्यर्थः॥अतएवानुपूर्वीविशेषाप्यधर्माणामप्यतिदेशादेवानद्यंतानांयोबहुव्रीहिरिति॥न
नुनद्यंतसर्वावयवकोयोबहुव्रीहिरित्यर्थेबहुकुमारीकइत्यत्रकबनापत्तिः॥नद्यंतावयवकइत्यर्थेकुमारीभार्यइत्यत्राति
प्रसंगइतिचेन्न॥नद्युत्तरपदकइत्यर्थेनादोषात्॥अवयवविषयएवेति॥मद्रराज्ञीत्यादिसमासावयवराजन्शब्दविषय
एवेत्यर्थः॥तथाचसमासघटकराजन्शब्दत्वादिकमेवसमासांतविधावनयापरिभाषयानातिदिश्यते॥बहुव्रीहित्वादि
कंत्वतिदिश्यतएवेतिभावः॥इतिचरितार्थमिति॥तथाचार्यिकेत्यत्रनेत्वविकल्पः॥अत्यंतस्वार्थिकेषुङ्याप्ग्रहणासंबं
धेनापःपूर्वमेवकपःप्रवृत्तेःकिंतुनित्यमेवेत्वं॥नचैवंसतिङ्याप्ग्रहणवैयर्थ्यं॥अत्यंतस्वार्थिकानामंतरंगत्वेनपरत्वेन
चङ्याबभ्यांप्रागेवोत्पत्तेः॥कुत्सिताद्यर्थकतद्धितानांतुकुत्सितइतिसूत्रस्थभाष्योक्तरीत्यास्वार्थादिप्रयुक्तकार्याणांक्रमि
कत्वस्वीकारेणन्यायतएवङ्यावंतादुत्पत्तिसित्थेरितिवाच्यं॥लिंगविशिष्टपरिभाषायाअनित्यत्वज्ञापनार्थत्वात्॥तेनसमा
सांतादिविधौलिंगविशिष्टपरिभाषायाअप्रवृत्तिः॥नन्वत्यंतस्वार्थिकेषुङ्याप्ग्रहणासंबंधेपिघकालतनेष्विति॥ज्ञापकेन
तद्धितानांसुबंतादेवोत्पत्त्यालोहितालिंगबाधनंवेतिपुनरसंगतमित्यतआह॥अत्यंतस्वार्थिकानामिति॥अनंतर्भावादिति

एतदुत्तरमुन्नंतस्येतिशेष :॥तस्यचद्विर्वचनाभावइत्यनेनान्वयः॥इदंचोक्तार्थानामितिन्यायमननुसंधायप्रवृत्तं॥एक
त्वंस्त्रीत्वंचोन्नतार्थ :॥तद्युक्तस्यचावीप्सितत्वान्नवुन्नंतस्यद्वित्वमित्यर्थः॥विभक्त्यभावेनेति॥अत्यंतस्वार्थिकान्सु
बुत्पत्तेःपूर्वमेवोत्पत्तेरितिभावः॥नन्वेतद्भाष्यंसुबंतात्तद्धितोत्पत्तावप्युपपन्नम्॥नित्यत्वादुनिअ कादेशेचभत्वेनपद
त्वाभावान्नतद्धितप्रकृतेर्द्वित्वं॥वीप्सायांस्त्रित्वैकत्वयोरनंतर्भावात्नतद्धितांतस्यपदस्य॥कैयटस्त्वसंगतएवेत्यरु
चेराह॥पुंयोगादितिसूत्रेइति॥अधिकसापेक्षत्वेनेति॥इनुणंतत्वरूपविशेषापेक्षत्वेनेत्यर्थः॥नचसुबंतद्वयसापेक्षस
मासापेक्षयैकंसुबंतापेक्षाणप्रत्ययस्यैवांतरंगत्वमितिवाच्यं॥एतद्भाष्यप्रामाण्येनपदद्वयसापेक्षादपिविशेषापेक्षस्यवहि
रंगत्वात्॥उक्तरीत्येवेति॥सामान्यापेक्षत्वेनेत्यर्थः॥उक्तदिशापदद्वयापेक्षत्वेपिसमासस्याणपेक्षयांतरंगत्वंबोध्यं॥अन्यत्र
विस्तरइति॥स्पष्टंचेदंसर्वमत्रत्यभाष्यकैयटयोः॥तत्रहिङ्याप्ग्रहणस्यकालितरेत्यादिप्रयोजनमुपन्यस्यतत्सबहुगोम
त्केत्यादौदोषमुद्भाव्यस्त्रीप्रत्ययोपिस्वार्थिकःसमासांताअपिस्वार्थिकास्तत्रपरत्वात्समासांताभविष्यंतीत्युक्तं॥कालिकेत्या
दौस्त्रीप्रत्ययात्पूर्वंपरत्वादत्यंतस्वार्थिकेकनिप्रत्ययस्यादितीत्वेनसिद्धिः॥लोहिनीकेतितुलोहितास्त्रिंगबाधनंवेतिवचनेन

सिध्यतीत्युक्तंभाष्ये केयटेचङ्याप्ग्रहणप्रत्याख्यानेनसमासांतेपरिहारःकालितरेत्यादौतुपूर्वोक्तन्यायेनांतरंगत्वात्स्त्रीप्र
त्ययेपकर्षप्रत्ययइत्युक्तं॥एवंचात्यंतस्वार्थिकेकनिइत्वाधटितमार्यकेत्याद्यसाध्वेव॥तत्रतत्रेति॥टाङसीत्यादौ॥विभक्ति
ष्वा॥ननुत्रीणित्रीणीत्यननुवर्त्यंतिङएतन्मात्रानुवृत्तौविभक्तिपदेनैकवचनग्रहणात्प्रथमयोरित्यादौषण्णांप्रत्ययानांग्र
हणंनस्यात्किंतुद्वयोरेवतत्रसोरजादित्वाभावेनौजसोरेवग्रहणंस्यात्इत्याशंक्याह॥प्रथमयोरिति॥बहुवचनापत्तिरिति
द्वयेकेषितिस्यादितिभावः॥यत्तुस्वरितात्संहितायामितिसूत्रेकैयटव्याख्यावसरेद्वयेकेषामितिस्यादित्यभिनवविवरणेउक्तं
तद्भ्रमसात्॥दूंद्वेचेतिनिषेधेनसुडप्राप्तेः॥भर्तृदारयोरिति॥बहुवचनांतस्योत्तरपदत्वेबहुवचनमेव।पूर्वपदत्वेतुद्विवचनमि
त्यन्ये॥एकदेशंविकृतन्यायेनेति॥आनुमानिकस्यान्यादेशाभावेनेत्यर्थः॥सरूपाणामेकशेषएकविभक्तौ॥तंत्रस्योदाहर
णमाह॥यथाभ्यामिति॥भ्याम्यपीत्यर्थः॥अन्येतुप्रातिपदिकानामेकशेषेमातृमात्रोःप्रतिषेधोवक्तव्यःमातराचजनयित्रीमातरौ
चधान्यस्यमातृमातारइतिवैरूप्यविषयोदाहरणोपन्यासेनयस्यापिविभक्त्यंतानामेकशेषस्तेनापिमातृमात्रोःप्रतिषेधोव
क्तव्यस्तस्यापिसरूपाणिमातृभ्यांमातृभ्यांचेति॥अथमतमेतत्विभक्त्यंतानांसारूप्येभवितव्यमेवैकशेषेणेत्यग्रिमभाष्ये

णचभ्याम्येकशेषोभवत्येव॥अर्थविप्रतिषेधादत्रैकशेषोनेतिकेयटोक्तंतुनयुक्तं॥तैरित्यनुप्रयोगेरूप्यार्थावगतिसंभवात्॥
साचतौचतैरित्येकशेषसंभवात्॥अर्थविप्रतिषेधेनैकशेषइतिवचनाभावाच्च॥अतएवप्रातिपदिकानामेकशेषइतिप-
क्षेएकविभक्तौयानिसरूपाणितेषामेकशेषइतिएवकारोघटितोवाक्यार्थनिष्कर्षोभाष्यकृतादर्शितः॥ अपकर्षस्यभा
ष्यकृताकुत्राप्यनाश्रयणाच्च अतएवप्रातिपदिकतंत्रमाश्रित्यैकशेषप्रत्याख्यानेनफलभेदः॥तत्रहिमातृभ्यामित्यत्रसा
रूप्यंतंत्रंसंभवतिमातरावित्यादौचनेत्याहुः॥तत्थितांतादौवैरूप्यादिति॥ताथाचयानिरूपाण्येवेत्युक्तौहरिणीशब्दयोरेक
शेषोनस्यात्॥एवकारानपकर्षेतुजननीवाचिपरिछेत्तृवाचिनोरेकशेषापत्तिरित्युभयतःपाशारज्जुरितितत्परिहारायय
विभक्तावित्यावश्यकमितिभावः॥अन्येत्वेवकारोनापकृष्यते॥भाष्येऽदर्शनात्॥मातृशब्दयोस्तूक्तयोर्भ्याम्येकशेषोभ
वत्येवेत्युक्तं॥एवंश्रुत्यडंतकुमारीशब्दस्योजसोरेकशेषोभवत्येव॥शासितुन॥यण्पूर्वसवर्णाभ्यांरूपभेदात्॥मातृमा
त्रोःप्रतिषेधोवक्तव्यइतिवार्तिकंतूपलक्षणं॥एकविभक्ताविति॥तुसहविवक्षायाउपलक्षणार्थं॥सहविवक्षायामेकविभक्तेरे
वदर्शनात्॥तदेतदभिप्रेत्यभगवताभाष्यकृतोक्तं॥एकविभक्ताविति॥किमर्थं॥पयःपयोजरयतिवासोवासश्छादयतिब्राह्म

णाभ्यांकृतंब्राह्मणाभ्यांदेहीतिअसहविवक्षाविषयप्रत्युदाहरणदानेनैकविभक्ताविति्यस्यसहविवक्षोपलक्षणत्वंस्पष्टमेवसूचितंविभक्तिःस्रु
प्येणाश्रीयतइतिप्राप्तिपदिकैकशेषोपपादनप्रकरणस्थंभाष्यंत्वेकदेश्युक्तिः॥नचैवंसतिमात्तृमातरावित्यत्राप्येकशेषापत्तिः॥शिष्यमाणस्यक
तदीर्घत्वेचतेनजननीबोधासंभवेनाकृतदीर्घत्वेचतेनपरिछेत्तृबोधासंभवेनैकशेषाप्रवृत्तेः॥एकशेषशास्त्रंहिएकस्यनानेकार्थकतोत्पादकं
किंतुलोकसित्थानुवादकं॥नहिलोकेदीर्घोपधान्मातृशब्दाज्जननीबोधोह्रस्वोपधाच्चपरिछेत्तृबोधोदृष्टः॥तदेतदभिप्रेत्यभगवताभाष्यक
तोक्तं॥शब्दस्यस्वाभाविकीवाऽनेकार्थतास्यात्वाचनिकीवा॥तद्यदितावत्स्वाभाविकीभशिष्यएकशेषः॥किंकारणमेकेनोक्तत्वात्तस्यार्थ
स्यद्वितीयस्यप्रयोगेणनभवितव्यंयदितर्हिएकेनानेकस्याभिधानंभवतिश्लक्ष्ण्यग्रोधेएकेनोक्तत्वाद्परस्यप्रयोगोऽनुपपन्नः॥इदानीमेवो
क्तमेकेनानेकस्याभिधानंभवतीति॥सरूपाणामेकेनानेकस्याभिधानंभवतिनविरूपाणां॥किंकारणंसरूपाणामेकेनानेकस्याभिधानंभव
तिनविरूपाणामभिधानंपुनःस्वाभाविकमिति॥एतद्भाष्येणहिशिष्यमाणस्यस्वविरूपार्थबोधकत्वंस्पष्टमेवोक्तं॥अतएवङीबंतङीषंतहरि
णीशब्दयोस्तत्थितविवक्षानिमित्तकपुंवद्भावापेक्षयाऽनेमिति कत्वेनांतरंगत्वादेकशेषेकृतेस्वभिन्नानामितिङीबंतस्यशेषेतस्मात्तस्यसमूहइ
त्यर्थेऽणिहारितमितिरूपेनभवति॥तच्छब्दघटितस्यविरूपत्वेनहरिणीशब्दार्थाप्रतिपादकत्वात्॥यत्रतुतत्थितेद्वयोरूपंसमानंतत्र भवत्ये

वैकशेषः॥यथाहरिण्योरपत्येहारिणेयाविति॥अत्रभस्याढइतिपुंवद्भावेन॥अढेइतिपर्युदासादित्याहुः॥तंत्रस्योदाहरणमाह॥यथाऽक्षाभज्यंतामित्यादि॥यथाशब्दोऽत्रोदाहरणार्थोनदृष्टांतार्थः॥अक्षशब्दःशकटाक्षस्यबिभीतकाक्ष स्यदेवनाक्षस्यचवाचकएकशेषेणतुनात्रनिर्वाहः॥एकत्रानन्वयेनसहविवक्षायाअभावात्॥तथाचतदर्थमावश्यकेनतंत्रेणैवनिर्वाहेएकशेषारंभोव्यर्थइतिभावः॥एकशेषानिर्वाह्यंस्थलांतरमाहाएवमक्षोभज्यतामिति॥अत्रैकवचनांतत्वेनैकशेषःशंकितुमशक्यइतिभावः॥शब्दतंत्रमर्थतंत्रंचेति॥अर्थस्यविजातीयत्वेशब्दस्यैकजातीयत्वेशब्दतंत्रं॥अर्थस्यैकजातीयत्वेऽर्थतंत्रं॥पर्यायपरिवृत्यसहत्वेइति॥पर्यायेणप्रवृत्तिःपरिवृत्तिस्तदसहत्वेइत्यर्थः॥एकार्थकानांशब्दानांपर्यायेणैवार्थबोधनायप्रवृत्तिर्नयुगपद्भिन्नार्थकानामेकानुपूर्वीकाणामप्यक्षादिशब्दानांयुगपदेवार्थबोधनायप्रवृत्तिरर्थभेदात्॥तथाचविभीतकाक्षबोधकाक्षशब्दस्यदेवनाक्षबोधकाक्षशब्देनसहपर्यायपरिवृत्यसहत्वेयुगपत्प्रयोगार्हत्वेभिन्नार्थत्वेशब्दतंत्रमित्यर्थः॥तत्सत्वेपर्याय परिवृत्तिसहत्वेएकार्थत्वेइतियावत्॥ननुतंत्रस्थलेबोत्थुरावृत्त्यैवबोधः॥एकशेषस्थलेतुनैवंतथाचकथंतंत्रेण निर्वाहइत्याशंक्याहअन्वयिपदार्थभेदादिति॥आवृत्त्यैवेति॥शब्दावृत्त्याप

दार्थोपस्थित्यादृत्याचेत्यर्थः॥दर्शनेनेति॥घटोयंघटोयमित्यादौ॥अन्यत्रासहविवक्षायां॥सारवोर्मिजइति॥सरव्यांभ
वःसारवःदांडिनायनेतिनिपातनात्साधुः॥आरवेणसहितःसारवः॥सारवश्चासौसारवश्चेतिकर्मधारयः॥तथाचोक्तभा
ष्येणसारवेत्यादिमहाकविप्रयोगेणचसहविवक्षायामेवोक्तनियमइतिसित्यं केचित्तुतिष्यपुनर्वस्वोरितिसूत्रात्द्वंद्वइत्य
नुवर्त्यद्वंद्वेप्रसक्तेसत्येकशेषइत्याहुः॥ननुसरूपाणामेकशेषएवेतिनियमवत्सरूपाणांसहविवक्षायामेवैकशेषोनास
हविवक्षायामित्यपिनियमोंगीकार्यः॥तेनतृतीयांतचतुर्थ्यंतयोर्ब्राह्मणाभ्यामित्यनयोर्ब्राह्मणाभ्यांकृतंब्राह्मणाभ्यांदेही
तिष्यक्प्रयोगः॥त्वेकस्यनिवृत्तिः॥अन्यथाब्राह्मणाभ्यांकृतंदे हीतिप्रयोगापत्ति रित्याशंक्य द्वितीयनियमंस्वीकृत्योक्त
प्रयोगापादनेनेष्टापत्तिमाह॥असहविवक्षाविषयेणेति॥पयइति॥एकंप्रथमांतमेकंद्वितीयांतं॥नीलोत्पलस्पर्धिनी
ति॥एकंद्विवचनांतंनपुंसकंनेत्रेइत्यस्यविशेषणम्॥एकंङ्यंतंतनोर्विशेषणं॥अन्यपदार्थावगतयइति॥ननुचक्षिङोनुम्
व्यावृत्तयेकर्मधारयस्यावश्यकत्वेएंकमिदित्यदंव्यर्थमितिचेत्सत्यं॥नन्वर्थेअर्थेप्रतितदपिप्रत्यर्थमितिघटघटाविति द्वंद्वःक
स्मान्नभवतीत्याशंक्याह॥अनेकघटादिपदानामिति॥तंत्रपरइति॥एकशेषेद्विवचनापत्तेः॥सहविवक्षाभावेनतदसंभवा

च्चेतिभावः॥इत्यर्थबोधयितुमिति॥एकग्रहणसामर्थ्यादप्यर्थीतर्भावेणसमासः॥सरूपाणीत्यस्यविरूपाणिनेत्यर्थः॥एवंचे
वकारेणपकर्षोमास्तुतदपकर्षेतूक्तार्थसंपादकैकग्रहणंमास्त्वितिभावः॥दूषणंभाष्येउक्तमिति॥समाहारद्वंद्वविषयेएक
शेषेतुएतद्दूषणासंगतिरितिभावः॥अत्रवर्दति॥सोयमाम्बिकःसाचेयमाम्बिकीतच्चेदमाम्बिकंतद्दिंसर्वमाम्बिकं
॥ ॥ ॥ तानीमान्याम्बिकानीतिअबहुप्रकृतीनांयत्रवृत्तिस्तत्रफलसेनेतिवार्त्तिकेनसमाहारेद्वंद्वस्यनिषिद्धत्वा
त्॥अप्रसंगात्द्वंद्वेप्रसक्तेविधीयमानएकशेषस्तदानप्राप्तः॥इतरेतरयोगद्वंद्वेतुप्रसक्तेएकशेषोविधेयइति बहुवचन
प्रसंगेएकशेषोविधीयतेबहुवचनेप्राप्तेएकवचनार्थमेकवद्वान्यतरस्यैमितिस्यात्।किंचानेनेतरेतरद्वंद्वयोगेएकशेषाभावोज्ञा
प्यतांतावतापितस्यसार्थक्यसंभवात्॥तस्माद्घटश्चघटश्चानयोःसमाहारेघटइत्येकशेषोभवत्येव नचनपुंसकत्वप्रसंगः॥
समाहारद्वंद्वएवतद्विधानात्॥एवंचघटघटइत्यादेरनभिधानंनाश्रयणीयमित्यपरमनुकूलमिति॥अत्रब्रूमःसमाहारद्वं
द्वविषयेएकशेषप्रवृत्तौविभक्त्यंतानामेकशेषइतिपक्षेऽयंतर्हिदोषःकश्चिद्वचनलोपः॥द्विच नबहुवचनविधिर्द्वं
द्वप्रतिषेधश्चेतिभाष्यंकश्चिदिति शिष्यमाणस्यैकवचनस्यलोपोवक्तव्यइतिकैयटग्रंथश्चव्याकुप्येत॥एकवचनांतस्यापि

साधुत्वेतुतदसंगतिः॥तेनैकवचनांतस्यासाधुत्वलाभात्॥एतद्भाष्यप्रामाण्यादेवसमाहारद्वंद्वविषयेनैकशेषः॥अतएवैकशे
षोदाहरणानिद्विवचनबहुवचनांतान्येवभगवताभाष्यकृताप्रदर्शितानि॥नत्वेकवचनांतानि॥सूत्रशेषेचभाष्येकेष्वर्थेषु
लौकिकाःशब्दान्प्रयुंजते॥लोकेचैकस्मिन्नृक्षइतिप्रयुंजते॥द्वयोर्ऋक्षाविति॥बहुषुऋक्षाइतितेनगार्ग्योहंसःपिताइत्यादि
भ्यएकवचनांतेभ्यःक्रमेणगार्ग्यायणहंसीमातृबोधोन॥गंगायांमीनघोषाविति चन।निवृत्तभेदानामिति॥भेदेनाप्रतीयमा
नानामित्यर्थः॥तथाचतिङंतेभ्योऽभेदेनैवशब्दशक्तिस्वभावेनप्रतीत्यानानेकशब्दप्रयोगप्रसंगइतिभावः॥ननुमातृमात्रोःप्रति
षेधोवक्तव्यइतिवार्तिकप्रयोगःकथंएकशेषस्यदुर्वारत्वादितिचेन्नएकशेषेसतिविवक्षितार्थानवगमात्तदभावः॥एवंह्यत्र
योविवक्षितोजननीवाचिनःपरिच्छेत्रवाचिनश्चैकशेषप्रतिषेधोवक्तव्यइति॥एषचार्थोमात्रोरित्युक्तेनगम्यतइतिकैयटे
नसमाधानात्॥एतेनान्होमध्येवामनोरामरामाविति प्रयोगोपपत्तिःसंगच्छते॥अत्रचनौवयोधर्मविषमूलमूलेतिनिर्देशो
पिगमकः॥स्वरभिन्नानामिति॥भिन्नस्वराणामित्यर्थः॥ननुस्वरभेदेकथंसारूप्यमितिचेन्न॥रूप्यशब्देनवर्णानुपूर्व्याएवग्रह
णात्॥तथाचतृज्वत्क्रोष्टुरितिसूत्रेभाष्यं॥नहिस्वरोरूपवानिति॥नविभक्तौतुस्माः॥ननुप्राग्दिशीयविभक्तौनायंनिषेधःप्रव

र्तेतेइत्येवोदित्वेनज्ञाप्यतामतआह॥अतएवेति॥उक्तज्ञाप्यांशंविहायसामान्यतोऽनित्यत्वज्ञापनादेवेत्यर्थः॥अन्यत्रेति॥न
चैतत्तकारेतत्फलं॥अनुच्चारणेनाप्युपपत्तेः॥एकवचनं॥नन्वेकवचनग्रहणेनप्रत्ययग्रहणपरिभाषोपतिष्ठते॥एकवच
नशब्दस्यप्रत्ययमात्रबोधकत्वाभावात्॥त्वमावेकवचनइत्यादावर्थबोधकत्वस्याप्यंगीकारात्॥सुःसंबुत्थिरित्युक्तौत्
पतिष्ठेत॥नचसंज्ञाविधावितिनिषेधः॥यथासामंत्रितशब्दयोगार्थोपपत्तयेउक्तनिषेधाप्रवृत्यातदंतविधिस्तथात्रापि
तदंतविधिशंकायाअनिवारणात्॥ * ॥ * ॥ * ॥ आमंत्रणसाधनत्वस्येवसंबोधनसाधनत्वस्यापितदंतएवसं
भवादित्यर्थंकाह॥संबुत्थाविति॥इत्यंशेति॥संबुत्थ्याक्षिप्तस्येत्यर्थइतिभावः॥फलाभावादिति॥आक्षेपकोपपत्तिरू
पाक्षेपफलाभावादित्यर्थः॥संबुध्युपपत्तिरिति॥प्रयोगइतिशेषः॥तथाचप्रयोगेतदुपपत्तयेप्रयोगएवाक्षेपःस्यान्नतुसूत्रेइ
तिभावः॥आक्षिप्तस्याक्षेपकानुपपादकत्वेनाक्षेपासंभवमुक्त्वाऽऽक्षेपमूलभूतानुपपत्तेरभावेनापितदसंभवमाह॥किंचे
ति॥उक्तस्यार्थस्ययस्मात्सविहितस्तदादेरित्यर्थःस्यादतआहेति॥अन्येत्वंगाक्षेपाभावेप्येङ्ह्रस्वात्परायासंबुत्थिस्तस्याहलो
लोपइत्यर्थेनहेकत्तरदित्यादौसंबुत्थिलोपवारणात्॥अंगाक्षेपोव्यर्थइत्याशंक्याहकुलेतीत्याहुः॥ननुपोर्वापर्यभावोप्यंता

दिवद्भावेनैवसाध्यतामतआह तादूप्यानतिदेशादिति॥पौर्वापर्यानितिदेशादित्यर्थः॥ह्रस्वांतत्वानतिदेशादितितुनार्थः।तस्यस्व
तःसित्धत्वेनातिदेशानपेक्षणात्॥अन्याक्षिप्तस्य अन्योपस्थापितस्य॥वस्तुतस्तुयद्येनोपस्थाप्यतेतस्यतेनैवान्वयइतिनियमे
मानाभावः॥गुणश्रुत्योपस्थापितस्येकइत्यस्यांगेनान न्वयाद्व्यभिचारश्च ॥यदिचतस्यांगद्वारागुणेनान्वयस्तर्हिप्रकृतेपिह
लद्वारासंबुत्यान्वयइतितुल्यं॥एतदर्थमेवेति॥अंगादित्यस्यहल्यन्वयसूचनार्थमित्यर्थः॥नन्चेवमपिकतरदित्यत्रलोपोदु
र्वारः॥अर्दतस्ययस्माद्धितस्तदादित्वात्॥तकारस्यचसंबुध्यवयवत्वादितिचेन्न॥प्रत्ययघटकभागाघटितस्यैवतदादेर्ग्रह
णेनादोषात्॥नचैवंकुलेत्यत्रलोपानापत्तिः॥मकारस्यसंबुत्यवयवत्वोपपादनायामित्यस्यपरादिवद्भावेनसंबुत्यित्वस्यव
क्तव्यतयाकुलेत्यस्यप्रत्ययघटकभागघटितत्वादितिवाच्यं॥संबुत्यवयवत्वस्योपलक्षणत्वेनपरादिवद्भावानाश्रयणेना
दोषात्॥मकारस्यसंबुध्यवयवत्वंपूर्वमासीदेवेत्याशयात्॥नन्वेङ्ह्रस्वात्परसंबुत्थेर्लोपइत्यर्थेपिकुलेत्यत्रलोपोभवत्येव
एकदेशविकृतन्यायेनमस्यसंबुत्थित्वात्॥तथाचोक्तव्याख्यानक्लेशोव्यर्थएवेत्याशंक्याह॥मस्येति॥संबुत्थित्वाभावादितिहेतो
र्ह्रस्वांतागात्परसंबुत्थेरभावादितिव्यवहितसाध्येनान्वयः॥स्थानिभूतालधर्मत्वेनेति॥अल्स्थानिभूतोयःसुरितिसमुदायस्त

त्थर्मत्वाभावेनेत्यर्थः॥तथाचस्थानिवदादेशइत्यत्रस्थानिपदस्यादेशविधायकशास्त्रघटकस्थानषष्ठ्यंतपदजन्यप्राथमिकोपस्थितिविषयपरत्वेपिसंबुत्थित्वस्यतत्थर्मत्वाभावादतिदेशेनस्यादितिशंकाभिप्रायः॥तस्यानल्विधित्वादिति॥तस्यसंबुत्थित्वस्यानल्धर्मत्वादित्यर्थः॥यथाश्रुतौपूर्वोत्तरपक्षावसंगतावेव॥संबुत्थित्वस्यस्थानिभूतालधर्मत्वशंकायाःसमुदायस्याम्स्थानित्वोपपादनेनैवनिवारणीयतयासंबुत्थिसंज्ञायाःसमुदायोद्देश्यकत्वोपपादनस्यासंगतत्वात्॥इदमयुक्तंपूर्वोत्तरपक्षाभ्यांसंबुत्यवयवत्वस्यविशेषणतायाएवावगमात्॥तत्रचोक्तरीत्यादोषात्॥अंगाधिकारस्यादिति॥एतेनांगसंज्ञाकृतंबहिरंगत्वमुक्तं॥नचगुणबहिरंगत्वस्यपूर्वपक्षाभिप्रेतत्वेपरत्वान्नित्यत्वाच्चेतिसमाधानग्रंथासंगतिरितिवाच्यं संज्ञाकृतबहिरंगत्वस्यामितिन्यासेपरत्वान्नुडित्यादिभाष्येणसमानाश्रयेत्वपरनिमित्तापेक्षत्वेनबहिरंगत्वस्यचानाश्रयणमितिसमाधानग्रंथाशयात्॥सामर्थ्यादेव॥एङ्ग्रहणसामर्थ्यादेव॥एङ्ह्रस्वग्रहणसामर्थ्याच्चेति॥ह्रस्वग्रहणंहेलक्ष्मीत्याद्यर्थंसन्निपातपरिभाषयाह्रस्वस्यसंबुत्थिलोपानिमित्तत्वेतद्देयर्थ्यं। अभ्युच्चयइति॥नित्यानित्ययोर्विप्रतिषेधायोगादितिभावःअनवकाशत्वसंग्रहइति॥ननुत यासतिगुणेकृतेलोपाप्रसंगइतिचेन्न॥एङंतत्वनिमित्तकलोपप्रवृत्तेःसुलभत्वात्॥विष

यभेदेउत्सर्गापवादभावोनेतिन्रिपथगायांनिरूपितंनविस्मर्त्तव्यम्॥त्रपोइत्यत्रलोपाप्राप्तिविषयेगुणस्यचारितार्थ्याद्गुणस्य
नलोपापवादत्वमित्याशंक्याह॥नपुंसकइति॥बाधकाबाधितप्राप्तेरभावेपिप्राप्तिमात्रमस्त्येवेतिभावः॥द्विमात्रवारणायेति
नचैवंपूर्वसवर्णदीर्घेणसित्थेरेतद्वैयर्थ्यं मितिवाच्यं॥गौरीइत्यादौत्रिमात्रप्रवृत्यर्थत्वात्॥वाकंदसीत्यनेनैकवाक्यार्थत्वाच्च
तस्माच्छसः॥ननुतस्मादितिमास्तु॥अकइत्यनुवर्त्याकः परस्यनत्वविधानेनलिहइत्यादावदोषात्॥नचादेःपरस्येत्यादेर्न
कारेहरीनित्यत्रदीर्घश्रवणानापत्तिः॥शसःसोनःपुंसीतिन्यासेनादोषात्॥अकःपरस्यशसःसस्यनइत्यर्थः॥पूर्वसवर्णदी
र्घस्यतत्रकौंडिन्यन्यायेनबाधःस्यादितितुनशंक्यं॥पूर्वसवर्णदीर्घेऽकःपरशसोऽसंभवेनोक्तन्यायाप्रवृत्तावनवकाशत्वेन
तंबाधित्वानत्वेप्रवृत्तेपश्चात्तत्प्रवृत्तेः॥ननुतिऊनित्यत्रोत्सर्गकृतेनत्वचारितार्थ्याद्युक्तन्यायेनतस्यबाधेपुनरप्रवृत्तिरि
तिचेत्सत्यं॥अकइत्यस्यसकारविशेषणत्वेनादोषात्॥अकचसामर्थ्यात्त्रत्ययानवयवस्तथाचपूर्वसवर्णदीर्घोत्तरमेवन
त्वप्रवृत्तिरितिनकश्चिद्दोषइत्यभिप्रायेणशंकतेतस्मादिति॥किमिति॥अदृकृप्वाङ्॰॥तदुक्तित्वध्वननादिति॥वस्तुतस्तुकृ
त्तमूर्ध्वआर्धीदित्यादौणत्ववारणायतुनैवं व्यवायेनेतिलघुन्यासेनसित्थेऽदृकृपुग्रहणमेतैरेवव्यवायइत्यर्थकंभविष्यतीति

माभ्यामित्यादावेवदीर्घःस्यान्नपचावइत्यादौ॥अप्रवृत्तिज्ञापनार्थमिति॥अन्येतुसुबामंत्रितइत्यतोऽनुवर्त्तमानसुप्पदव
न्मध्येयज्ञीत्येतत्संबत्धत्वेनतत्संबंत्धस्यनिवृत्त्येसुप्प्रतिनेत्यत्रसुप्पदवन्मध्येयज्ञीत्येतत्संबंधस्यहलीत्यस्यनिवृत्तयेझ
ल्ग्रहणंस्यादित्यज्ञापकमेत्वेसंनिपातपरिभाषाप्रवृत्त्यभावस्य॥तत्संबंत्धस्यानुवृत्तौतुरामेष्वित्यादौषत्वंनस्यात्॥सुपीत्य
स्यतुयञ्संबत्धत्वेपिझल्ग्रहणसामर्थ्यात्केवलस्यानुवृत्तिः॥ किंचसुपांसुरितियादेशेएत्वाभावार्थंझल्ग्रहणंएत्वेस
न्निपातपरिभाषायाअप्रवृत्तौहलिसर्वेषामितिनिर्देशोगमकइत्याहुः॥नुमापत्तेरितिवार्णोदंग मितिपरिभाषयागुणंबाधि
त्वेतिशेषः॥सन्निपातपरिभाषयानुम्वारणेतुतयैवगुणोपिनस्यादितिभावः॥इटितुएभ्यइत्यादौहलिलोपानापत्तिर्बो
ध्या॥बाधित्वेतिशेषइति॥यत्तुपाठकेनोक्तं॥एवंसतिषडित्यादौआंतरतम्यात्षकारएवस्यान्नटकारः॥अल्पप्राणतयाप्रयत्न
भेदात्॥तस्माच्चर्त्वस्यासित्यत्वाज्जश्त्वंततश्चर्त्वमित्येवयुक्तमितितन्न॥उत्सर्गापवादभावपरित्यागेकारणाभावात्॥षडि
त्यादौतुनदोषः॥शसिदधोःप्रतिषेधेनचर्विधौझल्पदेनचर्भिन्नस्यजशविधौजशभिन्नस्यग्रहणबोधनेनजश्त्वोत्तरमेवच
र्त्वप्रवृत्तेः॥समानाम्नयेचरितार्थस्यसवर्णदीर्घस्यव्याम्नयेगुणेनवैरूप्यसंपादकादेशप्रवृत्तियोग्येचरितार्थ स्यचर्त्वस्यसारू

प्यसंपादकादेशप्रवृत्तियोग्यस्थलेचर्त्वस्यासित्थत्वेनतस्यजस्त्वेबाधनाच्च॥अणुरपिविशेषोऽध्यवसायकपरइतिन्यायात्।अ
न्येतुष्णांताषडितिनिर्द्देशेनजस्त्वचर्त्वयोरुत्सर्गापवादभावएवनेत्यन्यथाजस्त्वंबाधित्वाचर्त्वेषकारस्यतद्भावपक्षेजस्त्वे
नडकारस्यश्रवणापत्तौटांतनिर्द्देशानुपपत्तिः॥नचपुनर्भावोपक्रमाच्चर्त्वेतत्सिद्धिरितिवाच्यम्॥जश्त्वेपुनश्चर्त्वाभावस्योप
क्रमेपुनर्भावपक्षेचर्त्वाभावाश्रयणायोगात्॥तथात्वेशिशियतुरित्यादौद्वित्वेकृतेसंप्रसारणेशिशुवतुरितिस्यादित्याहुः॥व्य
र्थंस्यादिति॥ननुतादेशेचयोद्वितीयाइतिथकारश्चर्त्वेतुतस्यासित्थत्वात्सनेतिफलभेदान्नव्यर्थमितिचेन्न॥तथासतिचयोद्वि
तीयाइत्यस्यानंतरंसआर्द्धधातुकइतिकार्यम्॥शरीत्यनुवृत्याशरादावार्द्धधातुकेसस्यद्वितीयइत्यर्थः॥सचांतरतम्यात्थस्य॥
तासस्त्योरित्यत्रसीतिकर्त्तव्यम्॥नचलाघवाभावः॥तकारंकृत्वाथकारकारणापेक्षयासाक्षात्थकारणेऽपेक्षप्रक्रियालाघवात्॥
थकाराभावेथवरिचेतिचर्त्वेनतकारः॥एवंसित्थेतत्वविधानमित्याशयात्॥प्राचांमतेतस्यबहिरंगत्वेनासित्थत्वात्द्वितीया
प्रवृत्तेश्च॥षडित्यत्रेति॥अनंतरत्वान्नद्यापइत्यत्रतदनुवृत्तिरुचिता॥ननुकष्टायक्रमणेइतिनिर्द्देशेनदीर्घमात्रेसन्निपात
परिभाषानप्रवर्त्तते॥अतएवानेमुगितिसूत्रेभाष्येमुडितिन्यासआपादितः॥नामीतिसूत्रेभाष्येचाग्नीनामित्युदाहृतं॥ननु

वृक्षाणामिति॥परत्वात्सुपिचेत्यस्यन्याय्यत्वात्॥म्नान्नलोपइतिसूत्रस्थंशकाराभावेयज्ञानामित्यादौनामीतिदीर्घत्वंबाधि
त्वापरत्वान्नलोपःस्यादितिभाष्यंतुसुपिचेतिदीर्घापेक्षयानलोपस्यनित्यत्वाभिप्रायमितिनतद्विरोधः॥एवंचरामाणामित्यु
दाहरणेनामीत्यस्योपन्यासोनयुक्तइत्याशंक्यसमाधानांतरमाह॥कृताकृतेति॥नामीतिसूत्रेभाष्येऽमीनामित्युदाहरणेप
न्यासस्त्वन्यथासिद्धत्वाभिप्रायः॥नतुवृक्षाणामित्यस्यानुदाहरणत्वाभिप्रायइतिभावः॥अथादिबाधमाशंक्येति॥इदंतुभाष्य
मायादयोवागुपूधूपविच्छिपृणिपनिभ्यआयःसार्वधातुकइतिन्यासाभिप्रायं॥व्युत्पत्तिपक्षेज्ञापकमिति॥अनस्वइत्यादौतुन
दोषः॥पदहूयाश्रयत्वेनबहिरंगत्वात्तयानुटोऽसिद्धत्वात्॥परंत्विदमुणादीनामव्युत्पत्तिपक्षएवेतिस्वसिद्धांतविरुद्धं।यत्तुकश्चिद्ग
ह्यनुटीतिन्यासेसन्निपातपरिभाषयानुट्दीर्घनिमित्तंनस्यात्नामीतिन्यासेतुनुटोनदीर्घनिमित्तत्वमितिनसन्निपातपरिभाषाविरोधइतितन्नानामीतिन्यासे
पिनुटोघटकतयादीर्घनिमित्तत्वात्॥नुटीतिन्यासेपिकष्टायेतिनिर्देशेनदीर्घविधौसन्निपातपरिभाषाप्रवृत्त्यभावकल्पनासं
भवात्च॥इणश्चेकश्चेतिइतरेतरद्वंद्वेद्विवचनमितिभ्रमनिरासायाह॥वर्णाग्रहणमिति॥ठकारेति॥वर्गाद्यंतिमेयोनप्रथमः॥त
स्यात्स्वप्राणतयाप्रयत्नभेदात्॥द्वितीयमिति॥ऊष्मणामीषद्विवृतस्येत्येवसुवचं॥सर्वादीनिसर्वनामानि॥तदुणसंविज्ञानबहु

तस्यान्यपदार्थस्ययेगुणाविशेषणानितेषांकार्य्यान्वयितयासंविज्ञानंयत्रेतिविग्रहः॥संयोगेनसमवायेनवायत्रवर्तिपदार्थसं
बंधीअन्यपदार्थस्तत्रप्रायेणातद्गुणसंविज्ञानःयथापीतांबरमानयलंबकर्णमानयेत्यादौअन्यत्रत्वतद्गुणसंविज्ञानः॥यथाचि
त्रगुमानयेत्यादौ॥क्वचित्तुसंयोगादिनावर्तिपदार्थसंबंधिनोन्यपदार्थत्वेपिअतद्गुणसंविज्ञानः॥नागयज्ञोपवीतीभोज्यतांलंब
कर्णेभ्योज्यतामित्यादौ॥उद्भूतावयवभेद इति॥उद्भूतआरोपितोऽवयवस्तत्सहचरितासंख्यायत्रेतिबहुव्रीहिस्तदाह॥आरोपि
तेति॥नहितदंतविधिंविनेति॥इदमयुक्तं॥इअईचइतरश्चेतिसर्वनामसंज्ञानिषेधार्थमावश्यकत्वात्॥तस्मादन्वर्थसंज्ञाश्रि
प्तसंज्ञीसर्वादिभिर्विशेष्यतेअपूर्वोवातदं तविधिरुपसंख्यायतइतिकेयटोक्तमेवयुक्तमितिकेचित्॥भाष्येसूचितमितिअ
वयवांगाधिकारेयदुच्यतेगृह्यमाणविभक्तेस्तद्भवतीत्येतत् सूत्रस्थ भाष्यसूचितमित्यर्थः॥सर्वनाम्नोऽवयवटेरिति॥न
तुसुबंतस्यटेः॥तथासतिसर्वकाभ्यामित्यादौदोषापत्तिः॥ओकारसकारेतिवार्तिकंतुयुष्मदस्मच्छब्दविषयकं॥अव्ययसर्व
नाम्नामित्यस्यश्रुतत्वात्तेनटेरित्यनेनसंबंधः॥प्रातिपदिकादितिचाव्ययसर्वनामात्मकप्रातिपदिकप्रकृतिकसुबंतपरं॥प
रमत्वान्वयोत्तरंकुत्साद्यन्वयविवक्षायामिदं॥कुत्साद्यन्वयोत्तरंपरमत्वान्वयेतुनेदमितिभावः॥इदमयुक्तं॥सर्वनामंप्रक

तिकसुबंतादित्यस्यानन्वयात्॥परमभवकानित्यत्रभवच्छब्दस्यप्रत्ययलक्षणेनसर्वनामप्रकृतिकसुबंतत्वेनाकच्सित्थेः॥उत्त
रपदेचेतिनिषेधस्तुपदांतविधावेव॥भवन्मतेसुबुत्यत्यनंतरंप्रातिपदिकमेवप्रकृतितयाश्रित्याकच्प्रवृत्तेश्च॥परमत्वकुत्सयो
र्युगपद्न्वयेयुगपदेवसमासतत्थितवृतिसंभवाच्च॥परमसर्वत्रेतितुकथंचिदुदाहरणंशक्यमुपपादयितुं॥परिनिष्ठितविभ
क्त्यासमासेपिसमुदायादुत्पन्नसप्तम्याःसर्वनामाप्रकृतिकत्वात्तदंतात्त्रलोऽसंभवात्॥घटस्यसर्वनामप्रकृतिकसप्तम्यंतत्वे
पितस्मात्त्रलिपरमादेस्तत्थितांतत्वाभावेनप्रातिपदिकत्वानापत्तिः॥शिवभागवतादाविवतदुपपादनेपितत्थितांतत्वाभावे
नसमुदायस्याव्ययत्वानापत्तिः॥तदनापत्तौसमुदायाद्विहितसुपोलुगनापत्तिः॥सर्वनाम्नःपरायासप्तमीतदंतात्त्रलित्यर्थेतु
तच्छब्दान्नपुंसकात्कपरंपदशब्दःप्रकृतिकसप्तम्यंतंयेइतिततस्त्रलापत्तिः॥परमसर्वेपरमविश्वेइतिभाष्योक्ततदंतविधिप्र
योजनंतुसमीचीनं॥अवयवस्यसर्वनामत्वेतोजसोविहितत्वाभावेनशीभावानापत्तेः॥इतिचरितार्थमिति॥विहितविशेष
णाभावेसमुदायस्यविकल्पेप्यवयवस्यनित्यसर्वनामसंज्ञामादायनित्यंशीभावापत्तेः॥यद्यप्येवंसतिद्वेचेतिनिषेधवैयर्थ्यमपि
सुवचं॥तथाप्यामिसर्वनाम्नइत्यादौविशेषणंस्वीकृत्यजसःशीत्यत्रतदाश्रयणेविवदमानंप्रत्येवमुक्तं॥किंचसमुदायग त

कुत्साविवक्षायांकप्प्रत्ययार्थसनिषेधःसार्थकस्तत्फलंवर्णाश्रमेतराणामित्यादौसुडभावइतिमंतव्यं॥अत्रयदुक्तव्यंतदग्रेव
क्ष्यते॥बोधरूपतत्प्रवृत्तिकालइति॥वस्तुतोबोधमात्रेनप्रवृत्तिः॥किंतुपदैकवाक्यतयान्वयार्हस्यसर्वस्योपस्थितौवाक्या
र्थबोधेवृत्तेपक्षाद्वाक्यैकवाक्यतयान्वयार्हपरिभाषोपस्थितौतदेकवाक्यतयामहावाक्यार्थबोधः॥तन्मूलकअस्मादयमि
तिशृंगग्राहकतयोपस्थूयमानवाक्यार्थबोधोबालस्यैप्रवृत्तिः॥अस्यांचदशायांकादेरनुबंधत्वंज्ञातुंसुशकमेव॥प्राहुरिति॥अन्येतु
नानुबंधकृतमनेकाल्त्वमित्यत्रानुबंधपदस्यतत्वयोग्यपरत्वेऽनेकाल्शित्पदस्यशित्वयोग्यपरत्वेनफलंप्रत्युतगौ
रवं॥किंचेत्संज्ञायोग्यशकारवत्वज्ञानेसर्वादेशत्वज्ञानंसर्वादेशत्वज्ञानेचप्रत्ययादित्वज्ञानंततश्चशकारस्येत्संज्ञायोग्यत्वज्ञा
नमितिचक्रकापत्तिः॥काणेास्तूक्तरीत्याप्रवृत्तिकालेनुबंधत्वज्ञानंसुलभं॥केचित्तुनानुबंधकृतमसारूप्यमित्यस्यवासरूपपरि
भाषापवादतयोपसंजातनिमित्तोप्युत्सर्गउपजनिष्यमाणनिमित्तेनापवादेनबाध्यतइतिनधातुलोपइतिसूत्रस्यकौस्तुभोक्तन्याये
नतेनतस्यबाधः॥प्रकृतेतुप्रथमतएवानेकाल्त्वात्सर्वादेशस्यापवादस्यनिमित्तमस्तीत्युक्तन्यायस्याप्रवृतेर्विशेषइत्याहुः॥अंने
काल्शित्सर्वस्येतिसूत्रस्थंशित्सर्वस्येतिकिमुदाहरणं॥इदमइश्॥नेतदस्ति॥शित्करणादेवसर्वादेशोभविष्यति॥इदंतर्हिजश्शसोः

शिःजसःशीतिभाष्यं॥लुटःप्रथमस्येतिसूत्रस्थंडाविकारस्यशित्करणंसर्वादेशार्थंडाविकारःशित्कर्तव्यःकिंप्रयोजनंसर्वादेशार्थमि
तिभाष्यंचशिदनुबंधपदेशित्वानुबंधत्वयोग्यपरमित्युपेत्यकृत्वाचिंतान्यायेनप्रवृत्तमित्यंत्यस्यायंस्थानेभवन्नप्रत्ययस्यासत्यांप्र
त्ययसंज्ञायामित्संज्ञानस्यादसत्यामित्संज्ञायांलोपोनस्यादसतिलोपेऽनेकाल्यदाऽनेकाल्तदासर्वादेशोयदासर्वादेशस्तदाप्रत्य
योयदाप्रत्ययस्तदेत्संज्ञायदेत्संज्ञातदालोपइतितदुत्तरभाष्येणतथात्वसूचितमितिनतद्विरोधः॥विभक्तियोग्यइति॥ननूपसं
जनिष्यमाणनिमित्तन्यायेनसित्थेविभक्तित्वयोग्येलक्षणाश्रयणंव्यर्थमितिचेन्न॥नबहुव्रीहाविसूत्रस्थभाष्यप्रामाण्येननिषे
धविषयेसंज्ञाविषयेवोपसंजनिष्यमाणन्यायाप्रवृत्तेः॥तत्रहित्वकत्पित्कइत्यादावलौकिकेप्रक्रियावाक्येप्राप्ताकज्चारणा
यबहुव्रीहिपदंलक्षणयाबहुव्रीह्यर्थौलौकिकप्रक्रियावाक्यपरमित्युक्तं॥उक्तन्यायेनैवपूर्वंसर्वनामसंज्ञायास्तन्निमित्ताकचश्चा
प्रवृत्तिसित्थौलक्षणाश्रयणंवैयर्थ्यस्पष्टमेवाप्रातिपदिकस्यैवप्रकृतित्वादिति॥अकञ्विधौसर्वनामपदंतत्प्रकृतिकसुर्बंतेन
लाक्षणिकंनेदमदसोरकोरकाकारकत्वाव्यभिचारात्॥ननुसमस्तार्थमेतत्स्यादितिचेत्सत्यं॥काकचोरविशेषप्रतिपादनपरभाष्या
देवोक्तार्थस्वीकारात्॥अन्यत्रतुलाक्षणिकमेवेत्युक्तम्॥ङ्याप्प्रातिपदिकादितिसूत्रे॥अकञ्विधौप्रातिपदिकाधिकारस्यनो

पयोगः॥तस्यपंचम्यंतत्वात्॥तत्रसर्वनामपदेनलिंगविशिष्टपरिभाषयाङ्यंतस्यापिग्रहणाङ्ङवतीशब्देङीपःप्राक्अकच्विभव
तकीतिरूपं॥नचप्रत्ययःपरःप्रयोक्तव्यएवेतिनियमेनमध्येकजनुत्पत्तिः॥त्वयकेत्यादाविवप्रकृतिप्रत्ययमध्येप्यकच्प्रवृत्ति
संभवात्॥अजादिविधानेनोक्तनियमस्यानित्यत्वकल्पनात्सुबंतात्परेनिसुबंतत्वज्ञानाव्यवहितोत्तरकालप्रवृतिकइत्यर्थः॥प्रत्ययांतरत्वे
नव्याख्यानादिति॥अस्यात्यंतस्वार्थिकायज्विधानार्थमित्यनेनान्वयः॥महाविभाषासंबंधस्यावश्यकत्वेनेति॥अस्यलक्ष्यानु
रोधादितिशेषः॥अतएवेति॥सुबुत्पत्तेःपूर्वमयजुत्पत्तेरेवेत्यर्थः॥ननुसुबुत्पत्यनंतरमयजुत्पत्तावप्युभशब्दात्सुबंतात्स्वार्थेऽय
चितःसप्तम्यांततस्त्रल्युभयत्रेतिरूपंसिध्यति॥नहिअवयवार्थकायजंतस्योभयशब्दस्यसर्वादिषुपाठःनस्वार्थिकायजंतस्ये
त्यत्रमानमस्तीतिचेन्न॥सुबुत्पत्यनंतरमयजुत्पत्तौनित्यमित्यत्रोभादित्यस्यसंबंधेनतस्यतत्प्रकृतिकसुबंतेलक्षणायोमानाभा
वेनसुपिपरतःभशब्दादयचितस्यसप्तमीरूपस्यसुपउभशब्दप्रकृतिकस्यसर्वनामप्रकृतिकत्वाभावेनत्रलाद्यनापत्तिरित्याशया
त्॥घकालतनेषुतिज्ञापकंतुसार्थकतद्धितविषयंनचोभशब्दपाठस्यत्रलाद्युत्पत्तिरपिप्रयोजनमस्त्वितिवाच्यं॥तथासत्युभ
स्यसर्वनामत्वेकिंप्रयोजनमकजर्थंपाठःक्रियतेउभकोकिमुच्यतेऽकजर्थमिति॥नपुनरन्यान्यपिसर्वनामकार्याणि॥अन्याभावो

द्विवचनटाद्विषयत्वादित्यादिभाष्यग्रंथसंदर्भसूचितप्रयोजनांतराभावाभिप्रायविरोधात्॥आद्युदात्तएवेति॥नांतोदात्तःचित्वेनांतो
दात्तस्यप्राप्तत्वेनोदात्तग्रहणवैयर्थ्यात्॥ननुकइदानीमन्यस्यैन्यत्रभवतिउभयोन्यत्रोभयशब्दोस्यान्यत्रभवतिइतिभाष्यं॥अस्यो
भशब्दस्यान्यत्रद्विवचनभिन्नेपरतउभयइतिरूपंभवति॥अयज्भवतीतिफलितोर्थः॥तथाचायच्प्रत्ययस्यद्विवचनभिन्नेपर
तएवविधानेनसुबुत्पत्तेःपूर्वमेवायजितिपूर्वग्रंथासंगतिः॥भाष्यसूचिताकजतिरिक्तसर्वनामकार्याभावविरोधश्च उभयत्रे
त्यादावुभशब्दात्सप्तमीद्विवचनोत्तरमेवत्रलुत्पत्याद्विवचनेचसतिअयजभावेनसर्वनामप्रकृतिकसप्तम्यंताभावेनत्रलनाप
त्यातदर्थउभशब्दपाठस्यावश्यकत्वादित्याशंक्याह॥द्विवचनविषयत्वाभावसंभावनेति॥परिनिष्ठितेप्रयोगेइतिशेषः॥तथा
चान्यत्रेत्यस्यद्विवचनपरत्वाभावेइतिनार्थःकिंतुपरिनिष्ठितेप्रयोगेद्विवचनविषयत्वाभावसंभावनायामित्येवार्थइतिनपूर्वो
क्तदोषद्वयमितिभावः॥नन्वेवमप्युभावित्यत्राप्ययच्स्यात्॥अयचिततोद्विवचनेपिपरिनिष्ठितेप्रयोगेउभशब्दस्यद्विचचन
परत्वाभावात्॥अयचाव्यवधानादित्यतआह॥उभयशब्दस्यवेति॥वस्तुतोयमार्थिकोऽर्थोनतुवाच्योऽर्थःअन्यत्रेत्यस्यप्रकृतद्वि
वचनभिन्नेएवशक्तत्वेनततोद्विवचनपरत्वाभावइत्यर्थलाभात्॥अस्येत्यस्योभवशब्दस्येत्यर्थेकइदानीमस्यान्यत्रभवतीत्यादि

भाष्यग्रंथस्यानन्वितार्थत्वापत्तेश्च भाष्याक्षरार्थस्त्वस्योभशब्दस्यपरिनिष्ठितेप्रयोगेद्विवचनभिन्नपरत्वेउभयवृत्तिरूपंबोध्य
मिति॥अत्रेरनेकाचइतिसूत्रस्थगतिकारकपूर्वस्येष्यतइत्यस्यैवार्थिकार्थएवतात्पर्येनवाच्येर्थे॥ननुयत्रद्विवचनविषयत्वाभा
वसंभावनातत्रैवायजितिनियमोव्यर्थः॥उभावित्यादौवृत्तेरभावेनवृत्तिविषयेविहितस्यायचोऽप्रवृत्तेः॥अकर्मकांतानुनायच्।अ
नभिधानादित्युक्तमेवेत्याशंक्यतत्फलमाह॥उभयोर्वासइति॥नन्वेवंसतिवृत्तिविषयइतिव्यर्थं॥उभावित्यादौद्विचचनपरत्वादे
वायचोऽप्रवृत्तेरितिचेत्सत्यं॥एतत्फलितार्थकथनमेववृत्तिविषयइति॥एवंचान्यत्रेत्यस्योभावित्यपिप्रत्युदाहरणंद्रष्टुंशक्यं
तत्परत्वविषयाभावेइति॥परिनिष्ठितेप्रयोगेतत्परत्वाभावसंभावनायामित्यर्थः॥यथाश्रुतमूलंतुनयुक्तं॥द्विवचनपरत्वाभाव
इत्युक्तौसंप्रतिद्विवचनपरत्वाभावाभावेनोभयत्रेत्यादावयजनापत्तेः॥नचांतरंगत्वाद्विभक्त्युत्पत्तेःपूर्वमयजापत्यातदैयर्थ्या
पत्तेः॥इत्यादौतुनेति॥अत्यंतस्वार्थिकायजितिशेषः॥निर्देशेनेति॥इदमुपलक्षणम्॥अत्यंतस्वार्थिकायचांतरंगत्वेसुब्युत्पत्तेः
पूर्वमेवोत्पत्तेःस्वीकारेणावयवार्थकायचःपूर्वंस्वार्थिकायच्उभशब्दस्यप्रकृतिकसुबंताभावेनोभादुदात्तइत्यस्यावयवार्थकाय
च्विधायकस्यनिर्विषयत्वापत्तेः॥अनभिधानमेववेति॥अत्रप्रमाणंतुकप्रत्ययस्यद्विवचनत्वमाश्रित्योभशब्दप्रत्याख्यानपरंभा

र्थं॥तथाहि॥द्विवचनशब्दस्यतत्संज्ञकपरत्वेरूपप्ययच्भवति॥द्वित्वविशिष्टार्थवाचकपरत्वेतुसनेतिफलभेदादनभिधानं॥ननूभशब्दपाठेमास्तु॥नचकप्रत्ययापत्तिः॥वृत्तिविषयेसुबुत्पत्तेःपूर्वमेवायजुत्पत्तिस्वीकारेणकप्रत्ययस्यचसुबुत्पत्यनंतरमेवोत्पत्त्यापूर्वमयच्ययजंतस्यसर्वादिषुपाठेनततोऽकचएवप्रवृत्तेः॥नचायजंतस्यसर्वनामत्वेप्युभशब्दस्यसर्वनामत्वात्ततःकप्रत्ययापत्तिरितिवाच्यं॥सुबुत्पत्तेःपूर्वमेवायजुत्पत्तिस्वीकारेणोभशब्दस्यासुबंतत्वेपिनततःकप्रत्ययप्राप्तिः॥प्रत्ययःपरःप्रयोक्तव्यएवेतिनियमेनोभशब्दायचोर्मध्येकप्रत्ययासंभवाच्चेत्याशंक्याह॥अयचोपीति॥कुतोनवाच्यइत्यतः॥तत्रहेतुमाह॥उपजीव्यत्वेनेति॥परिनिष्ठितेप्रयोगेद्विवचनपरत्वाभावोहिअयजुपजीव्यः॥यदिचायचिकृतेऽकच्स्यात्तदास्वार्थिकायजंतस्यद्वित्वविशिष्टबोधकत्वेनततोद्विवचनापत्तेोद्विवचनपरत्वाभावमुपजीव्यंव्याहन्येतेतिकप्रत्ययस्यैवप्राप्तिरित्यर्थः॥नन्वपपादेऽयचिनागरूकेकथंकइत्याशंक्याह॥अपवादस्त्वन्यत्रेति॥उपजीव्योपजीवकभावादन्यत्रेत्यर्थः॥तथाचद्विवचनपरत्वाभावसंपादनद्वारास्वोपजीव्यकप्रत्ययविघातकाकचोऽयच्ननिमित्तंभवतीतिनात्राकच्प्रवर्ततइत्यर्थः॥अतएवोपसर्जनव्याहृत्तिरिति॥इदमुपलक्षणं॥वृत्युत्तरमुपसर्जनेकुत्स्यादियोगासंभवात्॥ततःपूर्वंतद्योगेत्वकजिष्टएवेति॥अज्ञाताद्यर्थविशिष्टस्वार्थेइति॥सुबंतात्क

प्रत्ययविधानेप्यभिधानेप्यभिधानस्वाभाव्यात्सूत्रेविभक्तिविशेषस्यानुपादानाच्च ।अज्ञातत्वादिविशिष्टप्रातिपदिकार्थेए वकप्रत्य
यइतिभावः॥परेत्वित्यादि॥निषेधाश्चबलीयांसइति॥ननुस्वरतेर्वेट्त्वादृत्थनोःस्येइतिविप्रतिषेधेनेतिविप्रतिषेधानुपपत्तिः॥उक्त
न्यायेनविकल्पस्यबलवत्वादितिचेन्न॥ऋत्थनोःस्येइत्यस्यनिषेधबाधकत्वेननिषेधसमकक्षत्वात्॥नचैवमप्याकडारादन्यत्र
संज्ञायाबाध्यबाधकभावाभावादिदमयुक्तमितिवाच्यं॥विजातीययोस्तदभावेपिसजातीययोस्तदंगीकारात्॥नित्यविकल्पयोःसं
ज्ञयोरेकसंज्ञाधिकारबहिर्भूतयोरपितदंगीकारात्॥भावाभावयोर्विरोधेनतयोःसाक्षाद्विरोधात्॥साक्षादविरुत्थयोरेवैकसंज्ञाधिका
रबहिर्भूतयोस्तयोर्बाध्यबाधकभावाभावः॥साक्षाद्विरुत्थयोस्तुल्ययोःसास्त्येव॥यथातपरःतत्कालस्याणुदित्सवर्णस्येत्यनयोः॥अ
तएवपूर्वादीनांवैकल्पिकीसर्वनामसंज्ञोनित्यसंज्ञाबाधते॥नन्वेवंपूर्वेइत्यादौस्त्रीभावोत्तरंनस्यात्॥पूर्वपरेत्यादिनाजसिपरतःस
र्वनामसंज्ञाविकल्पविधानेनजसःसर्वनाम्नोविहितत्वाभावादित्याशंक्याह॥पूर्वपरेत्यादित्विति॥तथाचपूर्वेइत्यादौजसःपूर्वंप्र
वर्तमानांसर्वादीनीत्येतद्विहितांसर्वनामसंज्ञामुपजीव्य स्त्रीभावप्रवृत्तिरितिभावः॥नन्वसित्थंबहिरंगमित्यनेनांतरंगोत्तरंप्रवर्त्तमा
नबहिरंगस्यासित्थत्वेनाभावबोधेनान्नदोषइत्याशंक्यसमाधत्ते॥असित्थमिति॥नन्वंतरंगप्रवृत्युत्तरंप्रवृत्तिनिमित्तसद्भावाधीन

बहिरंगप्रवृत्तेरंतरंगपरिभाषयानिवारणाभावेपिबहिरंगाविकल्पिकीसर्वनामसंज्ञाऽसंभवादेवनप्रवर्त्तते ॥ नहिनित्यसंज्ञीत्तरंप्रवर्त्ति
मानमपिपूर्वपरेतिशास्त्रंसर्वनामसंज्ञायाअभावंबोधयितुंक्षमं॥भावाभावयोर्विरोधात्॥विधायकशास्त्रभेदेनसंज्ञाभेदेतुपूर्वपरेत्यादि
नास्वविहितसंज्ञायाअभावबोधनेपिसर्वादीनीत्येतद्विहितायाअभावाबोधनात्॥तामाश्रित्यनित्यंशीभावोदुर्वार इत्याशंक्याह॥त
दुत्तरमपीति॥शास्त्रभेदेनसंज्ञायाभेदाभावेपिजातसंज्ञायाएवपूर्वादिष्विवोभयोरपिअभावबोधनंसंभवति॥लुगादिनेवजातनि
वृत्तेरंगीकारादितिभावः॥ननुप्रथमचरमेत्यादौजसीतिविषयसप्तमीतथाचांतरंगबहिरंगयोर्युगपत्प्राप्तौऽतरंगबलीयइत्यस्यान्न
विषयोस्त्येवेत्याशंक्याह॥जसीति॥तदुत्तरमेतद्विषयादिति॥तथाचप्रातिपदिकसंज्ञोत्तरमेवशीभावविषयसत्वेनतदुत्तरमेववें
कल्पिकीसर्वनामसंज्ञानित्यसर्वनामसंज्ञातुप्रातिपदिकसंज्ञासमकालमेवेतिनतयोर्युगपत्प्राप्तिरितिभावः॥आनुमानिकानये
ति॥अंतरंगंबलीयइत्यनयाऽसित्थंबहिरंगमित्यनयावेत्यर्थः॥नन्वास्तेयथोद्देशेनित्यपाक्षिकयोर्युगपत्प्राप्त्यभावः॥ततएवचांतरंगं
बलीयइत्यस्याप्रवृत्तिश्च तथापिकार्यकालपक्षेस्त्येवतयोर्युगपत्प्राप्तिः॥शीभावप्रवृत्तिकालएवनित्यसंज्ञाप्रवृत्तेरित्याशंक्याह
सर्वनामसंज्ञायामिति॥उक्तयुक्त्येति॥सर्वनाम्नोविहितत्वेनशीभावस्तिथिरित्युक्तयुक्त्येत्यर्थः॥यद्यपिकथंचिद्युगपत्प्रवृत्तिंगृ

ह्मित्वांऽतरंगबलीयइतिनित्यसंज्ञाप्रवृत्तावपितदुत्तरबहिरंगइतिपूर्वशेखरोक्तयुक्त्यासूपपादा॥अन्यथांतरंगबलवदित्यस्यविष
याभावेपिप्रातिपदिकसंज्ञासमकालमेवसर्वनामसंज्ञांगीकारात्तन्निवृत्तिर्नस्यात्॥तथाप्यंतरंगबलवदितिन्यायेनबाधितस्यपुनरप्र
वृत्तिरित्यभिप्रायेणेदं॥अतएवेति॥उक्तयुक्त्यानित्यसंज्ञायाःवैकल्पिकसंज्ञायाबाधायोगादेवेत्यर्थः॥नातिप्रसंगइति॥नषट्स्वस्रादि
भ्यइतिनिषेधोपिबोध्यः॥नन्वेवंप्रत्याहाराश्रयणेटिढुतिसूत्रेतयप्ग्रहणंव्यर्थमित्याशंक्याह॥तयप्ग्रहणंत्विति।अवयुत्यावयवेने
कदेशेन॥अवयुत्येतिल्यबंतंवेति॥अवयुत्यानुवादइतिपाठेत्ववयुतेःप्रत्याहारैकदेशस्यानुवादइतिषष्ठीसमासः॥ननुस्थानिवदित्य
तिदेशप्रापितायानिरवकाशत्वाच्चेत्ययुक्तं॥द्वयेइत्यादौसावकाशत्वाच्चेत्याशंक्याह॥अनभिधानमेवेति॥वस्तुतोनेदंयुक्तं॥अनभि
धानेप्रमाणाभावात्॥धातोश्चद्वयेप्रत्ययास्तिङःकृतश्चेतिभाष्यप्रयोगाच्च॥अन्येतुसर्वनामसंज्ञायांकार्यकालपक्षएवतत्पक्षेचसंज्ञा
याःकार्यनिमित्तनिमित्तित्वं॥अतएवपूर्वपरेत्यादिचरितार्थं॥अन्यथापूर्वेनित्यसर्वनामसंज्ञायांततएवनित्यंशीभावप्रवृत्तौतद्वेय
र्थ्यं॥नचास्मिन्पक्षेसर्वनाम्नोविहितत्वाभावेनोभयेइत्यादौशीभावानापत्तिः॥विहितविशेषणतायश्चयणात्॥अदंतात्सर्वनाम्नःपर
स्यप्रत्यासत्यातत्पर्याप्तांगसंज्ञानिमित्तस्यजसःशीत्यादिरूपेणवाक्यार्थबोधांगीकारेणविहितविशेषणफलसित्थेः॥नांतरंगबलीयइ

हासंज्ञाकरणानुपयोगात्॥एकपदोपस्थाप्ययोरिति॥यत्तुपरेषांकृतीष्टसाधनत्वयोर्लिङ्पस्थाप्ययोःपरस्परान्वयस्यदृष्टत्वात्पा
तोःपृथक्फलव्यापारोशक्योचेत्तयोरुद्देश्यविधेयभावेनान्वयापत्तिः॥पृथगुपस्थितयोस्तयोस्तथान्वयस्यौत्सर्गिकत्वादिति मं
जूषायांफलव्यापारयोःपृथक्शक्तिवादस्यस्वयमपिदूषितत्वाच्चिंत्यमेतदितिपाठकेनोक्तंतन्न॥कृतीष्टसाधनत्वयोर्लिङ्त्वा
ख्यातत्वादिशक्तताव च्छेदकभेदेनशाब्दबोधविषययोस्तथान्वयांगीकारेपीतरत्रतथान्वयेमानाभावात्॥मंजूषाग्रंथस्तुपृथगुप
स्थितयोस्तथान्वयस्यौत्सर्गिकत्वादेकपदोपस्थाप्ययोरन्वयांगीकारेएवमन्वयःस्यादित्येवंपरः॥अतएववषट्कर्तुःप्रथमभक्ष
इत्यादौभक्षप्राथम्ययोर्नोद्देश्यविधेयभावेनान्वयः॥यद्यप्येवकारार्थयोरन्ययोगव्यवच्छेदयोःपरस्परमन्वयोस्ति॥तथापिनोद्देश्य
विधेयभावेनसः॥अगतिकगतिश्चेतिनदोषः॥निपातातिरिक्तनामपदोपस्थाप्ययोस्तथान्वयांगीकाराद्वा॥अन्यतरवियोगेनेति।य
त्तुअरिमेदःपलाशश्चबाहुःकल्पद्रुमश्चतेइतिपदश्लेषोदाहरणेऽरीणांमेदःपलंचाश्नातीत्यरिमेदःपलाशसोबाहुररिमेदसंज्ञ
कःपलाशसंज्ञकश्चकल्पद्रुमइत्यर्थकेपरस्परमुद्देश्यविधेयभावेनान्यतरवियोगेनान्यत्रान्वयस्यदृष्टत्वादिदंचिंत्यमतएवदुष्ट
पदंश्रुतिकटुच्युतसंस्कृतीतिपददोषविशेषलक्षणसूत्रे॥ननुश्रुतिकटुप्रभृतिशब्दानांलक्षणपरत्वेविभागपरत्वाभावाल्लक्ष्या

थाचात्रसूत्रकृद्भाष्यकृन्मतेविरुत्थेएव॥उत्तरमुनिस्मृतिश्चप्रबलेत्येवतत्वं॥विभाषादिगितिसूत्रस्थंभाष्यंत्वेकदेश्युक्तिरित्याहुः।न
नुसर्वार्थवाचकत्वंसर्वविश्वयोरेवनत्वन्येषामपीत्यतआह॥प्रसिद्ध्यस्वीयेति॥तथाचस्वप्रवृत्तिनिमित्तसमानाधिकरणकत्वंध
र्माश्रयवाचकत्वंसर्वार्थवाचकत्वं॥मानाभावइति॥तेनत्यदादीनीत्येकशेषोपिसंज्ञोपसर्जनयोर्न॥त्यदादीनिचेतिवृत्यसंज्ञापिना
मपदस्वारस्येनेति॥ घटपदंघटत्वस्यनामेत्यप्रयोगादितिभावः।पूर्वादिसंग्रहायेति॥ननुदिग्वाचकपूर्वादीनांनस्वप्रवृत्तिनिमित्त
समानाधिकरणकत्वंधर्माश्रयवाचकत्वमितिचेन्न॥सर्वेषामेववर्षाणांमेरुरुत्तरतःस्थितइतिप्रमाणानुरोधेनतत्तद्वर्षवासिनांसू
र्योदयाधिकरणत्वेनपरिदृश्यमानभागविशेषाणामेवतत्तद्देशवासिनःप्रतिपूर्वादिकत्वांगीकारेणसर्वार्थवाचकत्वोपपत्तेः॥ननु
द्वयोस्त्रिषुवासंकेतितसर्वादीनांसर्वनामसंज्ञादुर्वारासर्वार्थवाचकत्वादित्याशंक्याह।संज्ञाव्यावर्त्तयेइति॥अभिव्यक्त्येतिन्यायमूलके
ति॥नन्वस्यन्यायस्ययत्तदितिचेत्सत्यं॥अभिव्यक्तेतिन्यायस्यपदकार्यविषयकत्वमन्यत्रोक्तंतुहेयमेव॥तथाचायंन्यायःप्राति
पदिककार्यविषयेपि॥अतएवसंज्ञात्रिशब्देत्रयादेशाभावः॥युष्मदस्मद्भ्यांङसोश्यादौआत्वाद्यभावश्चअर्थनिर्देशःप्रातिप
दिककार्येप्येतत्प्रवृत्तेर्लिंगं॥सर्वनामपदत्वांशएवेति॥इतरांशस्तुयोगार्थानुगुणानामेवसंज्ञित्वसूचनायेतिभावः॥अन्यथाम

द्रेऽतरंपश्यति॥आत्मीयेऽतरेजनाः॥विनार्थेउदाहरणंमृग्यं॥बहिरर्थेअंतरेचंडालगृहाः॥अवसरेऽतरज्ञःसेवकः॥मध्येऽनयोरं
तरेशैलाः॥अंतरात्मनि॥अन्योंतरआत्माऽनंदमयः॥चकारात्सदृशार्थोपि॥यथास्थानेंतरतमः॥विनाबहिःशब्दयोरव्ययत्वेपिचार्थ
योगमाश्रित्यद्वंद्वः॥नत्वकजाद्युदात्तत्वादाविति॥अकजाद्युदात्तत्वेतुनित्यस्तः॥तयोःकर्तव्ययोःसतोःसर्वादी नीतिनित्यसं
ज्ञासत्वात्॥सातुश्रीभावोपयोगिनी॥श्रीभावेविकल्पविधानसामर्थ्यात्॥वर्णाश्रमेतरेइत्यादौतुनैते॥द्वंद्वेचेतिनित्यसंज्ञानिषे
धात्॥विकल्पस्यचश्रीभावमात्रफलकत्वात्॥एवंप्रथमेइत्यादावपिनते॥बोधकत्वरूपेति॥लोकेइतिशेषः॥वस्तुतस्त्वेकार्थी
भावकल्पनातःपूर्वमेवाकचःप्राप्तिर्बोध्या॥अंतरंगानपीतिन्यायस्तुसंज्ञातिरिक्तांतरंगबाधकत्वविषयः॥अर्थातिरिक्तनिमि
त्तविनाशकविषयोवा॥ननुसचसमासेपिश्रूयेतेत्यस्याति भवकानित्येवदृष्टंततयाप्रदर्शनीयः।अतिक्रांतइत्यादिकंतुनप्रदर्शनी
यं॥प्रकृतासंगतेरित्याशंक्याह॥अतिक्रांतइत्यादीति॥तथाचातिक्रांतोभवकंतमितिलौकिकविग्रहवाक्यइवालौकिकेप्रक्रिया
वाक्येप्रवर्त्तमानोऽकच्यथातिभवकानितिसमासेश्रूयतेततथात्वंकपितेतिलौकिकविग्रहवाक्यइवालौकिकेवाक्येप्रवर्तमानोऽक
च्त्वत्कपित्कइतिसमासेपिश्रूयेतेतिमूलार्थइतिभावः॥प्रत्यंगमंतरंगं॥एतच्चेति॥भाष्यकृत्करिष्यमाणसूत्रप्रत्याख्यानस्यसू

त्रकृदभिमतत्वमित्यर्थः भाष्येध्वनितमितिएवंहितत्रभाष्यं॥क्वायमकारः श्रूयतेनक्वचिच्छ्रूयतेलोपोस्यभवति॥यदिनक्वचिच्छ्रू
यतेकिमर्थमिदमुच्यतेनलोपएवोच्यते॥नैवंशक्यंलोपेसतिगुणःप्रवर्तेत॥अत्वेचनसतिअकारलोपस्यस्थानिवद्भावादुणोनभ
विष्यति॥ननुचलोपेपिनधात्विितिनिषेधोभविष्यति॥आर्धधातुकनिमित्तेलोपेप्रतिषेधः॥नचैषआर्धधातुकनिमित्तोलोपः॥अपि
चप्रत्याख्यायतेखल्वपिसयोगः॥तस्मिन्प्रत्याख्यातेगुणःस्यादेवेति॥एवंचप्रत्याख्यानविरुत्थफलकसूत्राश्रयकल्पनंवृत्तिकारेण
मनुचितमितिसूचितंतदाह॥एवंचेति॥कैयटेस्पष्टमिति॥नन्वेवंसूत्रमतेतिसर्वायेत्यादौस्मैप्रसंगः॥बहुव्रीहिग्रहणसोपसर्जनोप
लक्षणत्वात्॥संज्ञायांतुव्यवस्थायामसंज्ञायामितिष्टयक्कृत्यनिषेधोबोध्यः॥अंतर्गणकार्यमप्यनुपसर्जनादित्यस्याकारावनु
पसर्जनस्यद्रष्टव्यावित्यर्थेनपरिहर्त्तव्यं॥सत्वमप्यर्थाधिकारात्श्रयणेनपरिहर्त्तव्यं॥अन्येतुप्रियविप्रिविश्वायोपसर्जनप्रतिषेधेनाप्ये
तत्सित्थमितिनबहुव्रीहाविितिसूत्रस्थभाष्येणनकोपधायाइत्ययंयोगःपुंवद्भावमात्रस्यविषयेतत्तउत्तरमाद्यस्ययोगस्यविषयइति
नकोपधायाइतिसूत्रस्थभाष्येणसूत्रेष्वेवहितत्संवेयदृतौयच्चवार्तिकेइत्यभियुक्तोक्त्याचसंज्ञोपसर्जनप्रतिषेधोपिसूत्रकृत्संमतए
व॥अतएवबहुव्रीहिपदस्यतदर्थालौकिकवाक्यपरत्वंलक्षणयास्वीकृत्यत्वत्कपितृकइत्यादावकजभावःफलमित्युक्तंभाष्ये॥त

थाचात्रसूत्रकृद्भाष्यकृन्मतेविरुत्थेएव॥उत्तरमुनिस्मृतिश्चप्रबलेत्येवतत्वं॥विभाषादिगितिसूत्रस्थंभाष्यंत्वेकदेश्युक्तिरित्याहुः।न
नुसर्वार्थवाचकत्वंसर्वविश्वयोरेवनत्वन्येषामपीत्यतआह॥प्रसित्थस्वीयेति॥तथाचस्वप्रवृत्तिनिमित्तसमानाधिकरणकृत्सध
र्माश्रयवाचकत्वंसर्वार्थवाचकत्वं॥मानाभावइति॥तेनत्यदादीनीत्येकशेषोपिसंज्ञोपसर्जनयोर्न॥त्यदादीनिचेतिवृत्थसंज्ञापिना।ना
मपदस्वारस्येनेति॥ घटपदंघटत्वस्यनामेत्यप्रयोगादितिभावः।पूर्वादिसंग्रहायेति॥ननुदिग्वाचकपूर्वादीनांनस्वप्रवृत्तिनिमित्त
समानाधिकरणकृत्सधर्माश्रयवाचकत्वमितिचेन्न॥सर्वेषामेववर्षाणांमेरुरुत्तरतःस्थितइतिप्रमाणानुरोधेनतत्तद्वर्षवासिनांसू
र्योदयाधिकरणत्वेनपरिदृश्यमानभागविशेषाणामेवतत्तद्देशवासिनःप्रतिपूर्वादिकत्वांगीकारेणसर्वार्थवाचकत्वोपपत्तेः॥ननु
दूयोस्त्रिषुवासंकेतितसर्वादीनांसर्वनामसंज्ञादुर्वारासद्वीर्थवाचकत्वादित्याशंक्याह।संज्ञाव्यावर्त्तयेइति॥अभिव्यक्त्येतिन्यायमूलके
ति॥नन्वस्यन्यायस्ययत्तदितिचेत्सत्यं॥अभिव्यक्तेतिन्यायस्यपदकार्यविषयकत्वमन्यत्रोक्तंतुहेयमेव॥तथाचायंन्यायःप्राति
पदिककार्यविषयेपि॥अतएवसंज्ञात्रिशब्देत्रयादेशाभावः॥युष्मदस्मद्भ्यांङसोश्यादौआत्वाद्यभावश्चअयंनिर्देशःप्रातिप
दिककार्येप्येतत्प्रवृत्तेर्लिंगं॥सर्वनामपदत्वांशएवेति॥इतरांशस्तुयोगार्थानुगुणानामेवसंज्ञित्वसूचनायेतिभावः॥अन्यथाम

हासंज्ञाकरणानुपयोगात्॥एकपदोपस्थाप्ययोरिति॥यत्तुपरेषांकृतीष्टसाधनत्वयोर्लिङ्पस्थाप्ययोःपरस्परान्वयस्यदृष्टत्वात्था
तोःपृथक्फलव्यापारोशक्योचेत्तयोरुद्देश्यविधेयभावेनान्वयापत्तिः॥पृथगुपस्थितयोस्तयोस्तथान्वयस्योत्सर्गिकत्वादिति मं
जूषायांफलव्यापारयोःपृथक्शक्तिवादस्यस्वयमपिदूषितत्वाच्चिंत्यमेतदितिपाठकेनोक्तंतन्न॥कृतीष्टसाधनत्वयोर्लिङ्त्वा
ख्यातत्वादिशक्तावच्छेदकभेदेनशाब्दबोधविषययोस्तथान्वयांगीकारेपीतरत्रतथान्वयेमानाभावात्॥मंजूषाग्रंथस्तुपृथगुप
स्थितयोस्तथान्वयस्योत्सर्गिकत्वादेकपदोपस्थाप्ययोरन्वयांगीकारेएवमन्वयःस्यादित्येवंपरः॥अतस्ववषट्कर्तुःप्रथमभक्ष
इत्यादौभक्षप्राथम्ययोर्नोद्देश्यविधेयभावेनान्वयः॥ यद्यप्येवकारार्थयोरन्ययोगव्यवच्छेदयोःपरस्परमन्वयोस्ति॥तथापिनोद्देश्य
विधेयभावेनसः॥अगतिकगतिश्चेतिनदोषः॥निपातातिरिक्तनामपदोपस्थाप्ययोस्तथान्वयांगीकाराद्वा॥अन्यतरवियोगेनेति।य
त्तुअरिमेदःपलाशश्चबाहुःकल्पद्रुमश्चतेइतिपदश्लेषोदाहरणेऽरीणांमेदःपलंचाश्नातीत्यरिमेदःपलाशसोबाहुररिमेदसंज्ञ
कःपलाशसंज्ञकश्चकल्पद्रुमइत्यर्थकेपरस्परमुद्देश्यविधेयभावेनान्यतरवियोगेनान्यत्रान्वयस्यदृष्टत्वादिदंचिंत्यमतंएवदुष्ट
पदंश्रुतिकटुच्युतसंस्कृतीतिपददोषविशेषलक्षणसूत्रे॥ननुश्रुतिकटुप्रभृतिशब्दानांलक्षणपरत्वेविभागपरत्वाभावाल्लक्ष्या

नुपस्थितौकथंलक्षणवाक्यत्वनिर्वाहइत्याशंक्यरूढियोगाभ्यामुभयार्थोपस्थितौलक्ष्यलक्षणयोरपिप्रत्ययः॥यथाघ्राणरस
नचक्षुस्त्वक्श्रोत्राणिइंद्रियाणिभूतेभ्यइतिगौतमीयेंद्रियलक्षणसूत्रेइतिकाव्यप्रदीपकृताव्याख्यातमितिपाठकेनोक्तंतन्न॥
अरिमेदपलाशशब्दोहियोगरूढोमंडपादिशब्दवत्॥नतुयोगरूढोरूढोवृक्षयोर्मेदःपलानशितृत्वात्॥ससर्वनामशब्दस्तुयोगरू
ढः॥योगरूढस्थलेचशेखरोक्तोनियमइतिनोक्तश्लेषोदाहरणविरोधः॥काव्यप्रदीपकृदुक्तिस्तूक्तनियमविरोधेनप्रौढिवाद
रूपइतिदिक्॥ननुसर्वनामपदस्ययोगरूढत्वेनतदनुगुणानामेवसंज्ञित्वकल्पनात्॥नतूपसर्जनादीनांसर्वादीनांगणादहिर्भाव
स्तथाचा तिसर्वायेत्यादौसमुदायस्यसंज्ञादुर्वारा॥तस्यप्राधान्येनस्वीयप्रकृत्तिनिमित्तवत्सर्वोपस्थापकत्वादित्याशंक्याह॥तदं
तत्वेइति॥अवयवद्वारेति॥व्याख्यानादंतावयवद्वारोक्तसर्वार्थवाचकानामेवसंज्ञित्वकल्पनायामुपसर्जनस्यसर्वादिबहिर्भाव
अर्थादापत्तितः॥योगार्थाननुगुणत्वेनतस्यतत्वेमानाभावादितिभावः॥येनविधिरितिसूत्रेकैयटेनोक्तंपक्षंदूषयति॥एतेनेति॥
आक्षेपंविनेवोक्तरीत्यानिर्वाहसंभवेनेत्यर्थः॥इतोलघुरिति॥वस्तुतःप्राप्ताप्राप्तविवेकन्यायाद्यनुसंधानादाद्यपक्षोप्येतत्पक्षस
मएव॥इतरविशेषणत्वेनार्थोपस्थापकत्वमिति॥तेषांघनइत्यादौतुतच्छब्दस्येतरविशेषणतयास्वार्थबोधकत्वेपिनतथोपस्थि

तिजनकत्वंउपस्थितेशक्तिग्रहासमानविषयत्वात्॥नन्वेवंपरस्मैभाषाइत्यादौस्मैभावोनस्यादितिचेन्न॥अंतरंगत्वेनस्मायाद्
षुकृतेष्वेवसमाससंज्ञाप्रवृत्तेः॥समासस्यविप्रयोज कत्वाभावेनांतरंगानपीतिन्यायाविषयत्वात्॥एजकुमारीपुत्रइत्यादौह्र
स्वकारणप्रकारेणनिर्वाहसंभवाच्च॥अत्रसंज्ञोपसर्जनीभूताइतिवार्त्तिकारंभादन्वर्थसंज्ञाश्रयणमेवश्रेयःसंज्ञोपसर्जनीभूतप्रथ
मचरमादीनांसंज्ञाव्यावर्त्तयइतिबोध्यं॥नावयवानामिति॥केचित्तुमासपूर्वायेत्यादौस्मायादिवारणायविहितविशेषणाश्रयणेगो
रवात्सप्तमीनिर्देशानुरोधाच्चतृतीयासमासेविद्यमानसर्वादीनांनिषेधःसचपूर्वोक्तरीत्यापाठाद्बहिर्भावद्वारेवेतिसर्वाद्यंतत्वप्रयु
क्तसर्व नामसंज्ञासमुदायेनप्रवर्त्तते॥स्पष्टंचेदंविभाषादिगितिसूत्रेवृत्तिपदमंजर्यांः॥अतएवभाष्येत्रसूत्रेसमासइतिवर्त्तमा
नेपुनस्तदनुवादोनंयोगविभागेनवाक्येनिषेधार्थमित्युक्तं॥प्रथमार्थकसप्तमीनिर्देशेतुतदनुपपत्तिरित्याहुः॥अवयवस्यानिषेधे
फलाभावइति॥केचित्तुविहितविशेषणानाश्रयणेएवंसतिसंभवतीतिवर्णाश्रमेतराणामित्यादौसुडभावस्तत्फलमित्याहुः॥अ
न्यथातएवेति॥अवयवनिषेधवादिनस्तवेत्यर्थः॥अतएवेति॥उक्तरीत्याऽवयवेभ्यःएयक्तदनुत्पत्तेरेवेत्यर्थः॥अन्यथासमुदाय
स्यशीभावेकर्त्तव्येएवविकल्पोप्यवयवस्यनित्यसर्वनामसंज्ञामाश्रित्याकचोदुर्वारतयातदसंगतिः॥ममत्ववयवस्यसर्वनामत्वेपि

तदर्थमात्रेकुत्सान्वयाभावेनाकजभावः॥समुदायकुत्सामादायतुनाकच्समुदायस्यासर्वनामत्वादितिभावः॥नन्ववयवकुत्साविव क्षायाउक्तरीत्याऽभावेऽकचःप्राप्तिरेव नेतिशीभावंप्रतिविभाषाऽकजभि न भवतिइतिभाष्यंपुनरसंगतमेवेत्यतआह॥समुदायेति॥ यद्वातएवेत्यस्यावयवमात्रस्यनिषेधाभावादेवेत्यर्थः॥तथात्वेहिसर्वाद्यर्थकसर्वाद्यंतत्वेनसमुदायस्यनित्यसर्वनामसंज्ञायामकच् स्यादेवेतिभाष्यासंगतिः॥अकजभिनभवतीति॥ननुकृताकचासमासेनानेनविकल्पः॥अज्ञाताद्यर्थकत्वेनासर्वार्थकत्वात्॥पूर्वेद्वं द्वेजशिसर्वनामसंज्ञाविकल्पेपश्चादवयवकुत्सामादायाकचिशीभावविकल्पघटितंरूपमित्यवयवकुत्साद्यर्थकाकजभिप्रायकत्वमप्य कजभिनभवतीतिभाष्यस्यसंभवतीत्याशंक्याह॥तत्रेति॥मानाभावाच्चेति॥अन्येतुदंडिनायनसूत्रेस्वरसर्वनामेकश्रुत्याद्वयोरे ष्वाकशब्दयोरिवोदात्तानुदात्तयोस्त्वशब्दयोःसकृत्पठितेनग्रहणेसित्येचत्वेत्युभयपाठःएकस्यतांतत्वेमानमित्याहुः॥जरा यांजरसन्यतरस्यां॥अक्तपरिमाणस्येति॥परिच्छिन्नपरिमाणस्येत्यर्थः॥स्थानिबुद्ध्येवेति॥नचैवंलावस्यायामप्यपिबदित्यादौ आगमिबुध्यासाट्कस्यपिबादेशा पत्तिरितिवाच्यम्॥उक्तयुक्त्यानिर्दिश्यमानत्वाप्राप्तावपिपादःपदितिसूत्रस्थभाष्यप्रामाण्येन सागमस्यनिर्दिश्यमानत्वानंगीकारात्॥अन्येतुनिर्दिश्यमानत्वंस्वबोध्याघटितत्वेसतिस्वबोध्यत्वं॥तच्चसागमकेतदंतेचनाआदेशे

त्वस्त्येवेतितत्रनिर्दिश्यमानपरिभाषयाऽदेशवारणं॥यद्वास्वंरूपमित्येतद्विन्नशक्तिग्राहकशास्त्राननुसंधानकालीनस्थानषष्ठ्यं
तपदजन्यो पस्थितिविषयत्वरूपनिर्दिश्यमानत्वमादेशेपि॥यदागमन्यायेपिशक्तिग्राहकएव॥अस्यच्चावित्यादेर्जातिपक्षेऽथ
वायतःषष्ठ्युच्चारितातत्वतत्सान्निकत्वान्यतरत्वं॥तिसृणामित्यत्रतिस्रादेशेकृतेत्रयादेशाशंकापरभाष्यप्रामाण्यादित्याहुः॥वैचि
त्र्यायेति॥नचपदत्वभत्वयोर्द्वयोरननुसंधानेपिनापिनिर्जरसेत्यादिसित्थेरतस्तयोरलेखः॥अन्येतुदद्ड्यामान्भ्यामित्येतदर्थंस्वादि
ष्वित्यस्यावश्यपाठ्यतयादत्तइत्यादेर्जश्त्वशंकायांयचिभमित्यपिपाठ्यमितिविशेषइतिवाच्यं॥तथासतिशिवार्च्यइत्युदाहरणे
प्रथमयोःपूर्वसवर्णेनादिचीत्यनयोरनुपन्यसनीयत्वापत्तेः॥तद्भावपक्षेतस्याप्राप्तेरिति॥अभावपक्षोपक्रमेपुनर्भावपक्षस्वीका
रायोगादितिभावः॥तस्याप्राप्तेत्यस्य॥जरसादेशस्याप्राप्तेरित्यर्थः॥पाठकस्तु तस्याप्राप्तेतिपाठंस्वीकृत्यसंनिपातपरिभाषायाअप्रा
प्तेत्यर्थमाह॥ध्वनितंचेदमिति॥नपुंसकद्वितीयैकवचनेजरसभावइत्येतदर्थमित्यर्थः॥भवितव्यमिति॥उक्तमितिशेषःप्रश्लेषआ
वश्यकइत्युत्तरमित्याहुः॥परत्वेत्यपपाठः॥विभक्त्यादेशानामिति॥पूर्वोक्तोपलक्षणविभक्तिसंबंधिकार्यमात्रस्येत्याह॥विभक्ति
संबंधीति॥इत्याहुरिति॥अन्येतुनुम्जरसाविति वार्त्तिकेनुम्पदंलक्षणयामुम्शीभावोभयपरम्॥यद्वानित्यत्वात्पूर्वंशी भावःजर

सादेशस्तुननित्यः॥शीभावेकृतेनुमितद्प्राप्तेरितिशंकापरिहारायय॥शीभावोत्तरमपिविप्रतिषेधेनजरसः प्राप्तिरितिभाष्यकृतोक्तं
नंतुशीभावोत्तरमेवजरसित्याशयेन॥अयंविप्रतिषेधोपन्यासःजरसोनुमासमबलतामभ्युपेत्य॥वस्तुतोजरसादेशः सर्वविधि
भ्योबलवान्जरसोऽवकाशोजरसाजरसेइतिजरयाइतिसूत्रस्यभाष्यप्रामाण्यात्॥अन्य याजरसइत्यत्रजरसादेशात्परत्वाद्याडाप
इतियाडितिदसंगतिः॥एवंचविभक्तिसंबंधिकार्यमात्रंपूर्वविप्रतिषेधेनेत्यस्कावकाशः॥जरसादेशस्यसर्वतःप्रबलत्वात्ए
तेनएवंस्त्रियांजरसादेशेकृतेइत्यारभ्यतेषांपरत्वादित्यंतोग्रंथोनिरस्तोवेदितव्यः॥तथाचपुंसिनिर्जरेणनिर्जरसेत्यादिरूपंस्त्रियां
जरायेजरसइत्यादिभवति॥नचैवंटाङसीतिसूत्रस्थकैयटसंगतिरितिवाच्यं॥वैकल्पिकत्वेनप्रथमंजरसादेशाभावेइनादेशेकृ
तेपश्चात्प्राप्तस्यजरसः सन्निपातपरिभाषयाबारणमित्याशयात्॥नचाऽभावोपक्रमेपश्चान्नभावापह्नादरणं॥अन्यथाशिष्वि
यतुरित्यादौद्वित्वोत्तरंविभाषाश्वेरितिसंप्रसारणापत्तिरितिवाच्यं॥अकारनिमित्तकस्यजरसोऽभावोपक्रमेपिइकारनिमित्तकस्या
भावानुपक्रमात्॥शिष्वियतुरित्यादौतुशिवुत्यैवपश्चात्प्रवृत्तेर्विशेषः॥नपुंसकद्वितीयैकवचनेतुजरसादेशोभवत्येव॥अथेहतु
कस्मान्नभवतिअति जरसंपश्येतिभाष्यात्॥अम्लुक्भ्यांजरसःपरत्वाच्च॥नचलुकःसर्वविधिभ्यःप्राबल्यंबहिरंगलुकएवतथा

त्वात्॥स्वमोरितिसूत्रस्थंत्यदादिभ्यश्चेतिवक्तव्यमितिवार्तिकंमानंतेनभवनादित्यत्रलुकंबाधित्वातातङ्॥अतिजरमतिजरैरिति
भवितव्यमित्यग्रिमभाष्यतुप्रथमैकवचनविषयं॥ध्वनितंचेदंजरायाइतिसूत्रेभाष्येतथाहि॥अथेहलुक्कस्मान्नभवतिअतिजरसं
पश्येतिपूर्वपक्षिणाशंकितंततःपूर्वंक्षिणाःस्यत्रविशेषः॥नाकृतेऽम्भावेजरसादेशःप्राप्नोतिकिंकारणमचीत्युच्यते॥नचायं
परिहारःद्वितीयैकवचनेष्यवशिष्टइतिवाच्यं॥अनवबोधात्॥किंकारणमचीत्युच्यतइत्यंतएवविशेषप्रतिपादनपरोनात्रसः॥त
स्यचायमाशयः॥अतोमित्यम्प्रवृत्तिंविनानजरसभावःसोर्हलादित्वात्॥अम्भावेतुनलुक्॥अमाबाधितत्वात्॥अमाबाधितस्या
पिपुनःप्रवृत्तौज्ञानमित्यत्रापितदापत्तिरिति॥नचजरसादेशार्थंसोरम्विधानेऽकारादेशविधानेनैवसित्थाबम्विधानवैयर्थ्यात्त
तोद्वितीयैकवचनेलुकंसमाधत्तेसित्थांती॥यदाचजरस्भावःकृतस्तदालुक्नभविष्यति॥सन्निपातलक्षणोविधिरनिमित्त मि
ति॥यदावेत्यस्यामंलुकंचबाधित्वापरत्वादितिशेषः॥ततःपुनःपूर्वपक्षीप्रथमैकवचनेतृतीयाबहुवचनेचशंकते॥यद्येवमतिज
रसाऽतिजरसैरितिनप्राप्नोति॥अतिजरमतिजरैरितिभवितव्यमिति॥लक्ष्यानुरोधाज्जरसादेशविषयेसन्निपातपरिभाषाना श्री
यतइतिचेन्नभावः॥ततःसित्थांत्याह॥गोर्नदीयआह॥इष्टमेवैतत्संगृतमित्यादि॥किंकारणमचीत्युच्यतेऽम्भावेकृतेसन्निपातपरिभा

षयानजरसितिनव्योक्तपाठोत्तरंतुभाष्यपुस्तकेषुक्वापिनोपलभ्यते॥पूर्वग्रंथासंगतश्च प्रथमेकवचनेऽतिजरसंतिष्ठतीत्यत्रलुक्कु
तोनशंकितइतितटस्थेनशंकितेसन्निपातपरिभाषयाजरसादेशाप्रवृत्त्यो क्तरूपमेवदुर्घटमितिसमाधानस्यपाठांतरकल्पनया
भवदभिप्रेतस्यप्र तिपादनायास्त्यत्रविशेषइत्युक्त्यसंगतेः॥तथोक्त्याहिअतिजरसंतिष्ठतीतिरूपंस्वीकृत्यविशेषमात्रमभिधित्सि
त्तमितिप्रतीयते॥किंचास्त्यत्रविशेषः॥नात्राकृतेऽम्भावेजरसादेशःप्राप्नोतिकिंकारणमचीत्युच्यतेऽम्भावेकृतेसन्निपातप
रिभाषयानजरसितिभवत्कल्पितपूर्वभाष्येणप्रथमेकवचनेऽम्भावोत्तरमेवजरस्प्राप्नोति॥द्वितीयैकवचनेत्वमादेशात्प्रागेवपर
त्वाज्जरसितिलभ्यते॥तच्चविभक्त्यादेशाःपूर्वविप्रतिषेधेनेतिवदत्तस्तवविरुत्थम्॥यद्येवमतिजरसमतिजरसैरितिनप्राप्नोती
तिभाष्यस्यभवदुक्तंद्वितीयैकवचनाभिप्रायकत्वमपिनयुक्तं॥यद्येवमितिपदस्वारस्येनपूर्वग्रंथोक्तंयुक्तिमुपजीव्येयंशंकेतिप्र
तीयते॥पूर्वग्रंथार्थश्चोक्तरीत्याऽतिजरसंपश्येत्यादावमादेशात्पूर्वंजरसः॥तदंगीकारेचद्वितीयैकवचनेकर्थंसन्निपातपरिभाषयाज
रसादेशाभावः॥किंचद्वितीयैकवचनेलुकिपूर्वपक्षिणाशंकितेततःपरेणप्रथमेकवचनेलुक्कुतोनशंकितइतिपृष्टेऽस्यत्रविशे
षइतिपूर्वपक्षिणाविशेषेप्रतिपादितेपश्चात्प्रवृत्तोयद्येवमितिग्रंथोनतावत्पूर्वपक्षिणः॥तेनजरसादेशमंगीकृत्येवलुकआपाद

नात्॥नापितटस्कस्येष्टमेवह्येतत्संगृहीतमित्यग्रिमभाष्यासंगतेः॥अतिजरसेरित्युपन्यासासंगतेश्च॥नापिसित्थांतिनः॥तेनजस्सा
देशाभावप्रतिपादनद्वारोक्तरूपस्येवखंडनीयतयाऽतिजरसमितिनप्रापेतीत्यनिष्टापादनासंगतेः॥अतएवङ्याप्ग्रहणेऽदीर्घइ
तिवदित्याद्यप्युक्तं॥अदीर्घपदेनदीर्घभिन्नजरसोपिग्रहणात्॥दीर्घभिन्नस्ह्रस्वस्येवग्रहणेतुचित्रायांजातश्चित्रइत्यादौहल्
ङ्यादिलादिलोपयाडागमाद्यापत्तिरित्याहुः॥पद्न्नोमास्॥अन्यतरस्यामित्यस्यानुवृत्तिंदूषयित्वास्वानुरूपाःस्थानिनआक्षिप्यंत
इत्युक्तमपिदूषयितुमाह॥शिरसोग्रहणंकर्त्तव्यमित्युक्तमिति॥विकल्पानुवृत्तौदूषणांतरमाह॥वाकेशेष्विति॥येचतत्थितइत्यत्रै
ववाकेशेष्वित्यारंभेणान्यतरस्यांग्रहणस्याननुवृत्तेरुत्तरत्रमंडूकप्लुत्यातदनुवृत्तेश्चकल्पनामपेक्ष्यसर्वथातस्यास्वरितत्वकल्प
नैवन्याय्येतिभावः॥ननुयाडादीति॥ह्रस्वनद्यापइत्यत्रनप्रश्लेषइत्यभिमानेनेदम्॥जरसामित्यादौनुडभावार्थंतुप्रश्लेषआवश्य
कइत्युक्तंतुनविस्मर्तव्यम्॥व्याख्यानादिति॥अंत्यत्वप्रयुक्तायसेर्संज्ञेतिव्याख्यानात्औटष्टकारेणैवप्रत्याहारोनतुटाटकारेणे
त्यर्थः॥प्रथमैकवचनमिति॥सप्तमीबहुवचनग्रहणेऽसर्वनामस्थानइतिव्यर्थंस्यादित्यर्थः॥व्याख्यानादिति॥तदुत्तरंप्रत्ययाभा
वाच्च॥कपप्रत्ययावधीत्युक्तौकप्रत्ययस्यनस्वादिषुग्रहणमितिप्रतीयतेऽतआह॥तदंतेष्विति॥नपदांतसूत्रस्थइति॥तत्रहिवेत

स्वानित्यत्ररुत्वमाशंक्य भत्वेनसमाहितंतत्रचभसंज्ञायारुत्वप्रतिबंधातिरिक्तंनकिंचित्कार्यम्॥व्याप्यर्थेति॥ननुमर्यादार्थ
काडनउवार्थादितिनिर्देशोपिनकोपिदोषइतिचेन्न॥समाहारेद्वंद्वबहुव्रीहिसंज्ञयोःसमावेशापत्तेः॥वक्तुंयुक्तमिति॥नतूक्तंवर्ण
गौरवात्पदगौरवस्यगरीयस्त्वादितिपाठकः॥संख्यावाच्येकशब्दोपादानादिति॥वस्तुतस्तुदीक्षितोनव्यग्रहावपिस्थूलदृश्वानो
केवलार्थकैकशब्दस्येवात्रग्रहणात्॥केवल्यंहिसजातीयसंज्ञांतरासमानाधिकृतत्वम्॥एकाकीतिष्ठतीत्यादौतथाप्रतीतेः॥ननु
परत्वानवकाशत्वाभ्यामेवबाधसित्थौआकडारादेकेतिव्यर्थमित्याशंक्याह॥आभ्यामेवेति॥परत्वानवकाशत्वाभ्यामेवेत्यर्थः॥
अन्यत्राकडारीयविषयसंज्ञाभिन्ने॥लोकेसंज्ञाविषयइति॥ग्रामइतिसंज्ञायावाराणसीतिसंज्ञायाःकृष्णादेवदत्तादिसंज्ञयावृष्ण्यं
धकादिसंज्ञायाश्चबाधादर्शनादित्यर्थः॥आकडारेइति॥तेनधनुषाविध्यतीत्यत्रनपंचमी॥विरोधाभावेनेत्युक्त्वा तत्स्पष्टत्वा
त्॥पर्यायापत्तिर्दोषइति॥इदमयुक्तं॥विप्रतिषेधेपरमितिपरकार्यस्येवप्रवृत्तेः॥बाध्यसामान्यचिंतयेति॥अत्रचसितिचेति
सूत्रंमानं॥तस्मिंभवदीयइत्यादौपदत्वार्थं॥अंतरंगत्वात्सुप्तिङंतमितिपदत्वेतुतद्वैयर्थ्यम्॥नन्वाकडारीयसंज्ञ योःकार्यकालत्वेएकदे
शस्कृत्वेनयापरेत्य संगतमित्याशंक्याह॥आकडारस्येति॥णलुत्तमोवेति॥पुरुषसंज्ञातिङ्ङुपरस्मैपदसंज्ञायावाधिकाऽपवादत्वा

त्॥परस्मैपदसंज्ञातुशतृङ्कसोश्चरितार्था॥तथाचपरस्मैपदानामित्यनेनशतृङ्कसोरेवणलादेशःस्यात्॥तस्यचस्थानिवद्भावेनोत्तम
त्वाभावात्तदसंगतिरितिभावः॥इदमुपलक्षणंतयोःसमावेशेसिचिवृत्थिरित्यपिज्ञापकंबोध्यं॥एकदेशिनएवेति॥इदमयुक्तं॥इ
श्वस्तनदंतसंज्ञापक्षेपिसमानावधिकयालघुसंज्ञयापरत्वाद्वाधेनद्वित्वानापत्तेः॥घिसंज्ञातुहरिश्चब्देचरितार्थातत्रभिन्नावधिक
त्वेनद्वयोःसमावेशात्॥अस्यस्त्रीइत्यत्रगुरुसंज्ञयाबाधेननदीत्वानापत्तेश्च॥तस्मादेरजित्यादिनिर्देशेस्तयोःसमावेशोभवतावा
च्यः॥सचसमोवर्णसंज्ञापक्षेपि॥तथाहिवेतस्वानित्यादौभसंज्ञायाइवादीदिपदित्यादौअभ्यासेकारस्यद्विसंज्ञायांदीर्घो लघोरित्यस्य
वैयर्थ्यापत्यातद्बलेनतयोःसमावेशकल्पनात्॥पंचमीसमासाश्रयणादिति॥परस्येत्येतदर्थात्तर्भावेणवृत्तिः॥पंचमीभयेनेत्यत्र
पंचमीतियोगविभागेनभाष्यकृतातत्परइत्यत्रपंचमीसमासाश्रयणादितिभावः॥दीक्षितेनपंचमीसमासोदाहरणस्यापीपचन्नि
त्यस्यविदिसाहचर्येणलड·एवभेर्जुसमाश्रित्यान्यथासाधनात्पंचमीसभासस्यलडि·जुस्वारणप्रयोजनमाह॥तेनेति॥अतएवेति॥
एवंजातीयस्थलेजुसोऽनिष्टत्वादेत्वेत्यर्थः॥इदमुपलक्षणं॥अविंदन्नित्यादौसिजभ्यस्तेतिजुसभावोपिफलम्॥ननुभेरित्यत्रेकारोऽवि
वक्षितः॥तथाचडि·तोभस्यजुसितिवाक्यार्थः॥इतश्चेतीकारलोपेभमात्रस्यैवडि·त्वादिनासंभवात्॥तथाचप्रत्येषिषन्नविंदन्नित्यादौ

नदोषः॥ऋत्वस्यासृवृत्तित्वेनस्थानिवद्भावेनानेतुमशक्यत्वात्॥एवंचपंचमीसमासस्योदाहरणंमृग्यमितिचेत्सत्यं॥पंचमीसमासानित्यत्वेज्ञापकमाह॥प्रविगणय्येति॥निष्ठायांसेटीत्यत्रसेट्ग्रहणमप्यत्रज्ञापकंबोध्यं॥तत्थिकारितमित्यादाविटिकृतएवणिलोपोयथास्यान्नततःप्रागित्येतदर्थम्॥पूर्वंणिलोपेहिएकाजितिनिषेधादिण्नस्यात्॥पंचमीसमासस्यनित्यत्वेहिपूर्वंणिलोपेपितस्यस्थानिवद्भावादेवेण्निषेधाप्रवृत्तौतद्वैयर्थ्यस्पष्टमेव॥केचित्त्वादिआहुरित्यंतोऽपपाठः॥स्थानिवद्भावलब्धाकारस्यैवप्रविगण्येत्यादौव्यपदेशिवद्भावेनलघुपूर्वत्वस्वीकारेप्रचिकीर्षेत्यादावयादेशापत्तेः॥अंतरंगपरिभाषावारणायाह॥वतिघटितेति॥इदमयुक्तं॥नलुमतेतिनिषेधानित्यत्वेनसुप्यत्वमादायत्वन्मतेपिसूत्रेणसित्थिसंभवात्॥तदनित्यत्वस्यागतिकगतित्ववत्शब्दत्वेनसादृश्यमादायपदादिप्रवृत्तिरपिअगतिकगतिः॥भाष्यपठितेति॥इदमप्ययुक्तं॥नासिकाशब्दप्रयोगाभावायतदावश्यकत्वात्॥तस्याइति॥व्यवस्यायाइत्यर्थः॥नलुमतेतिनिषेधाऽनित्यत्वेनसर्वत्रसुप्परत्वादितिभावः॥पादयतीत्यादौपद्भावबारणायसुप्येवपदादयइतिव्यवस्यार्थंतच्चारितार्थ्यादयुक्तमेतत्॥नन्वेवंसूत्रवैयर्थ्यंप्राप्नोतीत्यतआह॥तत्वेपीति॥अनादेशत्वेपीत्यर्थः॥आवश्यकीकत्वादितिचेत्तेनपादशब्दात् हृदयशब्दात्सौतन्निमित्तकेपत्हृदादेशेसन्निपातपरिभाषयालोपलुकोनस्या

तामित्यपास्तं॥ननुकोशेपत्हृदादिवत्नस्मासादयोपिकुतोनोक्ताइतिचेन्नपदादीनामिवतेषांसर्वनामस्थानप्रयोगाभावा
दित्यवेहि॥ननुकोशशब्दानांलोकप्रसित्यशब्दानुकरणत्वेनशब्द परत्वादभिव्यक्तपदार्थायइतिन्यायेनपदाद्यप्रवृत्तिसंभवा
त्यदंघ्रिःस्वांतंहृदित्यादेःप्रकाराथत्वप्रयोजनत्वोक्तिरसंगतेत्यतआह॥कोशेशब्दाइति॥अर्थपराएवेति॥अनुकरणत्वेप्रमाणा
भावादितिभावः॥ननुतत्तदर्थशक्तिग्रहस्य कोशाधीनत्वात्शक्तिग्रहमंतरेणार्थपरत्वासंभवात्कोशस्थशब्दानामर्थपरत्वंशश
विषाणसदृशमतआह॥शक्तिग्रहस्त्वितिसामान्यतइति॥अर्थविशेषाअपूरस्वारणेइत्यर्थः॥इदंपदमर्थबोधकंपदत्वात्गोप
दवदित्यनुमानंबोध्यं॥एवंचेति॥अनेनानुमानेनसामान्यतोविष्णुपदार्थोस्तीतिज्ञानेविष्णुपदश्रवणेनतत्स्मरणत्वेइत्यर्थः
इतिक्रमेणेति॥कोशस्थंपर्यायेष्वेकंपदंविशिष्यार्थबोधकंविदितशक्तिकैरेकपदंपुरुषंप्रत्येवकोशस्यशक्तिग्राहकत्वादत
आह॥स्वस्वप्रसित्थेति॥तत्तत्पुरुषस्येति॥केचित्पुरुषप्रतिविष्णुपदमर्थविशेषेगृहीतशक्तिकमन्यंप्रतिनारायणपदंतथेतिभा
वः॥अत्रभाष्यंप्रमाणयति॥अतएवेति॥इदमुद्गीताधिकरणस्थशंकरभाष्योपलक्षणम्॥तत्रहिसामानाधिकरण्यंचतुर्धाऽ
ध्यासेनापवादेनैकत्वेनेति॥अध्यासेनयथा॥इयंप्रतिमाविष्णुरिति॥अपवादेनयथानेदंरजतमित्येकत्वेनयथाद्विजोत्तमोब्रा

ह्मणोभूदेवइति॥विशेषणत्वेनयथा॥नीलमुत्पलमित्युदाहृतम्॥तत्रैकत्वोदाहरणेउक्तरीतिःस्पष्टैव॥कोशतात्पर्यादिति॥
तथाचभेदाख्यानायन द्वंद्वोनैकशेषोनसंकरःकृतोत्रभिन्नलिंगानामनुक्तानांक्रमाद्दतइतिकोशकारैःपरिभाषितं॥अस्या
र्थः॥भेदस्यलिंगभेदस्यस्वरूपभेदस्यचाख्यानायद्वंद्वैकशेषसंकरानकृताइति॥लिंगभेदाख्यानायह्रादिनीवज्रमस्त्रीस्यात्कुलिश
मित्यस्यस्थानेकुलिशह्रादिनीवज्राइतिद्वंद्वः॥सहोबलंसहामार्गइत्यस्यास्यापवादःभिन्नलिंगानामनुक्तानांक्रमाद्दतइति॥भि
न्नलिंगानामितिभिन्नस्वरूपाणामुपलक्षणं॥तेनसमानलिंगानांसमानस्वरूपाणांद्वंद्वएकशेषश्चकृतएव।यथा॥स्वर्गनाकत्रि
दिवत्रिदशालयाइति॥पादाशरप्र्यंघ्रितुर्यांशाइतिच॥अनुक्तानामित्यनेनजनयित्रीप्रसूर्माता॥तातस्तुजनकःपि तेतिस्यानांत
निर्दिष्टानांद्वंद्वैकशेषोकृतावेव॥मातापितरौपितराविति॥एतेनरवंनभःश्रावणोनभाइत्यत्रखश्रावणोतुनभसीइतिनकृतमिति
मंजूषोक्तमपास्तं॥नभोंतरिक्षंगगनंनभाःश्रावणिकश्चसइत्येवंस्वस्वपर्यायेषुपठितत्वात्॥क्रमाद्दतइति॥क्रमःप्रस्तावस्तं
विनासंकरोनकृतःसतिप्रस्तावेसंकरएव॥यथेंद्रादिप्रस्तावेमेरुःसुमेरुरित्येवमादिरूपेणगिरिवर्गादिभ्यःकृष्णसंकरोनकृ
तः॥सतिप्रस्तावेसंकरःकृतः॥ननुविष्णुपदार्थाभिन्नोनारायणपदार्थइत्यादिबोधेएकशेषोनप्राप्नोति॥इदितइत्यादिनिर्देशेन

सहविवक्षायामेवतत्प्रवृत्तेरिसिचेन्न॥ कीरादिपदार्थानामप्रसित्यानां मिलितानांप्रसित्यघटपदार्थैन्वयभेदेनान्वयेघटःक
रीरःकलशइत्यादौकरीरादिपदानामेकशेषापत्तिरित्याशयात्॥पाणिनिनेति॥प्रकृतिवदनुकरणमित्यति देशेअत्वकरण
वदेकशेषाकरणादिति भावः॥एतेनेति॥उत्तरपदेइत्यस्यसन्नर्थकत्वाभावेनेत्यर्थः॥इत्यदंताः॥भाष्यानुक्तक्विब्भ्यइति॥एते न
ध्यायतेर्धीरित्युपपन्नं॥ईत्वंनकृतमितीति॥इदमप्राधान्येनवर्णाश्रयेप्रत्ययलक्षणमितिवार्तिकमतेन॥वस्तुतस्तुशंस्छाइ
त्यत्रक्विपिईत्वापादनंनतावद्वार्तिकमतेन॥तेनईत्वमवकारादाविति निषेधारंभात्॥नापिभाष्यमतेन॥तेनवर्णाश्रयेप्रत्यय
लक्षणनंगीकारात्॥तदेतदभिप्रेत्याह॥अन्येत्विति॥दीर्घविधायकेति॥नन्वेवंरामानित्यत्रदीर्घकृतेआतोऽनापइतिलोपा
पत्तिरितिवाच्यं॥आंतोनापइत्यनेनाकारांतादंगाद्विहितेभसंज्ञानिमित्तेप्रत्ययेलोपविधानेनादोषात्॥एवंरामाणामित्यादावपि
वक्ष्यमाणरीत्यादीर्घेआतोलोपोनेतिबोध्यं॥इत्यादंताः॥यूड्तीति॥पूर्वसूत्रेतस्यदीर्घपरत्वेपिशब्दाधिकारादत्रह्रस्वपरत्वं॥ह्र
स्वइत्यनेनसामानाधिकरण्यानुरोधात्॥तदेतदभिप्रेत्याह॥अनुवृत्तयुभ्यामिति॥अनवकाशत्वादिति॥ननुगवांपत्येब्राह्मण्येइ
त्यत्रपतिःसमासएवेतिनियमेनघित्वाप्रवृत्तौचरितार्थानदीसंज्ञामत्येइत्यादौपरत्वाद्घित्वेनबाध्यते॥अतएवऊदुपधाया

गोहइतिसूत्रेउऊदितिप्रश्लेषमाश्रित्यगोहइतिविकृतनिर्देशःप्रत्याख्यातोभाष्ये॥तत्रहि॥निजुगुहतुरित्यत्रचरितार्थमुत्वंबाधि
त्वागूहयतीत्यादौपरत्वाद्गुणेआतएवार्दीर्घऊकारइत्युक्तं॥निजुगुहतुरित्यादौगुणस्यप्राप्तिसत्वेप्युत्वस्यतदपवादत्वमनाश्रित्ये
दंभाष्यंप्रवृत्तमितिस्पष्टमेवेतिचेत्सत्यं॥नन्वधिकारादित्यसंगतं॥एतस्यपरिभाषात्वात्॥अधिकारत्वेहिप्रतिसूत्रेसंबंधकल्प
नागौरवं॥बहुषुबहुबचनमित्यादौतदसंबंधायमंडूकप्लुतिकल्पनेऽतिगौरवमित्यतआह॥बुत्थिस्थत्वादित्यर्थइति॥स्पष्टतयेति॥
शब्दस्वरूपंविशेष्यमध्याहृत्यतदंतविधिस्तुकल्पनीयत्वादस्पष्टइतिभावः॥नमुनेइति।नमुनेइत्यत्रनेत्यकारस्तूच्चारणार्थइतिभा
वः॥वार्तिकविरोधादिति॥पूर्वपक्षिणोवार्तिकविरोधस्याकिंचित्करत्वादिदमयुक्तं॥अमुनाघटेनेतिलस्यासित्थेरितितुवक्तुं यु
क्तं॥नीतिनोक्तमिति॥नेइतिनिर्देशस्तुशब्दस्वरूपस्यविशेष्यत्वेननपुंसकत्वमाश्रित्यतस्यापिनुमोपिज्ञानगौरवमिति॥न
न्वाडेनुदृपुंसीतिन्यासोस्तुनमुनेइत्यत्रचनमुनीत्येवचन्यासोस्त्विति चेन्न॥अमुष्मैकुलायेत्यादौमुत्वस्यसित्थत्वेननुमापत्तेः॥
ननुनुम्विधिंप्रतिसित्थत्वेपिस्मा यादेशंप्रत्यसित्थत्वेनमुत्वात्पूर्वस्मायादेशेकथंनुमः प्राप्तिरितिचेन्न॥अनेइत्यादौमुत्व
स्यासित्थत्वेनसवर्णदीर्घस्येनादेशगुणयोर्वीवारणायनाभावेकर्त्तव्येकार्यमात्रंप्रत्यसित्थत्वनिषेधावश्यकत्वात्॥सवर्णदीर्घस्मा

यादेशयोर्नुम्विधटकाविशेषात्॥परस्रूपंत्वंतरंगत्वान्मुत्वात्पूर्वमेवप्रवर्त्तते॥नमुनेइत्यत्रमुनीतिन्यासेतुआङोनुट्पुंसीतिसुव
चं॥नत्वस्येति॥आङि॰त्यस्यासंज्ञात्वमनाश्रित्याङोनादेशविधानादेवढकिलोपइत्यादौविषयप्रत्ययस्याङ्गदेशंविधायतदीयड॰
कारस्यनेत्वमित्यर्थः॥एवमौड॰इत्यत्रापिबोध्यं॥वार्तिकमतेपीति॥अपिनाभाष्यकृन्मतेपि॥याटिकृतेनिर्द्दिश्यमानपरिभाष
याश्रीभावस्यप्रवृत्त्ययोग्यत्वेनखट्वायामित्यादावाटइवभाष्यकृन्मतेपिनिरवकाशत्वेनेतिनपाठः॥पूर्वंश्रीभावप्रवृत्तेः॥केचि
त्वंगस्येत्यनेनसामानाधिकरण्यायाबंतांगस्यनिमित्तस्यैङः श्रीभावविधानात्कृतेपियाटिश्रीभावप्रवृत्तेः॥भाष्यकृन्मतेतत्रकों
डिन्यन्यायादेवश्रीभावेनयाटोबाध इत्याशयइत्याहुः॥अल्विधित्वेनेति॥ननुड॰कारस्यवस्तुतोऽनुबंधत्वेनेतस्याप्यनुबंध
कार्यत्वमितिचेन्न॥तथासतिप्रपठ्येत्यादाविडापत्तेः॥त्कोप्रत्ययककारस्यानुबंधत्वेनस्कानिवृद्भावेनवलादित्वस्यसुवचत्वात्
नन्वेवंतिविंशतेर्डिति॥ष्ठिवुक्लमुचमांश्रितिअनुदात्तडि॰तआत्मनेपदमित्यादावपीत्यदंव्यर्थमितिचेत्सत्यं॥ड॰सोरित्येवेति
नचद्विवचननिर्द्देशात्ड॰सोर्ग्रहणंस्यादितिवाच्यं॥अतीत्यस्यानुवृत्त्यादोषाभावात्॥औतस्तकारस्योच्चारणार्थत्वादित्संज्ञोदिनै
वनिवृत्तिः॥अतएवनस्वरितत्वमितिप्राचीनोक्तंदूषयितुमाह॥यदित्विति॥स्वभाववादस्यस्वभावतएवनिवृत्तिवादस्योभय

त्रोच्चारणार्थेइत्संज्ञकेच॥ननुतपरस्तत्कालस्येत्यनेनऔकारएवविधेयइतिनविभक्तावितिशंकासमाधानेनिष्फलेइतिचेत्स
त्यं॥ध्वनितइति॥तत्रहिनान्नलोपइत्यासेनंदितेत्यादौनलोपआपादितः॥उक्तपरिभाषासत्वेतुनशब्दस्यप्रत्ययत्वाभावा
देवनलोपाप्रसक्तेोतदसंगतिः॥नेतिदिगिति॥ननुतपरस्तत्कालस्येत्यनेनेोकारमात्रस्येवतस्यतित्वाभावात्स्वरितत्वशंकात
त्समाधानेहेअपिनिष्फलेइतिचेन्न॥किमोदित्यत्रापितथात्वापत्तौक्तेत्यत्रस्वरितत्वानापत्तेः॥यदिचतदर्थतित्पदंतिद्वोध्यप
रंतदाप्रकृतेपितदापत्तेः॥नव्यमतेऽणुदित्सूत्रस्थभाष्यानुरोधेनानुबंधविनिर्मुक्तपदार्थोपस्थित्यंगीकारेणतित्पदस्यतद्बोध्य
परत्वस्यावश्यकत्वाच्च॥तदेतदभिप्रेत्यतित्स्वरितमितिसूत्रेकैयटेतिताप्रत्यायितसंज्ञाधर्मेणसंज्ञीकथ्यतइत्यस्तितित्पद
व्यपदेशआदेशस्येत्याद्युक्तं॥समुदायस्येति॥नानर्थकेतिपरिभाषात्वत्रैवसूत्रेभाष्येप्रत्याख्याता॥शस्येति॥आसइतिसमुदा
यात्पूर्वत्वेपीतिशेषः॥अदृष्टार्थमिति॥यत्तुपाठकेनोक्तंहलङ्याबितिसूत्रेहलंतानांसुतिसीनामित्यर्थेहन्यादित्यादौयासुड्विशि
ष्टस्यलोपःस्यादितितन्न॥सुतिसीनांतस्मादित्युत्तरस्येतिपरिभाषयाद्यंतत्वकल्पनेननिर्दिश्यमानपरिभाषाप्रवृत्तौदोषाभावात्
व्यत्यादित्यत्रऋदिहीत्यत्रादःसर्वेषामङ्गार्ग्यगालवयोरित्याभ्यामदेष्यतएवहलग्रहणात्॥वस्तुतस्तुगुणोऽक्तेइत्यस्यहलादौ

सार्वधातुकेइत्यर्थेऊर्णो॥ तइत्यत्रापिगुणापत्तेः॥ नचोर्णोतेर्विभाषेत्यस्यवेयर्थ्यमितिवाच्यं॥ सूत्रद्वयस्यविषयव्यवस्थायाएवा
नापत्तेः॥ एवमदःसर्वेषामित्यस्यहलादेःसार्वधातुकस्येत्यर्थापत्तौअत्तिअत्तामित्यादावडापत्तिः॥ तस्मादुक्तसंज्ञासूत्रंदृश्यर्थ
मिति॥ द्वेधेति॥ गोबष्कयणीबहुश्रेयसीत्याद्यर्थमिदं॥ रामद्रुत्यादाविति॥ राजेत्यादौतुसंयोगांतलोपेनसिद्धिः॥ यद्वाहल्ङ्या
प्भ्यःकिमित्यस्यङ्याब्भ्यामितिकिमर्थमित्यर्थः॥ समुदायद्वारावयवप्रश्नेतात्पर्यात्॥ इदितोरित्यर्थइति॥ संज्ञाविधौप्रथमां
तयोरेवोपयोगात्॥ सख्यवयवभिन्नाविदुतावित्युचितं॥ वर्णसंज्ञापक्षेसूत्रार्थमुक्त्वातदंतसंज्ञापक्षेतंवक्तुमाह॥ तदंतेति॥
यज्ञमध्ये॥ ब्रह्मयज्ञमध्ये॥ अतएवासाधुत्वादेव॥ आद्यन्यासेदोषमाह॥ सुपतिनेति॥ द्वितीयेदोषमाह॥ सुसख्येति॥ इदमुप
लक्षणं॥ पतिसुतान्वयानित्यादौद्वंद्वेतिपूर्वनिपातोपिपूर्वन्यासेनसिध्येत्॥ उत्तरन्यासेचबहुसखिशब्देह्रस्वत्वंनस्यादित्यपि
बोध्यं॥ भाष्येस्पष्टत्वादिति॥ तथाचभाष्यं॥ बहुष्विति॥ वक्तव्यं॥ इहमाभूत्कियान्नवक्तव्यंकिमेतत्परिप्रश्नेवर्ततेपरि प्र
श्नश्चानिर्ज्ञाते॥ अनिर्ज्ञातंचबहुषु॥ द्वयेकयोःपुनर्निर्ज्ञातं॥ निर्ज्ञातत्वात्द्वयेकयोःपरिप्रश्नोनपरिप्रश्नाभावात्किमेवतान्नो
क्ति॥ कुतःप्रत्ययइति॥ स्वतंत्रास्तुकिमःप्र श्नार्थकत्वात्प्रश्नस्यचसंशयपूर्वकत्वात्संशयस्यचतत्तत्धर्मावधिकविषयको

टिकत्वात्तत्रैकत्वद्वित्वयोरिवत्रित्वादीनामपिपरिस्फुरणात्द्वित्राइत्यादाविवस्वौजसितिविधिसूत्रगतंपरत्वमादायब
हुवचनं॥तथाचकतिपुत्राइतिप्रश्नेद्वौपुत्रावित्युत्तरंलोकेकुर्वंतीत्याहुः॥बहुगण॥नहिशदंतेति॥इदमुपलक्षणं॥त्यंतप
र्युदासोप्यत्रज्ञापकः॥यत्तुपाठकेनोक्तं॥त्यंतपर्युदासोनज्ञापकःकतिव्यावृत्याचरितार्थत्वादितित्तुच्छं॥भाष्यकृतार्थं
तयर्युदासेऽर्थवतस्तिशब्दस्यग्रहणमित्युक्तत्वेनविंशतिशब्दएवत्यंतपर्युदासप्रवृत्तेः॥कतिशब्दात्तुकनिष्टएव॥स्पष्टंचेदं
भाष्येइति॥तथाचभाष्यं॥अथवामहतीयंसंज्ञाक्रियतेतत्करणेएतत्प्रयोजनं॥अन्वर्थसंज्ञायथाविज्ञायेत॥संख्यायतेनये
तिसंख्या॥एकादिकयाचापिसंख्यायतइति॥ननुमहासंज्ञाकरणेनतदर्थानुगुणांसंज्ञित्वेकल्प्यतांप्रदेशेषुलोकप्रसित्यार्थावव
गतिस्तुकुतइतिचेन्न॥तदर्थाननुगुणानांवक्ष्यमाणप्रकारेणसंज्ञित्वव्यावृत्तिसंभवात्॥नियतविषयपरिछेदहेतुत्वा भावेनव
क्त्रादीनामन्वर्थसंज्ञाननुगुण्याच्चागत्यामहासंज्ञाकरणेनप्रदेशेषुलोकप्रसित्यार्थावगतेःकल्पनात्॥एतन्न्यायोपयोगः॥कृत्रि
माकृत्रिमन्यायोपयोगः॥अभ्यासाम्रेडितेति॥तत्रमहासंज्ञाकरणेपिनलोकप्रसित्यार्थस्यग्रहणंरैछिकद्विःप्रयोगेपिअभ्यासा
दिकार्यापत्तेः॥ननुसंख्यापदेनलोकप्रसित्यार्थग्रहणेसूत्रेबहुगणयोर्ग्रहणंव्यर्थमृतयोरपिसंख्यावाचित्वादित्याशंक्याह॥सूत्रे

इति॥अतएव॥बहुत्वादेःसंख्यात्वाभावादेव॥इदमुपलक्षणं॥बह्वादीनांग्रहणंशक्यमकर्त्तुंज्ञापकात्सित्थमितिभाष्यस्यबह्वा-
दीनांसंख्यावाचकत्वेतुज्ञापकवैयर्थ्यम्॥ननुबहुत्वादेःसंख्यात्वाभावेरूकादिकयाचापिसंख्यायतइतिभाष्यविरोधः॥तत्रापि
शब्देनबह्वादीनामपिग्रहणादित्याशंक्यसमाधत्ते॥यत्वित्यादिना॥स्वव्याप्येति॥तथाचस्वव्याप्यत्रित्वादिद्वाराबह्वादीनांसंख्या
र्थकत्वेपिसाक्षात्तद्भावइतिभावः॥केप्यटोक्तंदूषयति॥एतेनेति॥नियतविषयपरिच्छेदहेतुत्वाभावेनबहुत्वादीनामसंख्या
त्वेनेत्यर्थः॥अथवामहतीयंसंज्ञाक्रियतइतिभाष्यमुपादायकेयटेनोक्तं॥ननुमहत्याःसंज्ञायाःकरणात्संघवैपुल्यवाचिनो
र्बहुगणयोस्संज्ञामाभूदेकादीनांतुकथंस्यात्नेषदोषः॥संख्येतियोगोविभज्यते॥तत्रचान्वर्थसंज्ञानुरूपःसर्वःसंज्ञीआक्षिप्य
ते॥ततोबहुगणेत्यादि॥इदंभूयादिव्यावृत्यर्थंनियमार्थंव्याख्यायतेऽन्वर्थसंज्ञाश्रयणादेवसंघवैपुल्यवाचिनोर्बहुगणयोःसंज्ञा
नेति॥ननुमहासंज्ञाकरणसामर्थ्याल्लौकिकसंख्यायाअपिप्रदेशेषुग्रहणमित्ययुक्तं॥संघवैपुल्यवाचिनोर्बहुगणयोःसंज्ञानि
रासार्थेतत्सार्थक्यादित्याशंक्याह॥संघेति॥यद्वालोकप्रसिद्धसंख्यावाचित्वस्यबह्वादिष्वभावइतिपूर्वमुक्तत्वेनान्वर्थसंज्ञा
बलेनसंघवैपुल्यवाचिनोर्बहुगणयोर्मावृत्तिरितिवक्तुमशक्यं॥एवंपतिशब्दोपिइत्यंतत्वेनसंज्ञिकोटौनिविष्टेनन्यवच्छिद्येतेइ

त्याशंक्याह॥संघेत्यादिनेत्यलमित्यंतेन॥पतयेइति।संख्यापदानुवृत्तिरप्युणादीनांव्युत्पत्तिपक्षस्यज्ञापिका॥अतोनसंकरइति वस्तुतस्त्वनेकसंज्ञाकरणसामर्थ्यादाकडारीयत्वाभावेपिनासांसंज्ञानांसमावेशः॥लोपसंज्ञात्वासांविषयेप्रवर्ततएव॥बाध काभावात्॥नह्येताविवलोपसंज्ञाप्रत्ययदर्शनमुद्दिश्यविहिताकिंत्वादर्शनमात्रं॥एकसंज्ञोद्देश्यकानेकसंज्ञानांतुष्टथ कूसंज्ञा करणसामर्थ्यान्नयुक्तःसमावेशः॥नलुमतेतिनिषेधारंभाच्चलोपसंज्ञैवतासांविषयेप्रवर्तते॥ननुयथालोपसंज्ञाएतासांविष येप्रवर्त्ततेतथैताअपिलोपसंज्ञाविषयेप्रवर्तेरन्॥तथाचागोमतीगोमतीसंपन्नागोमतीभूतेत्यत्रच्वेर्लोपेतन्नलुक्तत्थितलु कीतिङीपोलुक्प्रसज्येत॥क्विदमिदित्यादौम्लावितिह्रित्वंप्रसज्येत॥च्वेःक्विपश्चादर्शनस्यलुक्म्लुसंज्ञाप्रवृत्तेः॥वेरपृक्तस्येति लोपेप्रत्ययत्वव्याप्यधर्मपुरस्कारेणैवप्रत्ययस्योपपादनादितिचेन्न॥पृथक्संज्ञात्रयविधानसामर्थ्येनासांस्वभिन्नसंज्ञासामा न्यविषयेऽप्रवृत्तिकल्पनात्॥लोपसंज्ञायास्त्वासांविषयेप्रवृत्तिरुपपादितैव॥अतएवप्रत्ययादर्शनंतुलुमत्संज्ञाप्राप्नोति॥तत्र कोदोषः॥तत्रलुकिम्लुविधिप्रतिषेधः॥नवापृथक्संज्ञाकरणात्॥यथैवतर्हिअदर्शनसामान्येलोपसंज्ञालुमत्संज्ञाअपिलोपसं ज्ञाअवगाहेरन्॥तत्रकोदोषः॥गोमतीत्यत्रलुक्तत्थितलुकीतिङीपोलुक्प्रसज्येत॥ननुचात्रापिनवापृथक्संज्ञाक रणादित्येव

सित्यं॥यथेवंतर्हिष्टथक्संज्ञाकरणसामर्थ्याल्लुमत्संज्ञामपिलोपसंज्ञानावगाहते॥एवंलोपसंज्ञापिलुमत्संज्ञानावगाहते॥तन्न
सएवदोषः॥लुक्युपसंख्या नमित्यादिभाष्योक्तंसंगच्छते॥नवाष्टथक्संज्ञाकरणादितिभाष्यस्यतद्भावितसंज्ञाभिप्रायकत्वे
नुगोमतीत्यत्रलुक्तत्थितलुकीतिलुगापादनपरभाष्यंयथेवंतर्हीत्यादितदुत्तरभाष्यंचासंगतंस्यात्॥तद्भावितसंज्ञाश्रयणेगौर
वंच॥विहितविशेषणमिति॥अत्रवदंति॥एवंसतिपरमकतीत्यत्रषड्भ्योलुगितिलुगनापत्तिः॥डत्यंतस्यषट्संज्ञाविधानात्॥
नचायंसमासएवदुर्लभःदिक्संख्येसंज्ञायामितिनियमादितिवाच्यम्॥दिक्संख्येसमानाधिकरणविशेषणत्वेनोपादायप्रव
र्तमानसमासंज्ञायाएवतेननियमेनव्यावृत्तेः॥अतएवसर्वादिसूत्रेपरमपंचेतिप्रयुक्तंभाष्ये॥नचबहुगणडतिचेत्यनयोर्हि
स्तदंतविधिः॥अति कतयइत्यत्रापिषट्संज्ञायांलुगापत्तेः॥वक्कादीनामसंख्यात्वस्यतयास्वीकृतत्वेनान्वर्थसंज्ञाबलेनसं
ख्याषट्संज्ञयोरुक्तस्थलेवारणसंभवादिति॥आध्रीयेति॥आङोयमहनइत्यात्मनेपदं विधिलिङुत्तमपुरुषैकवचनेइट्ग
महनेत्युपधालोपःसीयुटःसकारस्यप्रत्ययावयवस्यलोपेप्रत्ययलक्षणेनझलादिप्रत्ययपरत्वे नानुनासिकलोपवारणाय
घप्रत्ययग्रहणंतस्मिंस्तुसतिकृत्नप्रत्ययलोपएवतत्प्रवृत्तेर्नदोषः॥चरितार्थ मिति॥प्रत्ययावयवेप्रत्ययत्वस्वीकाराभावेतुप्र

त्ययरूपसरा भावेनषत्वाप्रवृत्तौसातिग्रहणंव्यर्थस्यात्॥ननुप्रत्ययरूपसकारस्यकुत्राप्यसंभवएवकुतोनोक्तः॥अवैषीदि
त्यादौआदेशरूपत्वेनेवषत्वसित्थेरितिचेन्न॥ईद्रोमावक्षत्सदेवायक्षदित्यत्रवहियजिभ्योलेटिसिपिप्रत्ययरूपसकारसं
भवादिहापीतिभाष्यं॥तदाहेति॥अतिदिश्यमानकार्याणामुत्पत्तिदेशएवदेशइत्येतत्प्रमेयमेवेत्यर्थः॥प्रत्ययलोपइति॥गुणेप्रा
प्तेइतिवक्तव्येजसिचेतिगुणेप्राप्तइत्युक्त्येतल्लब्धं॥नलुमतांगस्य॥लुप्तप्रत्ययपरतोयः पूर्वइत्यस्यफलमाह॥तेनपंचेत्यादा
विति॥वार्तिकमतेनैतत्सूत्रोदाहरणमाह॥राजपुरुषादाविति॥सर्वमतसाधारण्येनैतत्सूत्रोदाहरणंतुकारीत्यादि॥लब्धांगसं
ज्ञकइत्यस्यप्रयोजनमाह॥अंगसंज्ञात्विति॥अन्यथांतरंगानपीतिन्यायेनांगसंज्ञातः पूर्वेलुक्प्रवृत्तौयद्योदृश्योपिसानस्यादिति
भावः॥अतएवेति॥अंगसंज्ञायाउक्तरीत्यानलुमतेतिनिषेधाप्रवृत्तेरित्यर्थः॥स्त्रीप्रत्ययलुकीति॥इदमुपलक्षणंतथाहि॥इदं
स्त्रियांचेत्यत्रस्त्रीईइतिप्रश्लिष्यईकारेपरतः स्त्रियांतज्ज्वद्भावः॥अतएवज्ञापकात्तुनेताङ्डीषितिभाष्योक्तपक्षांतराभिप्रायेणायं
ग्रंथः॥आहोस्वित्स्त्रियांक्रोष्टोरंगस्यतज्ज्वद्भावइतिपक्षांतराभिप्रायेण नाद्यः॥स्त्रीप्रत्ययलुकिप्रत्ययलक्षणेनईकारपरकत्व
स्यनलुमतेतिनिषेधेजागरूकेसत्यसंभवेनतत्पक्षेपिचक्राष्ट्रेइतिरूपस्यैवदुर्लभत्वात्॥नांत्यः॥तत्पक्षेतज्ज्वत्वप्रवृत्तेः॥पूर्व

स्त्रीप्रत्ययस्येवाभावेनतल्लुकःस्वपुष्पगंधायमानत्वात्॥तस्मात्पंचभिःक्रोष्ट्रीभिःक्रीतंकुलमित्यर्थेठकितस्याःध्यर्धेतिलुकि
पंचक्रोष्टुइत्यत्रतृज्वत्वमितिवक्तुंयुक्तं॥वस्तुतस्तुपंचभिःक्रोष्ट्रीभिः॥क्रीतंकुलमित्यर्थेठकःपूर्वंतृज्वत्वविनाशकत्वाभा
वेनेतिवक्तुंयुक्तं॥अंतरंगत्वात्॥अंगसंज्ञायालुगुत्तरमपिप्रत्ययलक्षणेनप्रवृत्यालुकोंऽतरंगतृज्वत्वाविनाशकत्वाभा वे
नांतरंगानपीतिन्यायाप्रवृत्तेः॥अंगस्यक्रोष्टुरिति॥अंगस्यावयवोयःक्रोष्टुशब्दइत्यर्थः॥अंग संज्ञाचभवतिप्रत्ययलक्ष
णेनेति॥नन्विदंभाष्यंपंचभिःक्रोष्ट्रीभिःक्रीतैरथैःपंचभिरथै रित्युदाहरणंप्रवृत्तंतत्रचश्रूयमाणभिसमाश्रित्यांगसंज्ञाभविष्य
तीतिनप्रत्ययलक्षणोपयोगइतिचेन्न॥तस्यपंचक्रोष्टइत्युदाहरणोपलक्षणेनादोषात्॥तथाचोक्तदिशांतरंगत्वेनतृज्व
त्वस्यसमाससंज्ञातःपूर्वमेवतृज्वत्वप्रवृत्यानप्रत्ययलक्षणोपयोगइतिवाच्यं॥अंगसंज्ञातुभवतीतिभाष्यस्यलुकोंतरं
गनिमित्तविनाशकत्वाभावसंपादनार्थत्वेनादोषात्॥नियमतइति॥नन्वेवंतृज्वत्वस्यापिपरनिमित्तकत्वेनतस्मिन्न
लुमतेतिनिषेधप्रवृत्यापत्तिरितिचेन्न॥नलुमतेतिनिषेधेव्याख्यानेनशब्दतःपरनिमित्तकत्वस्यैवाश्रयणात्॥अतए
वेति॥अदित्यत्रशब्दतःपरनिमित्तकत्वानाश्रयणेनलुमतेतिनिषेधाप्रवृत्तेरेवेत्यर्थः॥इदंयुक्तम्॥अत्वप्रवृत्तावपि

गुणोयङ्लुकोरितिनिषेधेनेष्टसित्येः॥यत्तुचर्करीत्यजर्घाइत्यादौतयोस्तिप्निमित्तकांगत्वमादायात्वप्रवृत्तिरितिपाठके
नोक्तंतन्न॥अंगाधिकारस्याभ्यासकार्याणामभ्यासांगोभयनिमित्तप्रत्ययएवप्रवृत्तेः॥अतएवजिहननीयिषतीत्यादौनकु
त्वं॥कार्यकालत्वस्याभावाच्चेति॥इदमयुक्तं॥कार्यकालंसंज्ञापरिभाषंभस्येत्युपस्थितमिदंभवतियचिभमित्याद्यनेकभा
ष्यविरोधात्॥कैयटोक्तंदूषयति॥एतेनेति॥आकडारस्यस्यकार्यकाल त्वाभावेनप्रत्ययइत्यस्यावृत्तिंविनैवोक्तदिशानिर्वा
हेणचेत्यर्थः॥पदैकवाक्यतयेति॥यत्रांगमितिश्रूयतेतत्रयस्मात्प्रत्ययइत्युपतिष्ठतेइतिसूत्रार्थाश्रयणात्॥अस्मिन्यक्षेच
प्रत्ययइत्यस्यावृत्तिर्नापेक्षिता॥अंगाक्षिप्तप्रत्ययनिमित्तमिति॥नलुमतेतिनिषेधस्तुअनाक्षिप्तप्रत्ययनिमित्तकार्यएवेति
चर्करीत्यादावत्वप्रवृत्तिरितिभावः॥अनङनपत्याचिंत्यमिति॥इदंचविशेषणत यावर्णाश्रयणेप्रत्ययलक्षणंनभवतीतिवार्ति
कमतेनदूषणंनवस्तुतः॥अपास्तमिति॥वस्तुतस्त्वाकडारीयेष्वपिकार्यकालपक्षस्योपपादितत्वात्कैयटोक्तमपियुक्तं।आ
वृत्तिरप्यावश्यकीअंगसंज्ञायामुप क्षीणायाःपरबुत्धेरंगसंज्ञायामुपक्षीण त्वेनोरदत्वस्यप्रत्ययनिमित्तत्वात्॥कुलालपितु
र्घटंप्रतीयब्राह्मणस्यपुत्रंपंथानंष्टकृतीत्यादौब्राह्मणस्यप्रश्नक्रियांप्रतीवान्यथासित्थत्वात्॥स्वमोर्नपुंसकादितिसूत्रेइति।ए

तत्सूत्रोत्तरवर्तिनीनेतराच्छंदसीतिसूत्रेइत्यर्थः॥पदांतरसन्निधानंविनेति॥वस्तुतोऽलिंगेयुष्मदस्मदीत्यस्यटाबभावोपपा
दनार्थंप्रवृत्तत्वेनेदृशार्थकत्वंनयुक्तं॥नचाटास्यतदृत्यादौपदांतरसंनिधानंविनास्त्रियांवर्त्तमानेटाबित्यर्थइतिवाच्यं॥मा
नाभावात्॥नषडित्यत्रषट्ग्रहणवैयर्थ्यापत्तेश्च॥तस्मादलिंगेयुष्मदस्मदीतिवार्तिकंकस्यचिद्दृषेर्मतमाश्रित्यप्रवृत्तमि
तिबोध्यं॥उच्चारणार्थत्वशंकावारणायेति॥इदमयुक्तं॥त्रयोदशेत्यादौसांतादेशविधायकेत्रेस्त्रयइत्यादाविवान्नापिसांत
त्वभ्रमवारणसंभवात्॥अभ्युच्चयायेति॥भवामीतिप्रत्युदाहरणस्यापिनिर्दुष्टत्वादितिभावः॥केचित्तुनुमःपूर्वंपरत्वात्त्यद
द्यत्वेपश्चादुगिदचामितिनुमिसर्वनामस्थानेचेतिदीर्घेभवानितिसिध्यतीत्याहुः॥तन्न॥नलोपापत्तेः॥झलंतानामेवोगितां
नुम्विधानाच्च॥अंन्यथाघिनुणिनुमापत्तेः॥अपरेतुइदंजातिपक्षे॥व्यक्तिपक्षेत्वत्वर्सतसेतिसूत्रेऽस्याप्यतोनुपस्थितिसाम
र्थ्यात्सोनत्यदादीनामइत्यस्यप्राप्तिरितिशंकास्यात्॥अतोभवंतावित्यपास्तमित्याहुः॥इतिइदंताः॥इदंतेभ्यइ ते।वातप्रपूर्वा
न्माधातोःक्विपोनभिधानमित्यर्थः॥वातप्रमीशब्दादाचारक्विबंतात्कर्त्तरिक्विबित्यन्ये॥मृगाकृतिरिति॥हरिणाकृतिःयूल्या
ख्यौ॥दीर्घाज्जसिचेतिनिषेधमाशंक्याह॥वाछंदसीति॥मूलविभुजादिभ्यइति॥आतोनुपसर्गेकइत्यनेनतुन॥उपसर्गत्वात्अ

तएवयस्मिन्दशसहस्राणिपुत्रेजातेगवांददौब्राह्मणेभ्यःक्रियारब्धेभ्यःसोयमुंछेनजीवतीतिसित्यं॥प्राधान्येनतद्बोधकत्वनि
वेशेइति॥नन्वेवंकुमारीवर्षाभूशब्देनदीसंज्ञादुर्वारा॥विशेषणतयानित्यस्त्रीलिंगार्थबोधकत्वादितिचेत्सत्यं॥अवयवस्त्रीवि
षयत्वात्सित्थमितिवार्त्तिकस्ययथोद्देशपक्षाभिप्रायेणप्रवृत्तेः॥तथाचावयवस्त्रीविषयत्वात्सित्थमितिभाष्यमुपादायकैयटे
नोक्तं॥अंतरंगत्वात्पूर्वरूपमेवरुग्राख्यत्वात्प्रवृत्तानदीसंज्ञापश्चादुपजायमानेलिंगांतरयोगेननिवर्त्ततइति॥आकरस्येत्या
रभ्यकेषांचिन्मतं॥कार्यकालत्वाभावादित्युत्तरंअवयवस्त्रीविषयत्वात्सित्थमित्येतद्यथोद्देशपक्षाभिप्रायकमेवेतिशेषः॥कथ
मिति॥पौर्वापर्याद्यभावादितिशेषः॥भाष्येस्पष्टमिति॥वस्तुतोनैवंभाष्यकृतोक्तं॥किंत्वंबार्थानांह्रस्वः॥नदीह्रस्वयोर्न्यासेजसि
चेतिनद्याअपिगुणः प्राप्नोतीत्याशंक्येवंतर्हियोगविभागः करिष्यतेततोह्रस्वोंबार्थनद्योरितिवर्त्तते॥अनयोर्ह्रस्वस्यह्रस्वोभव
ति॥किमर्थमिदंगुणोभविष्यतितद्बाधनार्थंततोगुणश्चगुणोभवतिह्रस्वस्येति॥अथवाह्रस्वस्यगुणइत्यत्रांबार्थनद्योर्ह्रस्वइत्येत
दनुवर्त्ततइत्युक्तं॥वक्तुमशक्यइति॥अंबार्थनद्योर्गुणइतिन्यासेनेत्यर्थः॥गुणःस्यादेवेति॥अनित्यस्थलेलस्येकचसुष्कता
याआवश्यकत्वेननलुमतांगस्येत्यस्याप्रवृत्तौबीजाभावान्नदीसाहचर्यात्स्त्रीलिंगस्यैवांबार्थस्यग्रहणादनःशब्देगुणप्राप्तेरभा

वाच्चेतिमौनिश्रीकृष्णभट्टाः॥अयंह्रस्वइति॥विधानसामर्थ्यलभ्योभाष्योक्तयोगविभागलभ्योवाह्रस्वइत्यर्थः॥वृत्तिवारणायेति
नचांतरंगायांवृत्तौबहिरंगस्योत्वस्यासिद्धत्वं॥नाजानंतर्यइतिनिषेधात्॥पररूपंबाधकमिति॥नचादृविधानसामर्थ्यं॥डेर्न
मिनुड्बाधनार्थंचरितार्थत्वात्॥यत्वेवंसतिह्रस्वनद्यापोनुडित्यस्यानंतरंडेर्नेत्येवब्रूयादितिमौनिश्रीकृष्णभट्टाः॥तन्न॥षट्त्रि
चतुर्भ्यश्चेत्युत्तरसूत्रेषुनेत्यस्यानुवृत्तिप्रसंगात्॥ननुह्रस्वनद्यापडितिसूत्रेआडेरितिपाठ्यं॥अथवाडेरामुकारानुबंधवि
शिष्टःकार्यः॥तथाचैवंलघुन्यासेनसिद्धेऽङ्विधानंपररूपबाधनार्थमितिचेन्न॥सर्वादिशब्दात्ङेःस्मिटिपररूपेपितस्यपूर्वस्मा
द्विधौस्यानिवत्वेनरव्यत्यादित्युत्वाप्रवृत्यर्थंअङ्विधानंस्यादित्याशयात्॥अतएवेति॥अनवकाशत्वेनबाधे पवादप्रवृत्युत्तरमु
त्सर्गप्रवृत्तेरेवेत्यर्थः॥किंतर्ह्यनवकाशत्वादिति॥अलोंत्यपरिभाषैकवाक्यतयागणेरंत्यस्यअस्येत्वमित्यर्थेऽनवकाशत्वमि
तिभावः॥वस्तुतस्त्वेवमर्थाश्रयणेनानवकाशत्वोपपादनेऽभ्यासविकारेबाध्यबाधकभावोनेतिपरिभाषाश्रयणेपिहलादिशे
षोनस्यात्॥इत्वस्योक्तरीत्यानिर्विषयत्वापत्तेः॥तस्माद्युगपद्द्वयोरसंभवेऽनवकाशत्वंयथाऽडामोरामःडिद्वचनापहारकत्वेना
गमिनश्चावासत्वेनयुगपत्तयोःप्रवृत्यसंभवात्॥नुक्दीर्घयोस्तुयुगपत्प्रवृत्यसंभवः॥दीर्घेणसर्वस्यागमिनोनापहारात्॥इत्व

हलादिःशेषयोरपिनयुगपत्संभवः॥एकस्यस्थानिनआदेशद्वयासंभवात्॥प्रक्रियावासनावतांईत्वंहिरूपांतरप्राप्तिः॥लोपःस
र्वथानिवृत्तिरिति॥तथाचलोकेपिब्राह्मणाभोज्यंतांमाठरकौंडिन्योपरिवेविष्टामितिभोजनपरिवेषणयोर्युगपत्संभवेनस्वप्रवृ
त्तिसमयेभोजनबाधेपिपरिवेषणानंतरंमाठरकौंडिन्ययोर्भोजनंदृश्यते॥हयवरट्सूत्रेचभाष्येनेदानींतौभुंजातेइतिकाल
विशेषप्रदर्शनंचकृतं।क्ङोरितिसूत्रेचभाष्येऽठष्टित्वेऽडुत्तरंवलोपउक्तः॥ ॥ऊठ्वलोपयोर्युगपत्संभवादितिदिक्॥ननू
ङ॰चगमादीनामितिवार्तिकनिष्पन्नभूशब्दस्यधातुत्वादेवसित्थेतदुपादानंव्यर्थमतआह॥भूशब्दस्येति॥सुभ्रुवावितिसित्थ
मिति॥तथाचप्रयुज्यते॥गूढसूचितरहस्यविभेदःसुभ्रुवापरिवृत्तेपरिहासइति॥एवमिवर्णोवर्णांतधात्वंतस्यांगस्येत्यर्थात्सु
श्रियावित्यादावियङ्॰सित्थिः॥नभवतीत्युक्त्याक्रियान्वयेनप्रसज्यप्रतिषेधशंकांनिराकरोति॥धात्ववयवसंयोगपूर्वभिन्न
इति॥उदियादिति॥उत्पूर्वादीङ्॰गावित्यस्माल्क्विपिरूपं॥इत्यर्थेनसित्थेरिति॥वस्तुतस्तुसंयोगाभिन्नात्संयोगैकदेशात्तद्घटि
तसमुदायाद्वापरस्यसंयोगपूर्वक स्यापियणापत्तेः॥धात्ववयवसंयोगात्परस्यनेत्यर्थेतूदियादित्यादौदोषः॥पर्युदासाभावेनो
क्तार्थालाभादितिपूर्वग्रहणमावश्यकंकिमिति॥पूर्वसूत्रात्द्योरित्यनुवृत्त्यासित्थमित्याशयः॥निषेधादिति॥ननुस्वरकुत्स्वेब्राह्म

ण्येइत्यादौशाकलंप्राप्नोतीतिचेन्न॥उत्तरपदत्वेतिवार्तिकारंभेतत्प्राप्तावपिप्रत्याख्यानपक्षेतदप्रवृत्तेः॥प्रतिपदोक्तत्वादिति।त
द्याचदुर्धियावित्यत्रबहुव्रीहौयण्नेतितदाशयः॥विशिष्टरूपोपादानविषयइतिदिक्समासइतिवत्कतिसमासइतिविशिष्ट
कपोपादानेइत्यर्थः॥इतिविग्रहाभिप्रायेणेति॥प्रकृष्टंध्यायतीतिविग्रहे तुनित्यस्त्रीत्वाभावः॥सत्वभूतार्थकेति॥युत्यधी
त्वर्थविशेषणत्वेतुकर्मकारकत्वमस्त्येवेतिभावः॥सूत्रारंभेपीति॥भयहेतुरितिहेतुपदस्वारस्यात्॥तथाचसत्वारंभेपिष
ष्ठीसमाससंभवान्नोक्तस्थलेयणितिभावः॥अभ्युच्चयेति॥पूर्वपरिहारेऽरुच्यभावादितिभावः॥अनयोरेवनिषेधइतितथा
चसुध्युपास्येनिषेधप्रवृत्तिर्नेतिभावःप्रकारांतरमाह॥सुपीतिवेति॥यलोपेसखइति॥यावत्पर्यंतंलोपोव्योरित्यस्यप्रवृत्ति
संभावनातावत्पर्यंतंवेरपृक्तेतिलोपोनप्रवर्त्तते॥ननुनःक्यइतिनिषेधःदंत्यांतविषयकोनुनासिकांत्यविषयोवास्यादित्याशं
क्यासतिबाधकइतिन्यायाल्लस्यानुरोधाच्चसामान्यापेक्षइत्याह॥नःक्यइति॥परप दस्याजादेशस्येवेति॥अपीपचन्नितिपंचमी
समासप्रयोजनप्रदर्शनपरभाष्यप्रामाण्यादितिभावः॥अनित्यत्वादिति॥अंतरंगपरिभाषायाअनित्यत्वेनैवनिर्वाहेनाजानंतर्य
परिभाषानाश्रयितव्येतिमतेनेदं॥नन्चल्लोपस्यस्थानिवत्वाद्यणिप्राप्तेकौलुप्तंनस्थानिवदित्यसंगतं॥लोपस्यलोपकर्मत्वाभावा

दित्यतआह॥भावेक्तइति॥अस्मादेवभाष्यप्रयोगात्क्वचित्सकर्मकेभ्योपिभावेक्तोभवतियत्रप्रयोगस्यनगत्यंतरमितिभावः॥
ननुनैवंविज्ञायतेक्कोलुप्तंनस्थानिवत्कथंतर्हिक्कोविधिंप्रतिनस्थानिवदितिनपदांतसूत्रस्थभाष्यात्क्कोलुप्तंनस्थानिवदि
तिनास्त्येवेत्याशंक्याह॥अस्याप्यर्थस्येति॥तथाचोक्तभाष्यंसर्वत्रनैवंविज्ञायतेक्कोलुप्तंनस्थानिवदितिसर्वत्रक्कोविधिंप्रतिंन
स्थानिवदितिविज्ञायतेइत्यर्थकमितिभाव :॥पदकार्यविषयएवेति॥एवंचाभिव्यक्तपदार्थायइतिन्यायमूलकंप्रसित्थेइ
तिसर्वनामप्रकरणस्कस्वग्रंथविरुत्थंतस्मात्तन्न्यायप्रवृत्ता वपिविशेषणतयाभिव्यक्तपदार्थकत्वमादायानङ्बोध्यः॥क्वि
बंतस्यधातुत्वमिव ॥ इतिईदंताः॥प्राधान्याच्चेति॥ सर्वेषांकार्याणांरूपनिष्पत्यर्थत्वादितिभावः॥ननुरूपातिदेशएवरादे
शोनस्यात्वर्णसंस्थानविशेषस्यैवरूपत्वेनस्वरस्यारूपत्वात्॥अतएवविभिन्नस्वरकयोर्विभिन्नार्थयोर्हरिणीशब्दयोःस
रूपाणामित्येकशेषःइत्याशंक्याह॥तच्चेत्यादि॥अथतदाकर्षाभावादिति॥यद्यपिस्कानषष्ठ्यभावेनस्कानेंतरतमपरिभाषा
नोपतिष्ठतेतथापिरूपातिदेशस्यफलतःस्कान्यादेशभावपर्यवसायित्वेनोक्तपरिभाषाप्रवृत्तिमभिप्रेत्येदम्॥संज्ञाशब्दाना
मिति॥इदमुणादिव्युत्पन्नानामित्यनेनपाक्षिकं॥यथान्यासइति॥ण्वुल्तृचोअप्तृन्तृच्इतियथान्यासेइत्यर्थः॥नियमफलं

चिंत्यमिति॥मातरौपितरावित्यादौनिरनुबंधकत्वेनतृन्तृजंतत्वाभावादेवदीर्घापत्तेरितिभावः॥विशिष्टाभावस्येति॥भ्यामित्
तीयादिपरत्वेपिशस्यजादिविभक्तिपरत्वेपिक्वचिद्विशेषणाभावेनक्वचिद्विशेष्यभावेनाचादित्वविशिष्टतृतीयादिविभक्तिपर
त्वाभावस्य॥एतेनेति॥उक्तनियमस्येवनिर्दुष्टत्वेनेत्यर्थः॥तथाचतृज्वत्क्रोष्टुरित्यस्यतृज्वत्सर्वनामपरत्वएवेतिनियमपरत्वे
सर्वनामस्थानेतुन्नंतस्यापिप्रयोगापत्तिः॥आवृत्यादिविधनियमपरत्वेपिक्रोष्टुपुत्रइत्यादौतृजंतस्यप्रयोगापत्तिः॥तृजंतं
सर्वनामस्थानएवेतिनियमेविभक्त्यंतरएवतृजंतप्रयोगवारणात्॥तत्रलक्षणवशेनेत्वप्रवृत्तावपिकिरइत्यस्यानुकरणत्वा
भावात्॥धातोःकार्यमुच्यमानमितिपरिभाषातुकिरश्चपंचभ्यइतिनिर्देशादनित्या॥इतएवनिर्देशादिति॥अनुकार्यानुकरण
योरभेदविवक्षात्वप्रामाणिकीतिभावः॥नवलोपइति॥लोपःशाकल्येत्यनेन॥लोपोव्योरितिलोपस्तुक्रादसःपरनिमित्तकत्वेन
बहिरंगश्च॥यद्यपिलोपःशाकेतिलोपस्यपाक्षिकत्वेनापिपरिहरःसुलभस्तथापिपक्षेपिलोपाकरणयोपपत्तितनमित्यदोषः।इ
त्यदंताः॥उक्तोत्तरत्वादिति॥इदमयुक्तं॥विवृतत्वसाम्येनकदाचिद्विवृतस्यलकारसाम्येनकदाचिदीषत्स्पृष्टस्येत्याद्युक्तरीत्यै त
द्दोषद्वयावारणात्॥नचधातृणांमित्यत्रेफद्वयाघटितत्वविवृतरूपधर्मद्वयसाम्येनविवृतएवदीर्घोभविष्यतीतिवाच्यम्॥त

थासतिहोतृलृकारइत्यत्रापिलकारद्वयघटितत्वविवृतरूपधर्मद्वयस्याम्येनविवृतस्यैवापत्तावीषत्स्पृष्टस्यपक्षेप्यनापत्तेः॥व
स्तुतस्तुगमृनित्यत्रेषत्स्पृष्टस्यर्ंकेवनिर्देला॥तस्यपूर्वसवर्णत्वाभावात्॥गमृणामित्यत्रतुपक्षेईषत्स्पृष्टलृकारङ्ष्यतएव
दृढंमानंचिंत्यमिति॥ईदृशानामभिधानेदृढंमानंतुइकोयणित्यस्यलाकृतिरित्युदाहरणोपन्यासपरमग्निपुराणंबोध्यं॥एतेन
लाकृतिरित्यस्यानभिधानमितिविवरणग्रंथःप्रत्युक्तः॥ ॥इत्यजंताः पुल्लिंगाः॥ ॥होढःडस्त्विति॥प्रतिपत्तिलाघवा
येतिशेषः॥धुडित्याद्यसित्थेरिति॥झषंतत्वाभावेनभष्भावानापत्तेरितिभावः॥आदिपदेनलीढइत्यादिग्राह्यं॥दादेर्धातोः॥ढत्व
स्यापिविधानार्थमिति॥वाग्रहणंसमुच्चयार्थमितिभावः॥उक्ताशयमौपदेशिकदादित्ववतिलक्षणेत्युक्ताशयं॥अन्यत्रविस्तरइ
ति॥अन्येतुपूर्वत्रनिषेध्यसमर्पकेदादेरित्यस्यौपदेशिकदादित्ववत्तिलक्षणायांधातोरित्युत्तरसूत्रेदादेरित्यनुवृत्तिर्वैयर्थ्य
अपवादपक्षेपीत्याद्यपिन॥औपदेशिकदादित्ववतोधातुत्वाव्यभिचारेणधातोरित्यस्यवैयर्थ्यापत्तेः॥तस्माद्दादेरित्यस्यौपदेशि
कदादित्ववतिलक्षणायांमानाभावात्॥धातोरित्युत्तरसूत्रेदादेरित्यनुवृत्तिस्त्वधोगित्यत्रपूर्वसूत्रप्राप्तढत्वनिवृत्यर्था॥तथा
हिधातोर्घइत्येतन्मात्रेणधुगित्यादिसित्थौधातोरित्यनुवृत्तिर्वैयधिकरण्येनान्वयेनादादावपिअधोगित्यादौ घत्वार्था॥तत्सा

मूर्ध्येनचाधोगित्यत्रनपूर्वेणदन्त्यं॥धातोरितितुदादिरुलिदृशब्देनत्वाभावार्थं॥दामलिहमात्मनइकृतिदामलिह्यतितत:क्विप्
दामलिगित्येवघत्वप्रवृत्तेरेवेत्याह॥इत्यादिनिर्देशात्॥आदिनादेन[illegible]मित्यादिपरिग्रह:॥तत्रहिघत्वेझषस्तथोर्धोधत्वसिद्धि:॥नन्वौपदेशिकप्रायोगिकयोरितिपरिभाषयैवौपदेशिकादादित्ववतोग्रहणेसित्थेदादिग्रहणंव्यर्थमतआह
औपदेशिकेति॥धातोरितिसूत्रेदादेरित्यनुवृत्तिर्व्यर्था॥प्रयोगोनास्तीतिकृत्वेति॥औपदेशिकप्रायोगिकयोरौपदेशिकस्य
ग्रहणमितिपरिभाषासत्वेतुलौकिकप्रयोगेसानुबंधकानांप्रयोगोनास्तीतिऔपदेशिकप्रयोगग्रहणमितिभाष्यासंगति:॥उ
क्तपरिभाषयौपदेशिकप्रयोगस्यमुख्यत्वबोधनादितिभाव:॥ननूक्तपरिभाषयौपदेशिकदादित्ववतोग्रहणेपिनोक्तभाष्य
विरोध:॥सानुबंधकग्रहणेष्वित्युक्त्यौक्तभाष्यस्यसानुबंधकविषयत्वात्इत्यशंक्योक्तभाष्यंसर्वविषयकंनसानुबंधकमात्र
विषयं॥न्यायस्यसर्वत्रतौल्यादित्याह॥अनुबंधप्रस्तावादित्यादिना॥वक्तुंयुक्तमिति॥वशस्थानेभांतरस्थेनभवितव्यमेवप्र
त्यर्थाज्झकारस्यनिवृत्तेरितिभाव:॥वस्तुतस्तुमदोज्झमाचष्टेधोगित्यादौकृत्ववृत्त्याप्रयोगेज्झंतासंभवेपिजमडज्झन
मितिसूत्रस्थभाष्योक्तदिशाप्रातिपदिकसंख्यासाम्यमादायपरत्वादंतरतमपरिभाषांबाधित्वायथासंख्यशास्त्रप्रवृत्तौगर्ध

बित्यादौभकारापत्तेः॥अतएवभष्भषंतस्येतिनोक्तं॥स्थान्यादेशनिमित्तानांयथासंख्यविज्ञानेभांतस्यधोबशृतस्यभइत्यादि
सूत्रार्थपर्यवसानेगर्दभमित्यादौभष्भावानापत्तेरितिदिक्॥मूलेझलीतिनिवृत्तमिति॥नचबुबुधिध्वेइत्यत्रभष्भावनिवृ
त्तयेध्वमोझलीतिविशेषणमावश्यकमितिवाच्यं॥इटोध्वमोऽनवयवत्वेपिभष्भावनिमित्तध्वशब्दान वयवत्वेनैकाच्
ध्वशब्दयोरिटाव्यवधानेनादोषात्॥तड्ढाडिति॥इदमयुक्तं॥भष्भावेप्रवृत्तेपिझलांजशोंतइतिजश्त्वेनपुनर्ईकारप्रवृ
त्तेः॥बशःकिमिति॥झलांजशोंतइतिसूत्रस्थझलग्रहणमत्रैवकृत्वा जस्येवभष्विधेयइतिभावः॥कारकंप्रतीति॥भा
वेक्विप्पिनसाध्यत्वमात्रेणभानंधात्वर्थस्येतितत्रापिधातुत्वंनसुलभमितिभावः॥प्रत्ययनिमित्तकत्वाभावादिति॥भ्रौण
हत्येतत्वनिपातनेनसाजात्यात्प्रत्ययनिमित्तककार्यैरेवास्याःप्रवृत्तिरितिभावः॥केचित्तुधातुसंज्ञाब्दनेनविहितप्रत्ययः
क्विबेवतमाश्रित्यैवधुगित्यत्रधत्वादिप्रत्ययनिमित्तककार्यैरेवास्याःप्रवृत्तिरितितुन॥अनुदात्तस्यचर्दुपधस्याऽचिविभाषा
इत्यादौतदप्रवृत्यापत्तेरित्याहुः॥इक्यणः॥भाष्यविरोधादिति॥ननुवकारस्यलृकारोऽप्यंतरतमइतितद्ग्रहणाययथासंख्य
संबंधआवश्यकइतिचेन्न॥लकाराऽघटितत्वेनांतर्यादुकारस्यैवप्रवृत्तेः॥अत्रपक्षइति॥वर्णसंज्ञापक्षइत्यर्थः॥वचनप्रामाण्या

ङ्विष्यतीति॥ अन्येतुवर्णसंज्ञापक्षेनतद्भावितपक्षाश्रयणं॥सूत्रशाटकन्यायेनाप्यपरिहार्य्यस्यान्योन्याश्रयस्यापत्तेः॥अदुहितरामित्यत्रतुयथासंख्यविज्ञानान्नदोषः॥लृकारोपदेशःकिमर्थः॥लृकारोपदेशोयदृच्छाशक्तिजानुकरणलृत्याद्यर्थइतिन्यायात्लृक्सूत्रस्थंभाष्यंतुयथासंख्यशास्त्रप्रवृत्तेरप्युपलक्षणं॥एवंचवकारस्थानेलृकारवारणायोक्तंकुसृष्ट्याश्रयणमपिन॥केचित्तुसंप्रसारणस्येतिदीर्घारंभसामर्थ्येनसंप्रसारणप्रत्ययनिमित्तकांगावयवस्येवहलःपरस्यसंप्रसारणांतांगस्येवहलइतिदीर्घविधानेनादुहितरामित्यत्रनदीर्घः॥संप्रसारणनिमित्तप्रत्ययेवाप्रसित्धेः॥उक्तार्थाश्रयणफलंतुनिरुतमित्यादेर्दीर्घाभावइत्याहुस्तन्न॥उत्तरपदनिमित्तकसंप्रसारणस्यबहिरंगत्वेनासित्यत्वात्थलइतिदीर्घाप्राप्तेः॥परत्वेनेकोह्रस्वइतिह्रस्वबाधनार्थत्वाच्चदीर्घस्य द्युभ्यामित्यत्रतुदिवउदितिपरत्वसामर्थ्येनदीर्घबाधः॥भाव्यमानोप्युकारःसवर्णान्नृह्लातीत्यस्यार्थस्यापितपरत्वंज्ञापकमस्तु॥एकस्यानेककल्पकत्वेबाधकाभावात्॥वस्तुतोऋतउदितिपरत्वंभाव्यमानइतिपरिभाषायाज्ञापकं॥द्यूचइत्यस्याभिधानेचिकीर्षकइत्यादिवद्बहिरंगत्वेनासित्यत्वान्नतपरत्वसामर्थ्येनदीर्घत्वस्यवारणं॥द्युभ्यामित्यत्रतूत्वदीर्घत्वयोरंतरंगपदत्वद्वाराभ्यांनिमित्तकत्वेननांतरंगबहिरंगभावः॥अक्षद्यूरुषइत्यत्रापिनपूर्वरूपं॥ऊठिपूर्वरूपा

त्परत्वादंतरंगत्वाच्चतस्यहलइतिदीर्घः ल्विधित्वेनस्यानिवत्वेनसंप्रसारणत्वाभावात्॥यद्वाच्छ्वोःशूडित्यत्रहृस्वेविधातव्येदीर्घ
विधानंच्छ्वो रितिविहितस्योठःसंप्रसारणपदेनाग्रहणज्ञापनार्थंतेनाक्षद्यरुणइत्यत्रनपूर्वरूपमितिदिगित्याहुः॥सोर्लोपेद्यु
कामइत्यत्रसंप्रसारणस्येतिदीर्घोन॥उत्तरपदनिमित्तकेसंप्रसारणेएवतत्प्रवृत्तेः॥नचाक्षद्यरुणइत्यत्रचरितार्थस्यसंप्रसार
णस्येतिदीर्घविधानस्यसामर्थ्येनहलइतिदीर्घस्यहूतइत्यादौप्रवृत्तिर्नस्यात्पूर्वरूपस्यसंप्रसारणत्वाभावादितिवाच्यं॥पूर्व
रूपस्यसंप्रसारणग्रहणेनग्रहणत्वकल्पनात्॥इतिदिगित्याहुः॥ननुसंप्रसारणासंप्रसारणयोर्जातस्यपूर्वरूपस्यसंप्रसारणा
भावेनपूर्वरूपोत्तरंसंप्रसारणंनस्यादित्याशंक्याह॥नसंप्रसारणइति॥इदमयुक्तं॥अचःपरेतिस्थानिवत्वेनपूर्वरूपस्यसंप्रसा
रणत्वात्॥नचैवमिति॥पूर्वरूपोत्तरंवचनप्रामाण्यान्निषेधप्रवृत्तावपिसवर्णदीर्घोत्तरमपितत्प्रवृत्तौमानाभावइतिभावः॥अ
न्यत्रापिण्वुलिति॥णिजंतादिचितुप्रत्ययोहइतिरूपंदुर्लभं॥णिचाव्यवधानेनोठोऽप्रवृत्तेः॥तत्रोपदेशइति॥रुत्वशास्त्रवैयर्थ्या
भावादित्यर्थः॥यंविधिंप्रत्युपदेशोऽनर्थकःसविधिर्बाध्यतेयस्तुविधिर्निमित्तमेवनासौबाध्यतेइतिन्यायादितिभावः॥भाष्येध्व
नितत्वमेवाह॥एवमेवेति॥लोपेनप्रत्ययानुत्पत्तेरस्वीकारेएवेत्यर्थः॥अन्येतुविषयभेदेनोत्सर्गापवादभावः॥अचिरादेशस्य

नुडपवादत्वमपिनविषयभेदात्॥निरूपितंचेदंसविस्तरंत्रिपथगायां॥तथाचोत्सर्गापवादभावाभावेऽनङ्वानित्यस्यप्रत्ययल
क्षणसूत्रासत्वेनित्यत्वात्सोर्लोपेनुमोरनापत्यातस्यतत्सूत्रोदाहरणत्वमुपपद्यतएव॥इम्नुम्विधिसामर्थ्येनभूतपूर्वगत्या
श्रयणसंभवेप्यन्यार्थमारब्धत्वेपि प्रत्यय लक्षणसूत्रेणैवनिर्वाहउचितइतिभाष्याशयः॥किंचलोपशास्त्रेणानुत्पत्तेरन्वा
ख्यानेप्युत्सर्गापवादभावस्यावर्जनीयतयाऽमादिविषयेहलङ्यादिसूत्रेणप्रत्ययानुत्पत्तेरेवान्वाख्यानमसंभवी॥किंच
हेगौरीत्यादौसन्निपातपरिभाषयासंबुत्थिलोपानापत्तिप्रतिपादकभाष्यासंगतिः॥अपिचणिलोपशास्त्रेणणेरनुत्पत्तेर
न्वाख्यानेनाटिटदित्यादौसणिच्कस्यद्वित्वानापत्तिः॥यदिचद्विर्वचनेचातिनिषेधाद्वित्वेकर्त्तव्येनतदनुत्पत्तिबुत्थिःद्वि
त्वोत्तरंतुतदनुत्पत्तिरितिकथंचिदुच्यतेतर्हिअनङ्वानित्यत्राप्यमाबाधात्तत्प्रवृत्तिकालेनतदनुत्पत्तिबुत्थिःपश्चात्तुतथेतिसु
वचं॥अतृणेडितितदुदाहरणंतुभवत्येव॥तृणेढीत्यादौचरितार्थस्येमोहलङ्यादिलोपानपवादत्वात्इत्याहुः॥तांतस्यवि
धानमिति॥इदमयुक्तं॥तपरस्तत्कालस्येतितत्कालस्यसंज्ञित्वबोधनात्॥सर्वादेशत्वापादनमिति॥बोधकगतमनेका
लत्वंबोध्येउपकरोतीत्यभिप्रेत्येदं॥तदभावःफलमित्युक्तमिति॥तित्स्वरितमित्यत्रतित्यदंतिद्योध्यपरमित्यभिप्रेत्येदं।त

थाचकैयटेनोक्तं॥तिताप्रत्यापितःसंज्ञीसंज्ञाधर्मेणकथ्यतइतिअस्तितद्यपदेशआदेशस्येति॥एतेनतपरसूत्रेणाच्मात्र
स्यविधेयत्वात्तत्रानेकाल्त्वतित्वयोरभावादिदमप्ययुक्तमित्यपास्तं॥उच्चारणार्थानामपीतिपाठः॥अनुनासिकपरस्यवेरि
ति॥उच्चारणार्थानांविनैवेत्संज्ञाविवृत्तावनुनासिकपरस्यवेःकुत्राप्यभावेनसूत्रस्यनिर्विषयत्वंस्यादितिभावः॥उच्चारण
र्थानामित्संज्ञांविनानिवृत्यनिवृत्तिविचारःकाकदंतपरिक्षामनुकरोतीतिनात्रास्माभिःसूक्ष्मेक्षिकाकृता॥अतएवसुब्उत्पत्ति
रिति॥इक्प्रत्ययांतत्वादेव णेोगमिरित्यादीति॥आदिपदेनब्रुवोवचिरित्यादिसंग्रहः॥नोपधालोपइति॥वचिरित्यत्रसंप्रसा
रणमप्येवमेवन॥ईठ्नेति॥इदमुतस्तपरत्वंत्वितिपूर्वग्रंथेनविरुत्थं॥ज्ञापितेपिस्व स्मिन्चारितार्थ्यासंभवात्॥ईठोऽप्रवृत्तौ
व्यंजनस्यस्थानेअंतर्यात्प्रत्यस्येवप्रवृत्तेः॥दीर्घस्यबहिरंगतयेति॥उत्वदी र्घत्वयोस्तुल्यनिमित्तकत्वेनांतरंगबहिरंगभावो
नयुक्तः॥पदलाघवाभावइति॥षट्त्रिचतुर्भ्योहलादिभ्यः॥षट्चतुर्भ्यश्चेत्यनयोश्चतुर्ग्रहणद्वयस्यानुकरणं॥षट्कतीत्यत्रतु
चतुर्ग्रहणंकर्त्तव्यमेव॥कतिकग्रहणे नषडितिस्वरूपग्रहणात्॥रंतस्यषट्संज्ञायांतुपदत्रयमितिपदगौरवमितिभावः॥स
चार्थप्रधानएवेति॥प्रधानाप्रधानयोःप्रधानस्येवग्रहणमितिन्यायात्परत्वस्येवेति॥अयधितासंबंधेनशब्दनिष्ठपरत्वस्येत्य

र्थः॥तत्रसंबंधइति॥इदृशस्थलेद्वयीगतिः॥अवधित्वंपंचम्यर्थः॥अवधितानि रूपकत्वंवा॥तथाचतन्त्रसंबंधेअवधित्व
संबंधेतन्निरूपितसंबं धेअवधितानिरूपितसंबंधेचेत्यर्थः॥परंपरासंबंधेनेति॥स्वबोधकप्रतियोगित्वसंबंधेनेत्यर्थः॥गो
णेर्थेनविभक्तिः॥प्रकृतिप्रत्ययार्थयोःपरस्परासंबंधेननान्वयइत्युक्तार्थद्वयेभाष्यंसाधकमाह॥अतएवगंगायामिति॥प
रंपरासंबंधेनान्वयेतुगंगापदार्थस्यप्रवाहस्यसमीपवर्त्तितीरनिष्ठत्वसंबंधेनाधारत्वेन्वयसंभवात्॥स्वरितत्वप्र तिज्ञाश्रय
णंव्यर्थंस्यात्॥एवंगौणेर्थेविभक्त्युत्पत्तावपिबोध्यं॥इदंभाष्यंगंगापदस्यतीरेलक्षणामनाश्रित्योक्तं॥ण त्वात्पूर्वमेवेति॥इ
दंद्वित्वविषयेऽसित्थंनेतिपूर्वत्रासित्थमित्यस्यार्थमभिप्रेत्य॥गस्येवद्वित्वेइति॥पूर्वत्रासित्थमित्यस्यवर्णद्वित्वेप्रवृत्त्यभावे
जश्त्व द्वित्वचर्त्वानामसित्थत्वात्कुत्वेद्वित्वचर्त्वयोरसिद्धत्वाज्जश्त्वेततश्चर्त्वस्यासित्थत्वाद्गस्येवद्वित्वेइत्यर्थः॥गकारेझलिप
रेइति॥इदंगस्येवद्वित्वमितिपूर्वोक्तंचस्वग्रंथविरुद्धं स्वेन पूर्वंअवसाने चर्त्वस्यजश्त्वापवादत्वोक्तेः॥उक्तरीत्येवेति॥अव
सानेचर्त्वस्यासित्थत्वादित्युक्तरीत्येवेत्यर्थः॥इत्येवार्थइति॥द्वित्वभिन्नेपूर्वत्रकर्त्तव्येपरमसित्थमित्यर्थइतिभावः॥अन्येतुंपूर्व
त्रासित्थीयमद्वित्वइदंपदद्वित्वविषयेद्विर्वचनेपरसवर्णत्वंसित्थंवक्तव्यं॥उभौसाभ्यासस्येतिवार्तिकसूत्राभ्यांलिंगाभ्यांतेन

ऊर्णुनावौजदृदित्यादिसित्थं॥अन्यथापरत्वाण्णत्वद्वत्वयोस्तदसिद्धिः॥द्वित्वेकृतेद्वित्वाश्रयस्यकार्यैकर्त्तव्येसित्थत्वंनेत्य
पिनमानाभावात्।अभ्यासेजश्त्वचर्त्वयोरेत्वतुकोरितिवार्तिकाच्च॥अतएवफलिभजिग्रहणंज्ञापकं॥अभ्यासादेशसित्थत्वस्ये
ति॥अतएवहलितिसूत्रेभाष्येउक्तंत्वद्रीत्यादित्वाश्रयस्येत्वजश्त्वासित्थत्वाभावेनज्ञापकोपन्यासवैयर्थ्यम्॥सुपिभूतोद्वि
रुच्यतइतिपाठइतिदिगित्याहुः॥सप्तमीबहुवचनमिति॥नतुप्रत्याहारः॥प्रत्याहारांतर्गतानांसप्तमीबहुवचनभिन्नानांस्वरा
दित्वाभावात्॥एवंचेति॥सप्तमीबहुवचनस्यग्रहणेसित्थेइत्यर्थः॥तथाचभ्यामादावप्राप्तविधिसर्गविधिरयंनेतिभावः॥षडि
त्यन्वर्थसंज्ञेति॥षडिवाचरतीतिषट्॥प्राधान्येनसंख्येयबोधकः॥टाप्निषेधानापत्तेरिति॥स्त्रियांयद्यत्प्राप्नोतित्तन्नेत्यर्थाश्र
यणसामर्थ्येनभूतषट्त्वमादायनिषेधप्रवृत्तेःस्वेनोक्तत्वेनवृतेःप्राक्स्थितषट्त्वमादायनिषेधप्रवृत्तेःसंभवात्॥चिंत्यमे
तत्॥यद्वेत्युक्तंदूषयति॥आकडारसूत्रइति॥षट्भ्यइतिसूत्रविषयइति॥तत्रहिषट्भ्योलुगित्यत्रविहितविशेषणमाश्रितं
त्वद्रीत्याप्रियपंचानामित्यत्रषट्त्वाभावादेव लुगप्रवृत्तौतदाश्रयणेवैयर्थ्ये॥इत्युक्तमिति॥ ❀ ॥ प्रधानाप्रधानन्यायेनोप
सर्जनेषट्त्ववारणमशक्यं॥प्रियपंचानामित्यत्रपंचन्शब्दस्यप्राधान्येनसंख्येयबोधकत्वात्॥अन्यथात्रिचतुरोरित्यादावर्थ

वत्परिभाषयाप्रधानन्यायेनचप्राधान्येनत्रित्वादिविशिष्टबोधकग्रहणेप्रियतिसेत्यादौतिस्रादेशाद्यनापत्तिरित्युक्तमित्यनेन
ध्वनयति॥अनभिधानमेवोचितमिति॥सुध्युपास्येत्यादिप्रयोगानुरोधेन॥नपदांताःपरेणःसंतीतिभाष्यस्यकार्यभाजइतिपूर
णावश्यकत्वेकमल्वृक्षवित्यादिरणोप्रगृह्यत्वस्येतिकार्यभागत्वमस्त्येवेतिभावः॥यांतास्तुनसंतीति॥एचोयवायावइति
सौत्रोनिर्देशइतिभावः॥अथादेशइत्याद्यभियुक्तप्रयोगाच्चिंत्यमेतदितिकेचित्॥अंगानपेक्षत्वेनेति॥संज्ञाकृतबहिरंगत्व
स्यानाश्रयणाच्चिंत्यमेतदितिकेचित्॥अंतरंगत्वात्थित्वेऽकजिति॥अज्ञाताद्यर्थापेक्षत्वेनाकचोबहिरंगत्वमितिकैयटोक्तरी
त्येदं॥भाष्येतुपरत्वात्थित्वमित्युक्तं॥ननुयद्यकचःपरत्वाद्धित्वंतर्हिकादेशेपिपरत्वात्ततःप्राप्नोति॥यद्यंतरंगत्वाद्धि त्वंकादेशो
प्यंतरंगत्वात्ततःप्राप्नोतीतिचेन्न॥अकच्विधौतिङ॒श्चेत्युक्त्यासमनिमित्तकयोरकच्धिभावयोःपरत्वात्थित्वेऽकच्धका
लतनेष्वितिज्ञापकेनसुबुत्पत्यनंतरमकजुत्पत्तावप्यकचःप्रातिपदिकमात्रनिमित्तकत्वेनांतरंगत्वादकचिततःकादेशः॥
अतएवभ्यामादौकिमष्टेरेवप्रागकच्नतुसुबंतस्यटेःतदेतत्परत्वात्थित्वेऽकजितिहुझल्भ्योहेरितिसूत्रस्थभाष्येणकादेशः
खल्वपिअवश्यंसाकच्कार्योवक्तव्यइत्यादीनामितिसूत्रस्थभाष्येणचसूचितंभवति॥ननुसंनिकृष्टसावितिकुतो

वानानुवर्त्ततइत्याशंक्याह॥सावित्मइति॥इदमुपलक्षणं॥यःसावित्युत्तरसूत्रेसुग्रणाच्चेत्यपिबोध्यं॥अदंतत्वाभावादिति॥त
स्यचेत्यनाश्रित्येदं विशिष्टशक्तयेति॥सत्यन्यस्मिन्यूर्वोनास्तितत्रादिशब्दस्यसत्यन्यस्मिन्यस्मात्परोनास्तितत्रोत्पशब्द
स्यशक्त्येत्यर्थः॥असहायेइति॥असहायत्वंचात्रमुख्यव्यपदेशनिमित्तरहितत्वं॥तच्चोपगवआभ्यामित्यनयोरस्ति॥सत्य
न्यस्मिन्निति विशेषणस्याभावात्॥तथाचयन्निरूपितमादित्वमंत्यत्वमवयवत्वंवास्वस्यानेयंतदवयवस्वेतरद्वितीयास
मभिव्याहृतमसहायत्वं॥सभासन्नयनेदरिद्राधातोचाकारइत्यनयोर्नासहायत्वं॥तत्समुदायाघटकस्वेतरवर्णसत्वात्॥ह
रीइत्यादौद्विवचननिरूपितमंतत्वंईकारस्यानेयंतदवयवस्वेतरोनकोपीतिअसहाय त्वंसुरक्षं॥एवंव्यतिसेइत्यादावपि॥ह
रिष्वित्यादौसोर्नपदत्वं॥यस्माद्धिहितस्तदाद्यवयवकत्वस्यतत्तत्सत्वगर्भस्यव्यपदेशिवद्भावालभ्यत्वादेवंप्रचिकीर्ष्यगतइ
त्यादौनायादेशः॥अवयवत्वतद्व्याप्यधर्माणांव्यपदेशिवद्भावलभ्यत्वेपिलघुपूर्वत्वस्यतदलभ्यत्वात्॥अतएवदधीत्यादौ
नयण्॥अच्यरकत्वस्यव्यपदेशिवद्भावालभ्यत्वात्॥केचित्तुमुख्यव्यपदेशभागघटकत्वमसहायत्वमित्याहुः॥अकोकोरिति
अनाप्यकोनेदमदसोरकोरित्यनयोरित्यर्थः॥नन्वशोऽनुदात्तत्वविधानंव्यर्थं॥आभ्यामित्यादावूडिदंपदादितिविभक्तेरुदात्तत्वेन

शेषनिघातेनाशोऽनुदात्तत्वसित्थेरित्याशंक्याह॥अनुदात्तंत्विति॥शित्वादिति॥अशूविधानसामर्थ्याच्चनिर्दिश्यमानपरि
भाषाऽकचोव्यावर्त्तनायनप्रवर्त्तइतिभावः॥ननुतदादेरित्य स्यविशेष्यतयातदंतविधावनाभ्यामित्यादौसनुट्कस्यादेशाप
त्तेर्निर्दिश्यमानपरिभाषायाअप्रवृत्तेरितिचेन्न॥अकच्व्यावृत्तिफलिकायाएवतस्याअप्रवृत्तिकल्पनात्॥नुट्व्यावर्त्तिका
साप्रवर्त्ततएव॥ननुसंज्ञोपसर्जनयोस्त्यदाद्यत्वाप्रवृत्तावशवचनंसार्थकमितिनतत्सामर्थ्यं॥तथाचसाकच्केनिर्दिश्यमा
नपरिभाषयाऽदेशोनस्यादित्याशंक्याह॥संज्ञोपसर्जनयोरिति॥अन्यार्थापत्तेरिति॥आभ्यामित्यादेर्दीर्घादिबाधनार्थत्वाप
त्तेरित्यर्थः॥नकारलोपइत्यर्थइति॥इदानींतनमूलपुस्तकेषुनलोपइत्येवपाठः॥पर्युदासइति॥प्रसज्यप्रतिषेधेतुपूर्वजात
प्रातिपदिकत्वस्यापिनिवृत्त्यापत्तिरितिभावः॥ ॥ * ॥ ॥ * अतएवेति॥सप्तम्यंताद्राजन्शब्दात्कचोऽनभिधा
नादेवेत्यर्थः॥नलोपःसुप्॥नियमशास्त्राणांविधिमुखेनैवप्रवृत्तिर्ननिषेधमुखेनेत्याह॥अन्यनिवृत्तिफलकेति॥पशुपशाया
मिति॥स्टशेर्यडंतात्प्रत्ययेसंज्ञापूर्वकविधेरनित्यत्वात्टषोदरादित्वाद्वासाधुःगम्यतइत्युक्तमिति॥तेनप्रतिषेधस्याशक्यं
त्वमुक्तंभवति॥कन्मे जंतइतिसूत्रस्थेङ्गिधिराकारलोप स्येतिभाष्यंभोभगोइतिसूत्रस्थंकिंपुनःकारणंसुकारपरस्योदा

ह्रियतइतिभाष्यंचात्रार्थेगमकंबोध्यं॥प्रतिषेधस्यशाब्दत्वेस्वार्थहानिपरार्थकल्पनयोरापत्तिश्चदोषोबोध्यः॥नचमूलकेनो
पदंशमित्यत्रकृदंतत्वप्रयुक्तप्राप्तस्यसमासग्रहणकृतनियमेनपरत्वाद्धाधोनस्यादितिवाच्यंगगम्यप्रतिषेधस्यैवपरत्वेनबा
धकत्वसंभवात्॥यत्तुएचइ गितिसूत्रस्थंभाष्यंनानेकेनिवर्त्त्यतेपितुअनिकोनिवर्त्यते॥तच्चवार्तिकमुभयप्राप्तौकर्मणी
तिप्रतिषेधेकादिप्रयोगेऽप्रतिषेधइतितदुभयंगम्यमानप्रतिषेधपरं॥नानेनेकोनिवर्त्यतेइत्यस्यनानेनेकोऽपूर्वाविधीयंतइ
त्यर्थः॥अप्राप्तसित्थत्वेति॥परत्रषत्वेपूर्वस्यनलोपस्यासित्धत्वाप्राप्तेरित्यर्थः॥वैरूप्येति॥स्वरविध्यादौनियमार्थत्वंसुप्
विधौतुविध्यर्थत्वमितिवैरूप्येत्यर्थः॥वस्तुतस्तुक्रादिसूत्रवकृत्तत्थितइतिसूत्रइवचनियमशास्त्राणांविधिमुखेनप्र
वृत्याशाब्दबोधेनवैरूप्यं॥तस्यपूर्वपदत्वेइति॥एतत्फलंतुद्युलिहावित्यत्रद्वेद्वेधीतिपूर्वनिपातः॥कृतीतिकिमिति॥कृति
परतोविधौनलोपोसित्धइत्येवसित्धेतुग्रहणंचिंत्यप्रयोजनं॥अस्मादेवेति॥एतत्प्रयोजनंचिंत्यं॥वाहऊऊसूत्रस्योऊग्रह
णस्यबहिरंगपरिभाषायांज्ञापकत्वस्यभाष्योक्तस्यासंगतिश्चाकृतितुगेवनेति॥अयंसूत्रतात्पर्यविषयोनियमोनतुशाब्दम
र्यादयालभ्यइतिबोध्यं॥स्पष्टार्थमिति॥अंतग्रहणाभावेवमइत्यस्यषष्ठीत्वसंभावनायांवकारमकारसंबंधीयःसंयोगइत्यर्थः

स्यात्ततश्च व्रजंभासुहरितत्तृणसोमेभ्यइतिकृतसमासः॥तस्यसुजंभादेःशसादौनिषेधापत्तिरितिकेचित्॥वमादितिन्यासेतुदो
षश्चिंत्यः॥श्रीकृष्णभट्टास्तु येनविधिस्तदंतस्येत्यस्यानित्यत्वज्ञापकमंतग्रहणमितिसमासप्रत्ययविधौप्रतिषेधइतिसित्थ
मित्याहुः॥वृत्रहणीइत्याद्यनेकोदाहरणोपन्यसनंवैचित्र्यार्थम्॥नियमशास्त्राणांविधिमुखेनप्रवृत्तेरित्याशंक्याह॥एत
त्फलभूतेइति॥ननुवृत्रहयतीत्यत्राम्यवधानएवस्यान्नह्याभ्यांमवधानेघातकइत्यादावित्याशंक्याह॥इदमिति॥प्रघना
घनइत्यत्रेति॥केचित्त्वभ्यासस्यनिरर्थकत्वान्नात्रणत्वं॥मूर्त्तौघनइतिनिपातउपसर्गयोगेप्रघनइत्यत्रवार्तिकमतेपिप्रा
प्तणत्ववारणाय॥गारैकदेशेप्रघणइतिकृतणत्वनिर्देशस्योपसर्गात्परस्यहनोनस्यणत्वंनेत्यर्थज्ञापकत्वाश्रयणाच्चेत्याहुः
हादेशेष्विति॥अर्थतःकवर्गविशेषणंतत्फलंतुकरणेयोविद्धुष्वित्यनेनहंतेरप्रत्ययेद्यनादेशेचद्रुघणइत्यत्रपूर्वपदात्संज्ञे
तिणत्वसिद्धिः॥हस्थानिककवर्गाभावात्॥ननुवृत्रघ्नइत्यादौनणत्वं॥नकारमुपजीव्यजातस्यकुत्वस्यतद्विघातकणत्वानि
मित्तत्वादितिचेन्न॥त्रेपादिकेकार्यसन्निपातपरिभाषायाअप्रवृत्तेः॥अत्रचेदंवार्तिकंभाष्यंचमानं॥तेनजघ्नमित्यादौघत्वा
द्धिसिद्धिरित्येत्रविस्तरः॥मूलेःनिनस्मिन्निति॥अल्लोपोनः॥अनउदाहरणं॥राज्ञःदध्नःअस्य॥इनउदाहरणमिन्हन्॥दंडीवा

मी॥असउदाहरणंअत्वसंतस्यचाधातोः॥ सुपयाःसुस्रोताः॥मनउदाहरणं॥मनःसुशर्मासुप्रथिमा॥अत्रचज्ञापकमत्वसंत
स्येतिसूत्रेऽधातोरितिपर्युदासः॥नसंयोगादितिनिषेधश्च॥असतेर्विचियज्वनोब्राह्मणश्चणिजंताद्विचितस्मिन्नुपपदेऽनि
तेर्विचिनिषेधोसपूलाविति केचित्॥अलेवानर्थके नेति॥अत्रचज्ञापकं॥नेदमदसोरितिसूत्रेऽदसोग्रहणं॥इतियुवोरना
कावित्यत्रेति॥इतिशब्देनातिप्रसंगाभावरूपसाध्यांशमात्रंविवक्षितं॥भाष्येनपुंसकस्यझलचइतिसूत्रेयोगविभागेनो
क्तार्थज्ञापनात्॥तत्रेवेति॥असित्थत्वाभावकल्पनेएव॥असाधुत्वंलभ्यतइति॥अविशेषेणप्रवृत्तवार्तिकस्यकनिप्र
त्ययांतविषयकत्वस्यापिकल्पनात्॥मतुप्वन्योर्विधानादित्युक्त्यनुरोधेनवनिबंतविषयकत्वेतुकन्यंतार्थतदा व
श्यकत्वेनमघोनश्चनशिष्यमित्यसंगतंस्यादितिभावः॥ननुकनिन्प्रत्ययस्यलोकवेदसाधारण्येनविधानादुक्तवार्तिक
स्यकन्यंतविषयकमसंभवीत्याशंक्याह॥तथाचेति॥ननुनिपातितांतोदात्तमादायमघोनइत्यस्यसित्थावपिवनिबंतमा
दाययस्येतिचेतिलोपःस्यादित्याशंक्याह॥कंदसीति॥नाल्लोपेति॥अल्लोपोदृष्टांतार्थः॥अनंतत्वाभावादिति॥ननुवरुत्सा
दाविवस्यानिवद्भावेनान्नंतत्वंसुलभं॥आनुमानिकस्यान्यादेशभावाश्रयणात्॥स्थानिनिमघवन्शब्देऽन्नंतत्वसत्वात्॥

नचान्नंतत्वविशेषणवैयर्थ्यम्॥ युवतीःपश्येत्यादौसंप्रसारणनिवृत्त्यर्थत्वात्॥न चात्रविभक्तौलिंगविशिष्टाग्रहणमितिनि
षेधःशंक्यः॥तदननुसंधानेनैवतत्प्रवृत्तेरि तिचेन्न॥*॥अनइत्युभयोःशेषइतिभाष्यस्याकारवकारयोरुक्तंकार्यद्वयं॥अन्संबं
धिनोस्तयोर्बोध्यमितिवाक्यार्थाश्रयणेनादोषात्॥अन्नंतत्वाभावादितिशेखरग्रंथोनचादेशेकृतेऽन्नंतत्वमस्तीतिकेयटग्रंथश्चा
संगतएव॥अल्लोपदृष्टांतोप्ययुक्तः॥अनोऽकारस्यैवलोपविधानेनान्नंतत्वस्यश्रोतमानुमानिकंचस्यानिवत्वमाश्रित्यदुर्लभत्वे
नधीवरीत्यादि वल्लोपवारणस्यसुकरत्वेप्यन्नंतत्वमाश्रित्यप्रवृत्तमानसंप्रसारणस्यदुर्वारत्वात्॥अथवायुवतीःपश्येत्यादौवि
भक्तौलिंगविशिष्टाग्रहणमितिपरिभाषयासंप्रसारणाभावमभिप्रेत्यानइत्युभयोःशेषइतिभाष्यंप्रवृत्तं॥एवंचानामित्यर्थेपिनदे
षः॥विशेषणसामर्थ्येनश्रूयमाणान्नंतत्वविवक्षणात्॥लिंगविशिष्टाग्रहणादिति॥इदमुपलक्षणं॥झलंतस्योगितोग्रहणादित्य
पिबोध्यम्॥सर्वानुदात्तंस्यादिति॥नगोश्वन्नित्युदात्तनिवृत्तिस्वरस्यापिनिषेधांगीकारात्इतिभावः॥सावेकाचइत्यस्यैवनगोश्व
न्निति निषेधइत्यभिप्रेत्याह॥उदात्तनिवृत्तिस्वरेणेति॥अत्राद्यपक्षएवश्रेयानेवंतर्हिनवयंनञ्णस्यप्रतिषेधंशिष्मःकिंतर्हियेनको
नचित्प्राप्तस्यविभक्तिस्वरस्यायंप्रतिषेधइतिअसित्थवत्सूत्रस्यभाष्यविरोधः॥यदिपुनरयमुदात्तनिवृत्तिस्वरस्यापिप्रतिषेधो

विज्ञायेतनैवंशक्यमितितदुत्तरभाष्यंतुविभक्तिग्रहणमनुवर्त्यस्वरमात्रप्रतिषेधपक्षखंडनपरं॥आद्युदात्तत्वमिष्यतइति॥सावे
काचइतिविभक्तिस्वरस्तुनगोश्वन्निति प्रतिषिध्यइतिभावः॥इदमयुक्तं॥अल्लोपपक्षेप्युक्तरीत्योदात्तनिवृत्तिस्वराप्रवृत्तौफिषइ
त्यस्यपुनःप्रवृत्त्याशुनेत्यस्याद्युदात्तत्वात्॥नचलक्ष्येलक्षणस्येतिन्यायावतारःस्यानिभेदेनसंप्रसारणस्येवफिषइत्यस्यापिपुनःप्र
वृत्तिसंभवात्॥अतएवासित्थवत्सूत्रेभाष्येऽल्लोपेनवानिवृत्तौपूर्वत्वेनवानिवृत्तौस्वरेविशेषाभावप्रतिपादनंसंगच्छते॥तस्मान्न
निषेधइति॥मात्रशब्दःकार्त्स्न्येसर्वसंप्रसारणनिषेधइत्यर्थः॥पूर्वमिति॥यकारस्यसंप्रसारणप्राप्तेःपूर्वंपूर्वरूपोत्तरंसवर्णदीर्घरू
पैकादेशइत्यर्थः॥ननुवनजःकिमितिप्रश्नेऽनर्वायज्ञवदितिप्रत्युदाहरणंनोपपद्यतेऽसाविति प्रतिषेधविषयत्वेनद्यंगविकल
त्वादतआह॥अनडित्यस्येति॥अनर्वन् शब्देष्यावर्त्यइत्यर्थइति तत्फलंत्वनर्वाणावित्यादीतिभावः॥ननुपरस्मैपदानामित्यादा
विवाकारसमुदायस्यविधेयत्वेऽनेकालत्वात्सर्वादेशःस्यादित्याशंक्याह॥विशेष्येति॥भाष्येत्विति॥अष्टनआविभक्ताविति सूत्रेइ
तिशेषः॥एतेनपचिमथीतिसूत्रेएवंभाष्येनोपलभ्यतइतिकस्यचिच्छंकानिरस्ता॥तत्प्राप्तस्येति॥गुणाभेदकत्वप्रयुक्ताप्राप्तिः
प्रश्लेषान्निवार्यतइतिदीक्षितोक्तंदूषयन्मतांतरमाह॥केचित्विति॥इदंसर्वमिति॥प्रतिपत्तिलाघवेनतत्रैवोच्चारणेकर्त्तव्येइत्या

दिभाष्योक्तमाआदितिप्रश्लेषादितिमूलोक्तंचेत्यर्थः॥गुणाभेदकत्वेनप्राप्तस्य जातिपक्षेणप्राप्तस्यचेत्यर्थः॥अतएवेति॥गुणाभे
दकत्वप्रयुक्तप्राप्तेरण्यणनण्साधारण्येनाप्रत्ययइत्यनेननिषेधादेवेत्यर्थः॥इत्युक्तमिति॥षण्णांग्रहस्यप्राप्तत्वेनजातिपक्षगुणा
भेदकत्वपक्षयोस्त परसूत्रस्यनियमार्थत्वेनप्रापकत्वासंभवादितिपाठकस्तन्न॥नियमशास्त्राणांविधिमुखेनप्रवृत्तेः॥गुणाभे
दकत्वेनप्राप्नोतीत्यनुत्क्रातपरस्तत्कालस्येतिप्राप्नोतीत्युक्त्यागुणाभेदकत्वेनप्राप्तस्याप्यप्रत्ययइत्यनेननिषेधइतिसूचितंभव
तीत्याशयस्तूचितः॥तथाचतपरस्तत्कालस्येतिप्राप्नोतीतिभाष्यंगुणाभेदकाइत्यभिप्रायकं॥सर्वत्रसर्वविषयेजातिपक्षप्रयुक्त
प्राप्तेश्चप्रतिषेधकमित्यर्थः॥तत्रेति॥अप्रत्ययइत्यत्रेत्यर्थः॥तदाशयः॥गुणाभेदत्वेनप्राप्नोतीत्यनुत्क्रातपरस्तत्कालस्येतिप्रा
प्नोतीतिवदतोंभाष्यकारस्याशयइत्यर्थःगुणाभेदकजातिपक्षयोरण्ग्रहणस्या भावेनाण्ग्रहणस्य चतत्रसंबंधइत्ययुक्तमि
तिबोध्यं॥अतएवाप्रत्ययइत्यत्राण्ग्रहणासंबंधादेव॥ननुजश्शादिविधौजश्त्वजात्याश्रयसर्वजकारग्रहणासिद्धिः॥भाव्यमा
नेतिनिषेधात्तत्रचाण्ग्रहणसत्वादित्यतआह॥परिभाषायामिति॥पंचानामित्यादाविति॥नन्वेत्यबाधेत्यसदेशस्येतिपरिभाष
यासित्थेउपधाग्रहणंव्यर्थं॥अतउपधायाणौचङ्युपधायाइत्यादावुपधाग्रहणंनव्यर्थं॥ननं दअचकांक्षदित्यादौवारणार्थत्वा

त्॥अत्रहिनोक्तपरिभाषयानिस्तारः॥अंत्यसदेशानेत्यसदेशयोरेकस्मिन्प्रत्ययेप्राप्त्यभावादितिचेन्न॥पक्षारावित्यादावृतोऽकीति
गुणंबाधित्वादीर्घवारणायोत्तरार्थंतदावश्यकत्वात्॥चतुर्णामिति॥इदंतिऊनामित्यस्योपलक्षणं॥लिंगादिति॥वस्तुतस्तुअस्मान्निर्दे
शान्नतिसृचतसृइतिधर्मिग्राहकमानाच्चन्निपाद्यांसन्निपातपरिभाषानप्रवर्त्ततइतितत्वं॥तत्रापिप्रश्लिष्टेति॥ननुप्रश्लिष्टेपिगु
णाभेदकत्वाच्चयणेनप्रश्लेषवैयर्थ्यमित्याशंक्याह॥प्रश्लेषेणेति॥एवमन्यत्रापीति॥आसर्वनाम्नइत्यादौ॥ऊङ·इति॥ङि·त्वमा
देःपरस्येत्यस्यबाधनार्थंअष्टन्शब्दोघुतादित्वादंतोदात्तः॥व्यर्थमेवतदिति॥तथाचात्वस्यवैकल्पिकत्वेनचप्रक्रियालाघवाया
शिविधातव्येउड्·विधानसामर्थ्यात्पूर्वंगुणेततोवृत्थौरूपसिद्धिरितिवाच्यं॥उश्नादिचीतिनि षेधेनपूर्वसवर्णदीर्घस्याप्रवृत्या
ङि·तस्यतस्माच्छसोनेतिनत्वस्यचप्रवृत्याफलभेदाज्ञापितेपिस्वस्मिन्नचारितार्थ्यमितिभावः॥कार्यकालपक्षइति॥यथोद्देशपक्षे
तुझल्युपोत्तममितिस्वरेऽल्विधिभिन्नेस्वरेकर्त्तव्येस्थानिवत्वेनषट्त्वंसुलभंषट्त्वस्यसमुदायवृत्तित्वेनालवृत्तित्वाभावात्भ
विष्यतिकिंचित्कार्यमित्यभिसंधायात्वप्रवृत्तेःपूर्वकार्याभावेपिषट्त्वप्रवृत्तेः॥ननुकार्यकालपक्षेआत्वात्पूर्वंकार्याभावेनषट्त्वा
प्रवृत्तावपिपरत्वान्नित्यत्वाच्चझल्युपोत्तममितिबाधित्वाऽत्वेकृतेस्थानिवद्भावेननोतत्वमाश्रित्यषट्संज्ञाक्रियतइत्याशंक्याह

अल्विधित्वेनेति॥ यथोद्देशपक्षस्येवेति॥ननुयथोद्देशपक्षस्येवाश्रयणेनज्ञापनेपिस्वस्मिनचारितार्थ्ये॥अष्टन्शब्दस्यन्नः संख्याय
इत्याद्युदात्ततयाऽन्तानुदात्तत्ववारणायाष्टनोदीर्घादित्यस्यशसिप्रवृत्तेरावश्यकतयातत्रभल्युपोत्तममित्यस्याप्राप्त्याचैरितार्थस्या
ष्टनोदीर्घादित्यस्याष्टाभिरित्यादौभल्युपोत्तममित्यनेनपरत्वाद्बाधःस्यादेवेतिचेन्न॥अष्टन्शब्दस्यघृतादित्वेनांतोदात्तत्वात्॥ न
न्वेवमपिदीर्घग्रहणस्यनस्वस्मिन्चारितार्थ्ये॥स्वरविधौस्थानिवत्वनिषेधेनाष्टाभिरित्यत्रभल्युपोत्तममित्यस्याप्राप्तेरितिचेन्न॥अ
नंतरस्येतिन्यायेनाचःपरस्मिन्नित्यस्यसनिषेधइत्यंगीकारात्॥नन्वेवंसत्यष्टानामित्यत्राष्टनोदीर्घादितिविभक्त्युदात्तत्वंनस्यात्॥
नलोपस्यासित्थत्वेनाष्टन्शब्दस्यदीर्घातत्वाभावादित्याशंक्याह॥अंतोदात्तत्वंत्विति॥तत्प्रकृतेइति॥नुटिकृतेइत्यर्थः॥तथाचनुट्
दृष्ट्यानलोपस्यासित्थत्वेननुटोनस्वोपजीव्यविघातकादर्शनमितिसंनिपातपरिभाषायाःप्रवृत्तिरितिनवाच्यमितिभावः॥इदंका
र्यैकालपक्षेपिबहिरंगपरिभाषायास्त्रिपाद्यामप्रवृतिप्रतिपादकस्वग्रंथविरुत्थं॥ नार्कूटइत्यस्यपूर्वत्रवृत्त्यौकृतायामपिपरस्य
विसर्गस्यासित्थत्वाश्रयणेनत्रिपाद्यांतदप्रवृत्युपपादनात् अंतरंगपरिभाषादृष्ट्याविसर्गासित्थत्वंतुतत्रपक्षेनत्रिपाद्यांतदप्रवृत्यु
पपादकं॥यद्यपीदंतन्त्रासित्थंतत्विहसित्थमितिभाष्योक्तरीत्यातत्रपक्षेऽसित्थत्वेप्यन्यपरिभाषाणामिवास्याअपिप्रवृत्तेर्दुर्वारत्वा

त्॥अशास्त्रीयत्वेनेति॥राजभ्यामित्यादौनांतत्वस्यादंतत्वाभावस्यवाऽशास्त्रीयत्वेदीर्घाप्रवृत्तयेऽतिदेशदर्शनाद्दिमयुक्तं॥सुबादिविधावेवनलोपस्यासित्थत्वेनसन्निपातपरिभाषयानलोपस्या सित्थत्वेननाभावःसुब्विधौकृतेइत्यर्थेतुनमानमितिवक्तुंयुक्तं॥नलोपोवेति॥वाशब्दइवार्थः॥नन्वेवमात्वेहलीत्यस्यापकर्षः॥परत्वान्नित्यत्वाच्चनुटंबाधित्वाऽत्वेनुट्नस्यादितितत्प्रवृत्तयेयदिचकृतात्वस्यापिषत्वंतदासव्यर्थइत्याशंक्याह॥कार्यकालपक्षेइति ॥ननुकार्यकालेपिनुडर्थंषट्संज्ञायांततःप्राप्तनुटंपरत्वाद्बाधित्वाऽत्वेपिस्थानिवत्वेनषट्त्वमाश्रित्यनुट्सुलभइत्याशंक्याह॥तत्तद्विधीति॥ततश्चनुटमिवषट्त्वमपिबाधित्वापरत्वादात्वमितिभावः॥ननुलक्ष्यानुरोधेनयथोद्देशपक्षस्येवाश्रयणेननुट्सित्थौकार्यकालपक्षाश्रयणेनदोषोद्भावनंतत्परिहारायहलीत्यपकर्षश्चायुक्तइत्याशंक्याह॥दीर्घग्रहणादिति॥प्रतिपत्तिगौरवमिति॥हलीत्यपकर्षापेक्षयेत्यर्थः॥वस्तुतस्तुयथोद्देशपक्षेषट्त्वस्यस्थानिवद्भावेनसुलभत्वेषट्संज्ञायामुपदेशवचनंकर्त्तव्यं॥तातायष्टनोनुडर्थंअष्टानामित्यत्रात्वेकृतेषट्संज्ञानप्राप्तेत्युपदेशग्रहणाद्भवतीतिभाष्यवार्तिकयोरसंगतिः॥तस्मात्षट्त्वस्यनांतत्वविशिष्टसंख्यावाचकत्वेनालघटितत्वान्नातिदेशसाध्यत्वं॥संज्ञापदस्यतद्विधावुद्देश्यतावच्छेदकरूपेणैवप्रायेणसंज्ञिबोधकत्वात्॥अन्येतुहलीत्यपक

र्षेनुटिकृतेनआत्वंसन्निपातपरिभाषाविरोधात्॥नलोपेतुनसानतिस्त्रितिधर्मिग्राहकमानेनसपादसप्ताध्याय्यामेवतत्प्रवृ
त्तेः॥अतएवजग्धमित्यादौघत्वादिः॥अतएवदोदहोरितिसूत्रेभाष्येदंतत्वेधान्तत्वेचनत्वधत्वेथांतत्वेऽदोषस्तस्मात्यांतएवेत्युक्तं॥
एवंचहलीत्युभयोःशेषइतिप्रतीकमुपादायनुटिकृतेआत्वमितिकैयटग्रंथोशेखरग्रंथश्चासंगतएवेत्याहुः॥तज्ज्ञाप्यात्वमपिने
ति॥इदमयुक्तं॥प्रियाष्टानौप्रियाष्टानइतिनसित्यतिप्रियाष्टानौप्रियाष्टानइतिप्राप्नोतीतिष्णांतेतिसूत्रस्थभाष्यविरोधात्॥तत्र
ह्यात्वंकृत्वोऽनकृतोहलीत्यस्यापकर्षपक्षेप्रियाष्टाभ्यामित्यादाविवप्रियाष्टानामित्यादावप्यात्वप्रवृत्तेःसुलभत्वाच्च॥अतएवअन
भिधानादेव॥विशेषणार्थमिति॥अन्यथानुनासिकस्यक्विब्झलोरित्यादाविवक्विपोपिग्रहणापत्तिरितिभावः॥वस्तुतस्तदनुबंधकग्रहणे
तिपरिभाषायाःक्विपोऽग्रहणेसित्थेनकोन्यर्थएवेतिभाष्यकैयटयोःस्पष्टं॥णिजादीनामिति॥णिचःकृत्त्वेदेवदत्तेनपाचयतीत्यादौ
कर्तृकर्मणोरितिषष्ठ्यापत्तिः॥णिचःप्रकृतेःपचेरर्थेदेवदत्तस्यकर्तृत्वात्॥जनजननेइत्यस्माण्णिचिजनिवध्योरितिवृत्थिनिषे
धापत्तिः॥किंचचेचीयतइत्यादावकृत्सार्वेतिदीर्घानापत्तिः॥यङंस्तत्वात्॥रुरुदिवेति॥नन्विदमयुक्तमितिचेन्न॥नेड्वशीत्यत्र
तिङोव्यावर्त्यत्वासंभवेनकृद्ग्रहणसामर्थ्येनकृत्त्वावकेदेनक्त्वादिनियमंबाधित्वाऽस्यप्रवृत्तिविज्ञानादित्याशयात्॥नेड्वशीत्यस्या

पिक्रादिनियमेनबाधात्रुदिवमित्युचितं॥तत्रहिरुदादिभ्यःसार्वेतीडिष्यते॥कृत्वेतुनेड्वशीतिनिषेधःस्यात्॥ज्ञापकेनेति॥अङ्कृत्सार्वधातुकेतिसूत्रेसार्वधातुकग्रहणेनतिङंगकृत्संज्ञाभावकल्पनयेतिभावः॥ननुजागृयादित्यत्ररीङोऽप्रवृत्तयेक्रियादित्यत्रतत्प्रवृत्तयेरिङ्विधावसार्वधातुकग्रहणमात्रस्यानुवृत्त्यर्थंतदितिचेन्न॥एकदेशानुवृत्तौमानाभावेनतत्रापिसमुदायानुवृत्तौलिङ्ग्रहणवैयर्थ्यापातेनपर्युदासस्यैवाऽप्रवृत्तेरित्याशयात्॥क्किनोघइति॥यद्यप्यल्पप्राणप्रयत्नसाम्यादितिवक्तुमुचितं॥तथापिवकारस्यमहाप्राणताक्किनोघइतिवदेदितिकैयटोत्रेसिन्यासानुमेयेतिविवरणेस्पष्टं॥इतिमतेइति॥यदात्वन्येभ्योपिदृश्यतइतिदृशिग्रहणात्क्किब्वचीत्यादिसित्थमित्युच्यतेतदानेनषट्त्वमात्रंपर्यंतेविधीयतेक्विप्दीर्घौत्वन्येभ्योपिदृश्यतइतिबोध्यंभाष्येध्वनितमिति॥तत्रहिनुगचीतिन्यासेतदोःससावित्यत्रानेषइत्यादौसत्ववारणायतदोरितिनवक्तव्यंतोरित्येवसित्थेरित्युक्तंअतएवेति॥शेषग्रहणस्यविभक्तिविशेषणादेव॥एवंचेति॥मपर्यंताच्छेषबोधकत्वाभावेइत्यर्थः॥हलंतात्सआदेशइति॥तत्रहिभाष्येहिपर्यंतानामितिवचनप्रत्याख्यानायशेषेलोपइत्यस्यज्ञापकत्वमुक्काटिलोपशबभावार्थइत्यादिनाशेषग्रहणस्यटिलोपार्थत्वमुक्कातत्खंडितं॥एवमपितवाद्यादेशानामदंतत्वेवार्णादंगस्यबलीयस्त्वात्पररूपंबाधित्वाशेलोपेद्यपःप्रसंग

तादवस्थ्यंमनसिकृत्यतवममादिषुचादेशेषचकारउच्चारणार्थोहलंताएवत्वादेशाइतिनकचित्टापप्रसंगइत्युक्तंननुहलंताआदे
शाइतिपक्षेणिजंतात्किपिमांतयोर्हलंतेषुत्वाहादेशेषुकृतेषुशेषेलोपेवकारहकारयोर्निवृत्त्यापत्तिरित्याशंक्याह॥णिजंतात्विति
णिचमाश्रित्यतुनप्रत्ययोत्तरपदयोरित्यादेशः॥बहुत्वार्थकाभ्यामेवताभ्यांणिज्विवक्षणात्॥इदमुपलक्षणमिति॥नतुविशेषण
मित्यर्थः॥अत्रैवोक्तत्वेनेति॥त्यदादीनामित्यत्रैवोक्तत्वेनेत्यर्थः॥युष्मभ्यमिति॥संयोगांतलोपस्तुनभक्तल्ग्रहणसंबंधादितिभा
वः॥अतएवेति॥अर्थद्वयस्यव्यवस्थि त्तत्वादेव॥शेषलोपइत्यस्यार्थद्वयेतात्पर्यमित्यंशंभ्यामादेशोपियुक्तइत्यंशंचदूषयितुमाह॥
वस्तुतइति॥अभ्यमसूत्रेइति॥पूर्वोक्तस्यवस्तुतस्त्वित्यस्यात्रापिसंबंधः॥अंतरंगत्वादिति॥अज्ञाताद्यर्थानपेक्षत्वेने तिशेषः॥व
स्तुतस्तुपरत्वाद्युवादिषुपश्चादकचीतियुक्तं॥अतएवहुभक्तल्भ्येतिसूत्रेभाष्येभिंधकीत्यत्रपरत्वात्थिभावेऽकजदित्युक्तं॥युव
काभ्यामिति॥ओकारसकारभकारादाविततनिमित्तकोटिप्रविष्टंकिंत्वोकारसकारभकारभिन्नविभक्तौयुष्मदस्मदोःसुबंतयो
श्चेःप्रागकजित्येववचनशरीरं॥इतरविभक्तौत्वर्थात्सुबुत्पत्तेःप्रागेवप्रातिपदिकस्यटेःप्रागकजित्याश्रित्येदं॥अन्यथाभिंधकी
त्यादाविवपरत्वाद्युवयोःपश्चादकचिदोषाभावादसंगतमेतत्स्यात्॥उक्तमाख्यानेतुविभक्तिनिरपेक्षत्वेनांतरंगत्वान्किमाख्यावि

वयुष्मदस्मदोरप्यादेशात्पूर्वमकचिनिर्दिश्यमानपरिभाषयायुवावौनस्यातामितिदोषःस्पष्टः॥अग्रेकस्यचित्त्वेएवेति॥अंगुष्ठ
मारभ्यमस्तकांतंकुष्ठइत्येवप्रयोगः॥नतुमस्तकपर्यंतमपीतिभावः॥पदकार्यविषयइति॥सर्वनामप्रकरणेसंज्ञाव्यावृत्तेरभिव्य
क्तपदार्थेतिन्यायेनस्वयमभिधानात्तद्विरुत्थमेतत्।अतएवेति।आदेशप्रवृत्तेरनिष्टत्वादेवेत्यर्थः।प्रयोगदर्शनमितित्वादेशघटितप्रयोगद
र्शनमित्यर्थः।ननुयूयमित्यत्रशीभावस्यप्रत्ययकार्यत्वेनांगकार्यत्वाभावेनोक्तपरिभाषयातद्वारणसंभवइत्याशंक्याह।अंगाधिकारस्यइत्यर्थ
इति॥ननुविशेषणसमासेमकारस्यपूर्वनिपातापत्तिः॥असमासेसंयोगांतलोपाप्रवृत्तेोमइत्यस्यश्रवणापत्तिरित्याशंक्याह॥संहित
यापाठेइति॥तथाचमकारद्वयोच्चारणेपिनव्यंजनपरस्येतिन्यायेनैकमकारोच्चारणाद्विशेषः॥असंहितयापाठेतुव्यंजनपरत्वा
भावेविशेषःस्यादेवेतिभावः॥केचित्तुसंहितयापाठेजातिपक्षाश्रयणेनद्वयोरपिमकारयोरेकएवादेशइतिभावइत्याहुः॥सुटस्त्विति
ननुयदागमन्यायस्यातिदेशरूपत्व पर्यवसानात्त ्यकृतसन्निपातविघा ताभावेपिवास्तवसंनिपातविघा तस्त्वस्त्येवेतिपरिभा
षाप्रवृत्तिर्दुर्वारा॥अतएवकृन्मेजंतइतिसूत्रेआत्वंपुग्विधेरनिमित्तंस्यात्क्रापयतीत्युक्तमितिचेन्न॥यदागमन्यायस्यातिदेशत्वंने
त्याशयात्॥आत्वंपुक्विधेरनिमित्तमित्यपिपूर्वपक्षिभाष्यं॥अतएवाप्रतिविधेयंदोषे ष्वितिसित्यांतभाष्यव्याख्यावसरेक्रापय

तीत्याकारांतभक्तःपुक्नव्यवधायकइतिकेयटेनोक्तं॥अन्येतुकृतितुग्ग्रहणंसन्निपातपरिभाषायाअनित्यत्वेगमकं॥क्रापयती
त्यादौपुक्सिध्यतिससुट् कनिर्देशोप्यत्रैवगमकांतरं॥ तेनयद्यागमन्यायस्यातिदेशत्वे प्यवयवावयवस्यसमुदायावयवत्वे
पिग्रामणिकुलंवृत्रहभिःक्रापयतीत्यादौसन्निपातपरिभाषोपन्यासपरभाष्यविरोधेनेत्याहुः॥नतदंतस्येति॥यद्यावयवावयवः
समुदायावयवोनेत्यपिपूरणीयं॥त्वद्रीत्येति॥ननुत्वद्रीत्यापियुष्मदस्मदोर्विभक्त्यादेशेषुकृतेषुनलुकःप्राप्तिरतोमित्यमावाधा
त्प्राप्तिमात्राभिप्रायकत्वेममापितुल्यमितिचेत्सत्यं॥परिभाषाविषयत्वंसूचितंमिति॥तुभ्यंमह्यंत्वत्मत्॥तवममेत्यादौस्मेस्मा
त्स्याइत्यनयैवपरिभाषयानेतिबोध्यं॥युष्मदस्मदोर्विभक्त्यादेशेकृतेडि·द्वितीयस्थानिकादेशेकृतेपुनरादेशांतरंनेत्यशिशि
त्वेनज्ञाप्यतइंतिकेचित्॥अम्मांतएवावशिष्यतइतिव्याख्यानेतुतुभ्यमित्यादेःसित्यावपित्वस्यादेरसित्थिः॥अतःसन्निपा
तपरिभाषयावारणप्रकार एवयुक्तः॥अंगसंबंधीति॥इदंनयुक्तं॥धर्मिग्राहकमानविरोधात्।अतएवज्यादादीयसइतिसूत्रेभा
ष्यंकिमर्थंजात्यरस्येयसआल्वंमुत्वमुच्यतेलोपःप्रकृते नुवर्त्यतामकृद्यकारेतिदीर्घोभविष्यति॥एवंतर्हिसित्थेसतियदात्वंज्ञा
स्तितज्ज्ञापयत्याचार्योभवत्येषापरिभाषाःगवृत्तेपुनर्दीतावविधिरिति॥लोपश्चप्रत्ययसंबंधकार्येनेतिदिक्॥तत्फलंत्विति॥

विभक्तावित्यस्यफलमित्यर्थः॥तन्निवृत्तिश्चे ति॥अस्यवस्तुतइतिशेषः॥पूर्वग्रंथेनैकग्रंथत्वेसांप्रतिक्याभावेनभाविन्याग्रहण मितिपूर्वग्रंथस्यस्थानिवत्वेनसामृत्वमेवनत्वामृत्वमित्युत्तरग्रंथस्यविरोधापत्तिः॥स्थानिवत्वेनामृत्वाभावेनभाविन्याअपिसका रप्रसक्तेरसंभवात्॥सामृत्वमेवेति॥यद्यपिस्थानिवत्सूत्रेणस्थानितावच्छेदकधर्मातिदेशएवातिदिश्यतइतिननियमः॥आर्द्धधा तुकत्वाद्यतिदेशापत्तेनल्पीत्यादेर्वैयर्थ्यापत्तेः॥तथापिसंभावितमामंविहायसांप्रतिकस्यसामःस्थानिकत्वेनोपादानसामर्थ्येन सामृत्वमेवातिदिश्यतेनत्वामृत्वमितिकल्पनान्नदोषः॥प्रत्ययत्वसुपूत्वादीनांतुनव्यावृत्तिः॥आमितिनिर्देशेनप्रसक्तस्थानि तावच्छेदकभावस्यामृत्वस्यैवप्रवृत्तेः। ननुयुष्माकमित्यत्रसामोभावित्वंसंभवतिनत्वतित्वाकमित्यत्र॥तथाह्याकमःस्थानिवत्वे नामृत्वात्सुटःप्रवृत्यासकारस्यश्रूयमाणत्वात्॥अतित्वाकमित्यत्रसुटोप्रवृत्यानसामृत्वभावीत्यतआह॥सामृत्वस्याशास्त्रीय त्वे नेति॥यद्यपिनिर्जरसावित्यादौजराशब्दवत्आकम्यात्वंअशास्त्रीयत्वेप्यतिदेष्टुंशक्यंसामृत्वंतुसुटमादायार्थसमाजग्र स्तंनातिदेशतोलभ्यं॥तथाप्याकमःसुडुत्तरंआमृत्वप्रयुक्तशास्त्रीयकार्याभावेनस्थानिवद्भावेनामृत्वंदुर्लभंसामृत्वस्याशास्त्री यत्वेनशास्त्रीयकार्यप्रवृत्यप्रयोजकत्वेनातिदेशालभ्यत्वात्॥अतिदेशत्वाप्रयोज्यत्वादितिशेषरार्थः॥किंचयत्रसामृभावि

तत्राकमित्यर्थेआकमुत्तरंसुटःप्रवृत्तौतस्यश्रवणापत्तिस्तदेतदभिप्रेत्याह॥इतिदिगिति॥विप्रतिषेधेपूर्व मिति॥अन्येतुपूर्वश॥
स्त्रप्रवृत्तिप्रयोजकीभूतो विप्रतिषेधस्तुल्यंबलविरोधस्तेनेत्यर्थस्तस्यक्रियाविशेषणत्वाभिप्रा येणण्यस्त्रोपावियड्यण्गु
णवृत्थिद्दीर्घेभ्यःपूर्वविप्रतिषेधेनेतिवार्तिकप्रयोगःकरणत्वविवक्षयाचतद्व्याख्यानभाष्येचविप्रतिषेधेनेतिनिर्देशः॥एवंगुणवृ
त्थिओत्वेत्यत्रनव्योक्तरीत्यासमासेतुपूर्वविप्रतिषेधतइत्यस्यत्वमावपिप्रबाधंतइत्यनेनान्वयापत्तिः॥उक्तभाष्यवार्तिकयोर्
नन्वयइत्याहुः॥अतएवपदस्येत्यस्यप्रायेणावयवषष्ठीत्वादेव॥ननुन लोपसूत्रेऽतग्रहणंमुख्यप्रातिपदिकांतस्यग्रहणार्थं
तेनत्रः संख्यायाइत्यादौव्यपदेशिवद्भावेनप्रातिपदिकांतस्यनलोपोनेत्याशंक्याह॥त्रःसंख्यायाइति॥त्वामयोरिति॥अजादि
त्वाद्टाबितिभावः॥अन्येतुत्का ल्यप्प्रःशानञ्भोज्ञ्व श्योःक्विइत्यादिनिर्देशेनातो धातोरित्यत्रधातुपदमनाप्प्रत्ययेन
त्वामोरित्युचितं॥अजादित्वेनटापकल्पनेनप्रमाणमित्याहुः॥नवाक्षरत्वेनेति॥तथाचनवाक्षरस्यपादत्वाभावेनपादादिस्थत्व
भावात्पत्योदाहरणासंगतिरितिभावः॥वस्तुतोनवाक्षरेणछंदांसिवियतीतिऐतरेयब्राह्मणवचनात्॥नवाक्षरत्वेपिपाद
त्वमस्त्येवेतिवाच्यं॥स्मानित्यस्यचेति॥इदमयुक्तं॥एवंसतिगणेशइत्यादौडमुडापत्तेः॥तस्मादेवंविषयेनैकदेशविकृतन्यायो

इतिपूर्वंनिरूपितं॥ननुसंध्युत्तरमपादादावितिनिषेधप्रवृत्तावपिसंधेःपूर्वंनवाक्षरत्वेनतदप्रवृत्तौआदेशोदुर्वारइत्याशंक्याह संधिश्चेति॥इदमयुक्तं॥यत्धित्तपरमितिसूत्रस्यभाष्यकैयटाभ्यांपदद्वयनिमित्तकार्यात्प्रागंतरंगेप्येकादेशोनेतिकल्पनात्॥ संधेःपूर्वमादेशप्रवृत्तिशंकायाः परिहारंमतांतरेणाह॥नःक्षणेति॥उपजीव्यविरोधादिति॥नात्रसंनिपातपरिभाषाभिप्रेता॥ किंतुयतोनादइत्यत्रद्यच्कतामुपजीव्यप्रवृत्तस्वरस्यद्यच्कताविघातकत्र्यच्कतासंपादकतानेत्याकरोक्तदिशान्यायंयुक्त रमेतदितिबोध्यं॥इतिपरेइति॥इदमप्ययुक्तम्॥इण्धातौवक्ष्यमाणरीत्योभयतआश्रयणइत्यस्याभावेप्यंतादिवद्भावेन व्यपवर्गस्यालाभादेवेनैकादशे कृतेपदात्परास्मच्छब्दाभावादेकवचनेनविग्रहेप्रत्ययोत्तरपदयोरित्यादेशमाशंक्याह॥युवयोरि ति॥नतुद्वित्वादेर्नाप्येकत्वस्यभानंकिंतुसंबोध्यत्वेनैवानेकव्यक्त्यवगतिरितित्वमौनकृताविति योजनातथाचसंख्यानवगति रितिभाष्यस्यविशेषरूपेणसंख्यानवगमइत्यर्थइतिनकश्चिद्दोषः॥पचतीत्येतन्मात्रस्येति॥एतस्यवाक्यत्वेऽनंत्यस्यापिप्रश्ना ख्यानयोरितिप्लुतःस्यादित्याशयः॥निरर्थकशब्दसमुदायेति॥दशदाडिमानीत्यादिशब्दसमुदायेत्यर्थः॥देवदत्तेनशयितव्य मितिअस्तिर्भवंतिपरोऽप्रयुज्यमानोप्यस्तीतिभाष्यंतुसाध्यत्वेनभासमानक्रियाप्रधानसुबंतातिरिक्तविषयमित्याशयः॥तृ

तीयंचेत्रंपश्यतीत्यादीति॥एतदुत्तरंसएतत्समानार्थकमेवतिङ्तिङ·इतिवदत्सूत्रकाराभिप्रेतंवाक्यलक्षणंआख्यातंसविशेषणं
वाक्यमितिसमर्थसूत्रेभाष्येउक्तमित्यादिः॥एकतिङि·त्यस्येकानुपूर्वीतिङं·तवदित्यर्थइतिनब्रूहिब्रूहीत्यत्रनदोषइत्यलमित्यंतोग्रं
थःक्वचित्पुस्तकेदृश्यते॥केचित्तुसुप्तिङं·तचयइत्यस्यसुप्तिङं·तयोश्चयइत्येवार्थः॥देवदत्तेनशयितव्यमित्रास्तीत्यध्याहारा
न्नातिव्याप्तिः॥जरद्गवःकंबलपादुकाभ्यांद्वारिस्थितोगायतीत्यादौपरस्परमसंबंधात्निरर्थकसुप्तिङं·तसमुदायेवाक्यत्वमि
ष्टमेव॥अतएवालंकारिकैरपिअस्यवाक्यत्वमभ्युपगम्यदुष्टत्वमात्रंव्यवस्थापितंकिंत्वेवंपचतिभवतीत्यादिकेवलतिङं·
तसमुदायेऽव्याप्तेर्लक्षणांतरंक्रियावाकारकान्वितेति॥जरद्गवादिवाक्यस्यतुनवाक्यत्वंपदार्थानांपरस्परमनन्वयात्॥लो
केत्वर्थवंतिचानर्थकानिचवाक्यानिदृश्यंते॥अर्थवंतिदेवदत्तगामानय॥अनर्थकानिदशदाडिमानिषडपूपाःकुंडमयाजि
नंपललपिंडमितिवृत्तिसूत्रस्थभाष्येदशदाडिमानीत्यादेर्वाक्यत्वव्यवहारस्तुभाक्तइत्याहुः॥स्वार्थइति॥स्वंचशब्दस्तदर्थस्तमु
च्चयस्तदाश्रयोहरिः॥तदन्वयीस्वामीतदन्वयित्वंमेइत्यस्य॥प्रकृतसूत्रस्थेवेति॥पश्यार्थैरितिसूत्रस्थेवेत्यर्थः॥तत्रसमानवा
क्येइत्येतत्संबंधात्प्राक्एवंवाचोयुक्तिः॥अतएवेति॥युक्तग्रहणाभावेपिसाक्षाद्योगस्यग्रहणादेव॥नपंचमीति॥एवग्विना

नानाभिस्तृतीयान्यतरस्यामित्यनेन॥एवंचयुक्तग्रहणाभावेनपश्यार्थैरित्येतत्परस्परासंबंधेपिप्रवर्त्ततइति॥मूलोक्तमयुक्त
मितिभावः॥संबंधित्वेनविवक्षायामिति॥मत्वर्थेबहुव्रीहिरितिवार्तिकानुरोधेनेदम्॥तेनसहेतितुनसमासस्तुल्ययोगइत्युक्तेः
काव्यप्रकाशादाविति॥काव्यप्रदीपआदिपदग्राह्यः॥कार्त्स्न्यकेवलानितिःप्रेर्य्स्वापदचेष्टितं॥अतःसित्थंसमेताभ्यामुभाभ्या
मन्वियेषसइत्यादौतथादृष्टत्वादितिभावः॥ननुसंज्ञाविधौतदंतविधिर्दुर्लभइत्याशंक्याह॥आमंत्रणमिति॥ननुप्रथमायाअ
मंत्रितसंज्ञायामप्यामंत्रितस्यप्रत्ययमात्रवृत्तित्वेनप्रत्ययग्रहणपरिभाषयाप्रदेशेषुतदंतविधिसंभवेनामंत्रितसंज्ञायांतदंत
विध्यभावेपिनकश्चिद्दोषइतिमहासंज्ञाकरणंव्यर्थमित्याशंक्याह॥अतएवेति॥तदंतविधिस्वीकारादेव अत्रसंज्ञानस्यादिति
नन्वेवंसुप्संज्ञायाअप्यप्रवृत्तौसुप्तिङंतमितिपदत्वंहेहेइत्यादीनांनस्यात्॥किंचद्विवचनसंज्ञायाअप्रवृत्तौकुमार्यौअगारंवध्व
गारमित्यादावीदूदंतंद्विवचनांतंप्रगृह्यमितिपक्षेप्रगृह्यसंज्ञापादनंभाष्यकृताकारीयमसंगतंस्यात्॥तस्मादंतरंगानपीतिन्यायो
धर्मिग्राहकमानबलेनसंज्ञाविधिभिन्नविषयइतिनकश्चिद्दोषइतिचेत्सत्यं॥अव्ययादाविव्यादावुपजीवत्वेनसुबादिसंज्ञायाः
लुकःपूर्वंप्रवृत्तावप्यामंत्रितसंज्ञायास्ततःपूर्वंप्रवृत्तौमानाभावइतिआशयः॥अतदर्थमेवेति॥विभाषादिक्समासइत्यादावि

वलक्षणप्रतिपदोक्तपरिभाषयासंबोधनपदमुच्चार्यविहितप्रथमायाग्रहणवारणार्थंसेतिपदंतत्सामर्थ्याच्चप्रथमामात्रंसेतिपरा
मृश्यतइतिभावः॥ननुसंबोधनपदात्प्रातिपदिकार्थेतिप्रथमायामप्यामंत्रितसंज्ञाप त्तिः॥संबोधनमात्रबोधकत्वंतुअग्ने इत्या
दावपिनएकत्वादेरपिततोबोधादितिचेन्न॥संबोधनमभिमुखीकरणंतच्चप्रत्यासत्याप्रकृतक्रियाविषयंतथाचसंबोधनम
स्तीत्यादौप्रकृतक्रियायामभिमुखीकरणाभावात्नात्रसंबोधनेप्रथमाकर्मशब्देद्वितीयाभाववत्॥प्रकृतक्रियायांतद्विवक्ष
णेतुसंबोधनेचेत्यनेनैवप्रथमानप्रातिपदिकार्थसूत्रेण॥संबोधनस्याधिक्यात्॥कर्मगच्छतीत्यादौप्रथमाभाववत्अत्रापि
हेहेइत्यत्रापि॥संबोधनपदादस्यावारण मुक्तदिशाबोध्यं॥स्वाश्रयस्यापीति॥कतिपयस्येतिशेषः॥वत्करणेनसर्वथाऽविद्यमा
नंकिंतुतत्सदृशमितिबोधनात्॥पूर्वंकिमिति॥इदमत्रपूर्वमित्यादिपूर्वग्रंथेनगतार्थं॥एवमेवेति॥विद्याबलंदेवबलंतदेवेति
पूर्वपदस्थितएवशब्दात्परत्वादादेशइतिभावः॥वस्तुतस्तुनैतद्युक्तंएवशब्दस्यस्मरणमीतितिङंतघटितवाक्यस्यत्वाभावेन
समानवाक्यस्थत्वाभावात्॥पश्यार्थैरितिनिषेधाच्च॥व्रजानिदेवदत्तेतिवत्वक्ष्यमाणरीत्याकथंचित्संभवेपितस्मात्तेइतिवि
भक्तिप्रतिरूपकमव्ययमित्येवयुक्तं॥इत्यादाविवेति॥नन्चेतदप्येतत्समशीलमितिकथमस्यदृष्टांतत्वमितिचेन्न॥हेलव

कुशोगेयेगानेप्रबंधे वांयुवांकेनपुरुषेणविनीतौशिक्षितावित्यर्थस्यविवक्षितत्वेनद्वितीयार्थकर्मत्वादेरनन्वयेनविभक्तिप्र
तिरूपकाव्ययस्यात्रावश्यकत्वात्॥नन्वेवंनार्थतोविभक्तिप्रतिरूपकत्वमितिवाच्यं॥परिष्करिष्यमाणस्यतस्यसत्वात्॥प्रकृ
तेपीति॥सर्वदारक्षदेवनइत्यत्र॥अन्यार्थमिति॥स्वरार्थमित्यर्थः॥बहुवचनमसंगतमिति॥इत्यादिभ्यइत्यनेनगृहीताना
मेवसर्वेषामित्यनेनग्रहणमित्यभिमानेनेदं॥गंगेइत्यादीनांग्रहणेतुयथाश्रुतमेवसाधु॥निवृत्तिरिति॥वस्तुतोस्यछंदोविशे
षत्वाभावेननपादादिस्थत्वं॥नन्वग्नेतेजस्विन्नित्यनयोःपरस्परंविशेषणविशेष्यभावोस्तिवानवा॥नाद्यः॥नडिसंबुत्थ्योरि
तिसूत्रस्यभाष्यविरोधात्॥तत्रहिडिसंबुत्थ्योरनुत्तरपदेराजन्वृंदारकोराजवृंदारकः॥संबुत्थ्यर्थेननार्थः॥संबुत्थंतानांस
मासः॥किंवक्तव्यमेतत्॥समाससमानार्थेनवाक्येनभवितव्यं॥यश्चेहार्थोवाक्येनगम्यतेनासौजातुचित्समासेनावयवसंबो
धनंवाक्येनगम्यते॥समुदायसंबोधनंसमासेनेतिभाष्यं॥कैयटश्चसंबुत्थंतानामितिष्ठगवयवा र्थयोरभिमुखीकरणेपर
स्परैकार्थीभावलक्षणेसामर्थ्यायोगादिति॥नांत्यः॥सामान्यवच नत्वविशेषवचनत्वयोर्विशेषणविशेष्यभावाधीनत्वेन
तदभावेप्रकृतसूत्रस्यासंभवादुक्तिकत्वापत्तेरितिचेद्यथेच्छसितथास्तु॥शब्दतःप्रथमंसंबुध्यंतार्थयोःपरस्परंविशेषणविशे

ष्यभावानवगाहिशाब्दबोधोपगमेप्यस्त्रणाधिकरणन्यायेनपार्ष्णिकपरस्परावक्केदमाश्रित्यसूत्रस्योक्तिसंभवोपपत्तेः॥सर्वथाविशे
षणविशेष्यभावाभावेपिवाऽग्नित्वतेजस्वित्वयोःसमान्यविशेषभावमात्रेणसूत्रस्योक्तिसंभवाच्च॥तदुक्तंकैयटेनाग्ने देविस
रस्वतिइडेकाम्येविहव्येएतेषांपर्यायत्वेनसामान्यवचनत्वाभावः॥सामान्यस्यविशेषापेक्षत्वादिति॥देवकरोषीति॥अत्रदेव
पदार्थस्यकारकप्रकरणेवक्ष्यमाणरीत्याभेदसंबंधेनक्रियायामन्वयेपितिङ·तप्रकरणेक्रियाक्रियावतोरभेदइतिवक्ष्यमाण
रीत्याक्रिययासममभेदस्यवास्तवस्यसत्वेपितिङ·र्थेनवातस्यसत्वेनसामानाधिकरण्योपपत्तिः॥अत्रसामानाधिकरण्येइति
चिंत्यप्रयोजनं॥ननुसकर्मकत्वादंचेःसुप्युपपदेक्विपाभाव्यं॥नचनिपातनसामर्थ्यात्कर्मणीत्यधिकारबाधः॥सुपीत्यधि
कारस्यापिबाधापत्तेरित्यतआह॥निपातनेरिति॥संस्कारविशेषज्ञापकेनअंचित्यनुवंधनिर्देशेनसुपीतिप्रकरणबाधस्यन्याय्य
त्वादितिभावइतिकेचित्॥अलाक्षणिकस्यापिकार्यस्यपूर्वोत्तरनिपातनेषुदर्शनेनतत्साहचर्यादत्राप्यंचतेःसुप्युपपदेस्वक्विन्
नतुयुजेरिवनिरुपपदादित्यर्थइत्यन्ये॥अनिदितां॥हलःकिं॥नुतः॥उपधायांकिं॥नष्टं॥अंत्यसदेशपरिभाषातुअंत्यसदेशानं
त्यसदेशयोरेकस्मिन्लक्ष्येयुगपत्प्राप्त्यभावेननप्रवर्त्ततेः॥प्रत्यक्चेति॥अन्येतुसुपातपदःविम्बबाहघटोहइत्यादौपूर्वस्पपट्टा

वसंप्रसारणेप्राप्नुतः॥नह्ययमंत्यबाधेत्यपरिभाषायाविषयः॥तथाचप्रत्यासत्यापदंतस्यांगस्ययत्कार्यंतस्येवतत्कार्यमित्येषपं
थाःशरणंतेनैवचन्यायेनप्रत्यक्चेत्यादिसिधावंत्यबाधपरिभाषाव्यर्थैव॥तदेतदभिप्रेत्येषापरिभाषाभाष्येप्रत्याख्यातेत्या
हुः॥प्रत्यंचाविति॥प्रथमनकारस्य लोपेपुनर्नुमिप्रत्यंचावितिरूपं॥तथाचतन्मध्यपतितन्यायेननुमविशिष्टस्याप्यचइ
त्यनेनग्रहणंस्यादितिभावः॥ नकाररहितप्रत्यग्भ्यामित्यपिबोध्यं॥नन्वणग्रहणानुवृत्तौकर्तृचेत्यादौदीर्घानापत्तिरत
स्तदनुवृत्तिर्नकर्त्तव्येत्यतआह॥कर्तृचेतिविवक्षितत्वादिति॥तथाचक वरेरूपेप्रत्ययेइत्यर्थेक्विबादिरित्येवार्थःपर्यवस्य
तीतिभावः॥अंत्यस्येति॥यस्येत्यर्थः॥न्यायसिद्धेर्थेगमकमप्याह॥अतएवेति॥अनेकक्लिष्टकल्पनेति॥आकडारीयेषुका
र्यकालपक्षाश्रयणंतदेकवाक्यतां अंगांशेउत्पितांशत्वेनयजादिप्रत्ययेनानोविशेषणमित्यादिक्लिष्टकल्पनेत्यर्थः॥न
लोपस्यासिद्धत्वादिति॥नलोपःसुप्स्वरेतिसुप्विधौनलोपस्यासिद्धत्वादल्लोपोनइत्यस्यचसुप्विधित्वात्॥बाधायोगा
दिति॥संज्ञाशास्त्रेणकार्यकालपक्षेस्वदेशत्यागेनाकडारीयत्वाभावादसिद्धत्वाच्च॥उपसंहृतंभाष्येइति॥वस्तुतस्तुयथोद्दे
शपक्षेप्यन्तेतस्यभस्यांगस्यातोलोपइत्यर्थेपिनानस्तद्धीत्यादौदोषः॥निर्दिश्यमानांत्यानकारएवलोपप्रवृत्तेः॥अस्यस्

इदंसइत्यादौसचासावेषचतदेषइत्यादौतदइदमश्चतकारस्यदकारस्यचतदोः ससाविति सत्ववारणायोक्तकल्पनायाआवश्यकत्वात्नह्यत्रानंत्यविकारइतिपरिभाषाप्रवृत्तिःसंभवति॥त्यदाद्यत्वंबाधित्वापूर्वमेवप्रवृत्यांत्यवर्णतद्वर्णयोरितराव्यवधानाभावात्एतच्छब्दस्यकृताकज्कादःशब्देनसमासेऽतदसुकइत्यादौतत्परिभाषाप्रवृत्तिशंकायाअप्यभावाच्च॥नचोपसर्जनत्वात्पूर्वस्यनतत्वंएवमप्यस्यायंददमयंयूपंपुत्रायस्यसयुष्मत्पुत्रस्तस्यत्वंयुष्मत्पुत्रत्वंइत्यादावयच्त्वमाद्यादेशापत्तेश्चतस्मादेतत्परिभाषाप्रत्याख्यानमेवभाष्यकृतोभिप्रेतंयान्येतस्याःपरिभाषायाःप्रयोजनानितदर्थमेषापरिभाषाकर्त्तव्येतिभाष्यंतुप्रौढ्या॥प्रयोजनविशेषमप्रदर्श्यसामान्येनतथोक्तेः॥भसंज्ञायांकार्यकालपक्षोप्याश्रयितुंशक्यः॥तत्पक्षेपरिभाषाणामिवसंज्ञानामपिंस्वदेशप्रच्युतौमानाभावात्अयादिभ्यःपरैवप्रगृह्यसंज्ञेतिभाष्यस्पप्रगृह्यसंज्ञाप्रयुक्तप्रकृतिभावइत्यर्थइतिनदोषइतिदिक्॥इतराव्यवधानएवेति॥ननुहंसशिरांसीत्यत्रेतत्परिभाषाप्रवृत्तिर्नस्यात्॥कार्यिणोंत्यवर्णस्यचसत्कारेणव्यवधानादितिचेन्न॥इतरपदेननिमित्ततयाविशिष्यसूत्रानुपात्तस्येवग्रहणेनादोषात्॥केचित्त्वत्रतच्छब्देनांत्यवर्णसदेशकार्यिवर्णइत्यर्थः॥अंत्यत्वावच्छेदकवर्णवृत्त्युपाध्यवच्छिन्नतत्तत्सदेशकार्यिणोव्यवधानाभावइतितात्पर्यमितिकोर्थः॥तेनहंसशिरांसीत्या

दावंत्यसंयोगतत्सदेशकार्यिणोरितराव्यवधानादेतत्परिभाषोपस्थितिरित्याहुः॥अत्रप्रमाणमिति॥तंत्रेणार्थद्वयेइत्यर्थः॥सू
चितमित्याहुरिति॥अन्येत्वत्रसूत्रकार्तिकभाष्यकृतामसेरित्यस्यप्रतिषेधएवतात्पर्यवार्तिककृता॥अदसोद्रेरितिवचनपाठेने
तत्सूत्रभोष्येभाष्यकृतापदाधिकारादपदांतस्यमुत्वेनप्राप्नोतीत्याशंक्यदयमसेरितिप्रतिषेधंशास्तितज्ज्ञापयत्याचार्यअप
दांतस्यापिभवतीत्युक्तेश्च॥अमुमुयडि॰तिनसित्यतीत्युक्तेयदमेवरूपंसाधुत्वेनभाष्यकृतोभिप्रेतं॥अदद्रुडि॰तिप्राप्नोतीत्यु
क्त्यातत्रासंमतेःसूचनात्॥अदमुयडि॰तिभवितव्यं॥अंत्यविकारेंत्यसदेशस्यकार्यंभवतीतिभाष्यंत्वेकदेशिनःस्वखंडितपरिभा
षाश्रयणेनरूपापादनरूपत्वात्तस्येत्याहुः॥ननुविष्वद्रेवयोरित्यस्याभावेपिचकारेणसर्वनाम्नामनुकर्षणादम्वाचीत्यादेर्नास्य
प्राप्तिरित्याशंक्याह॥चस्यापीति॥ज्ञानकृतगौरवापत्तेरिति॥इदमुपलक्षणं॥साकच्केचविशेषात्॥अव्याकुलंगकृतीत्यर्थकइ
ति॥एतेनोंचुगतिपूजनयोरित्यस्यस्थानेऽचुगतावचिपूजायामित्येवसित्थेनांचेःपूजायामितिव्यर्थमित्यपास्तं॥॥योपधत्वबोध
नद्वारेति॥नकारजावनुस्वारपंचमौभ्रलिधातुष्वित्यतिप्रायिकं॥अपिनेति॥नलोपाभावोपीत्यपिनेत्यर्थः॥सलोपेकृतेषत्वमिति॥
एतेनषत्वंस्कोरितिसलोपइतिमूलेपाठक्रमादर्थक्रमस्यबलवत्त्वेनवैपरीत्येनव्याख्यानंसूचयतिएषदादिव्यावृत्तयेइति॥अतिप्र

त्ययांतस्यचेद्देतयोरेवेतिनियमइतिभावः॥ननुलाघवायशत्रंतारएवेतेनिपात्यंते॥वृहन्महतोरुपसंख्यानस्येष्टनियमपरत्वात्ति
त्थेः॥महच्छब्देयगाद्यभावनिपातनस्वीकारएतेश्च॥मन्मतेतुशतृप्रत्ययांतस्ययत्कार्यंतदतिदिश्यतेनतुशतृप्रत्ययेपरतोयत्कार्यं
तदपीतिदिक्॥अत्वसंतस्यचाधातोः॥तुशब्दादिति॥त्वर्थेचशब्दादित्यर्थः॥अतएवेति॥अधातोरित्यस्यासंतांशएवसंबंधादे
वेत्यर्थः॥अनुवादकमिति॥केचित्त्वंतग्रहणमौपदेशिकांतत्वप्रतिपत्त्यर्थं॥नचोपदेशेगोमानित्यतुबंतेनात्वंतमितिवाच्यं॥उपदे
शेजितिवाक्यार्थबोधस्पहलंत्यमित्येतद्वाक्यार्थबोधाधीनत्वात्तदुत्तरप्रकृत्तिकत्वात्पकारस्येत्संज्ञायांलोपेचकृतेऽत्वंतत्वसंभव
इत्याहुः॥नन्वन्यत्रलब्धविशस्यपरेणबाधोवक्तव्यः॥नचान्यत्रदीर्घोलब्धावकाशइतिअतआह॥वचनसामर्थ्यादिति॥तथाच
नुमिकृतेदीर्घस्यावकाशसंभवइतिभावः॥इदंचनिरवकाशत्वेसत्येवापद्यत्वमितिवार्तिकमताभिप्रायेणोक्तं॥सत्यपिसंभ
वेबाधनंभवतीतिभाष्यमतानुसारेणाह॥अयमभ्युच्चयइति॥वस्तुतस्तुविद्यमानमपिपरत्वमन्यत्रचारितार्थ्याभावेनविप्र
तिषेधशास्त्रप्रवृत्त्यनुपयोगीत्युच्यते॥परंनित्यंचनुमंबाधित्वावचनसामर्थ्यादीर्घमूलग्रंथेन॥अत्रोत्सर्गेनुमिकृतेअपवादस्य
चारितार्थ्याभावेननात्रतत्रकौंडिन्यन्यायविषयइतिदीर्घकृतेपिनुम्प्रवर्त्ततएव॥नन्वाश्रीयमाणेएवभूतपूर्वगतिस्वीकारेप्यु

पदेशेपकारस्यसत्वेनोपदेशेऽत्वंतस्यांगस्यदीर्घइतिवाक्यार्थसंभवइत्याशंक्यमनसिकृत्यतन्निरासायभूतपूर्वगत्याश्रयणेन लब्धमर्थमाह॥तस्मादिति॥नलोपिनइति।इदंविशेषणंप्राङ्ब्राह्मणीत्यत्रङीबभावार्थं॥उगितश्चेतिसूत्रेभाष्येत्वंचतेरेवोगितो धातोर्नान्यस्योगितोधातोरित्येवनियमश्चरीरमुक्तंकैयटेन॥नचनांचेःपूजायामितियदानल्लोपस्तदप्रतिषिध्यतेतदापिङीपूभ वतीत्युक्तं॥असतिप्रयोजनइति॥प्रयोजनाभावेसत्यशब्दार्थप्रयोजनार्थत्वोक्तेरुपहासपरत्वादितिभावः॥विभावयंत्वि ति॥ ॥ ॥ ॥ ॥ ॥केचित्तुयथेकोगुणवृद्धीतिसूत्रेगुणवृत्थिग्रहणानुवृत्तौ पुनर्गुणवृत्थिग्रहणादाश्रितश ब्दस्वरूपव्यापारयोर्गुणवृत्त्योर्बोध्यः॥एवंद्वेइत्यस्या नुवृत्त्येवसित्थेपुनरुभेग्रहणाद्वित्वपर्याप्तावयवसमुदायबोधोगर्ग दंहनन्यायेन॥उक्तार्थलाभस्तुपाक्षिकः॥देवदत्तयज्ञदत्तविष्णुमित्राभोज्यंतामित्युक्तेप्रयोजकव्यापारस्यसमुदायविषय त्वेपिप्रयोज्यव्यापारन्नफलतृप्तेःप्रत्येकवृत्तित्वेनभाष्यकैयटाभ्यांप्रदर्शितत्वात्तस्मादुभेग्रहणंसाहायार्थमितिकैयटोक्त मपियुक्तमेवेत्याहुः॥ऐत्सन्नित्यादौजुसभावार्थंतूभेग्रहणंस्यादितिआक्षिप्येदंप्रयोजनंकार्यकालपक्षेआहोस्विद्यथोद्देशप क्षेवानाद्यइत्याह॥कार्यकालपक्षइति॥ननुउक्तसमाधानप्रयासोव्यर्थअंतरंगत्वादंतादेशेश्रीतस्यान्यादेशभावमादायातीत्य

त्रनभित्वं॥तथाचांतिभावेकृतेनज्रुसापत्तिरित्याशंक्याह॥अन्यथेति॥द्यादिशब्दानामेकापायेप्रवृत्त्यभावस्यानंगीकारे॥
एकादेशइति॥झशनकारयोरेकादेशेनांत्यइत्याह॥यथोद्देशेइति॥श्वावितिद्वित्वेइति॥अंतरंगत्वात्भ्याभ्यस्तयोरित्या
लोपंबाधित्वेतिशेषः॥भ्याभ्यस्तयोरातइति॥नचालोपेकर्तव्येशपःश्लोःस्यानिवद्भावःशंक्यः॥तस्यापरनिमित्तकत्वादभ्य
स्तग्रहणस्याचारितार्थ्याच्च॥आदंतस्ययड्लुक्यभिधानेदृढप्रमाणाभावात्॥इहज्ञानमात्रमिति॥नतुपश्यार्थैरित्यत्रे वा
चाक्षुषमित्यर्थः॥इदंचिंत्यमिति॥केचित्तुक्विन्प्रत्ययस्यकुरितिसूत्रेभाष्येप्रत्ययग्रहणंअतद्गुणसंविज्ञानबहुव्रीहिविज्ञा ना
र्थमृतेनसंप्रतिक्विनोऽभावेपिकुत्वं॥मानोस्रक्॥मानोअस्रद्रागित्युक्तं॥तदेतत्कुत्वस्यषत्वापवाद त्वाभावेनसंगक्ते॥
रज्जुसृड्भ्यामित्यादाविवकुत्वमपवादत्वाद्धात्वाषत्वापत्तेः॥नचोपपयट्काम्यतिरज्जुसृड्भ्यामितिभाष्यप्रयोगोकथं
संगछेतामितिवाच्यं॥क्विन्प्रत्ययोयस्मादितिबहुव्रीह्यवधित्वस्यसृजोनिरुप पदलक्षणस्ययजोअनुपसर्गोपलक्षणस्येवा
श्रयणेनादोषादित्याहुः॥षडग्राकाः प्राग्वदिति॥ईदृशेविषये॥जश्त्वापवादत्वंचर्त्वस्यनेतिनेत्यनेनसूचयति॥उदकस्यर्शइ
ति॥केचित्तूदकस्यडितिप्रत्युदाहरणमुचितं॥क्विन्प्रत्ययोयस्मादितिबहुव्रीह्यर्थावधित्वस्योदकाभिन्नोपपदलक्षणस्येवा

श्रयणेनकुत्वस्याप्रवृत्तेः॥ नचैवंत्यदादिषूपपदेषुदृशेःक्विनोविधानेनकेवलेदृगित्यादौकुत्वंनस्यादितिवाच्यं॥त्यदाद्युप
पदस्यदृशेःक्विन्प्रत्ययप्राग्वर्तित्वेनदृष्टत्वेनकेवलेतत्वस्यार्थात्सिद्धेः॥उदकस्यर्ष्टइतितुनयुक्तं॥वासरूपन्यायेनक
र्मण्यणःपक्षेदृष्टत्वादित्याहुः॥नित्यत्वादिति॥नचस्वरेप्रत्ययलक्षणाभावात्कथमेतदितिवाच्यं॥एकपदस्वरेलुमता
लुप्तेप्रत्ययलक्षणाभावेपितदन्यत्रतत्सत्वात्॥पूर्वत्रासिद्धेतन्निषेधादिति॥नचवेतस्वानित्यत्रपदेतद् त्यर्थेनस्थानिव
त्वनिषेधपरभाष्यप्रामाण्यात्पूर्वत्रासिद्धेनस्थानिवदित्यत्रपदचरमावयवातिरिक्तस्यपूर्वत्रासिद्धस्यग्रहणाद्वेतस्वानि
त्यत्रपूर्वत्रासिद्धेनस्थानिवदितिनिषेधोनप्रवर्त्ततइतिनपदांतसूत्रस्थस्वग्रंथविरोधइतिवाच्यं॥भसंज्ञाप्रयोजकप्रत्यय
परकस्वादिनिमित्तकपदत्ववच्चरमावयवातिरिक्तस्येत्यर्थेनादोषात्॥नानेनषत्वमिति॥सतित्वस्याधिकारत्वेउत्तरसूत्रै
कवाक्यतयादेशप्रत्ययोरेवानेनषत्वविधानान्नकश्चिद्दोषः॥प्रकृतसूत्रस्थमिति॥नुम्विसर्जनीयशर्व्यवायेनिंसेःप्र
तिषेधः॥निंस्से॥निंस्वेतिप्रकृतसूत्रस्थंभाष्यंप्रत्येकंव्यवधानेइत्यत्रमानं॥अवश्यंनुमोग्रहणंकर्त्तव्यंअनुस्वारविशेषणंनुम्
ग्रहणंनुमोयोनुस्वारस्तत्रयथास्यात्इहमाभूत्युंस्विति॥हयवरट्सूत्रस्थंभाष्यंतुनुम्स्थानिकेत्यर्थेमानमितिबोध्यं॥सपाद

सप्ताध्यायीस्थेकार्येइति॥अत्रसपादसप्ताध्यायीशब्देनषत्वशास्त्रात्पूर्वःसूत्रसमुदायोलक्ष्यते॥तेनसंयोगांतलोपसंग्रहः॥प्रति
पदविधित्वेनेति॥ननुनियमशास्त्रेणाविधिमुखेनप्रवृत्तेःस्वसिद्ध्यंतत्वेनवस्वेकाजाद्वसामितिटोपिप्रतिपदविधित्वमितिचे
न्न॥आर्धधातुकस्येतिसूत्रविहितेटोनुवादरूपत्वेनप्रतिपदविधित्वाभावइत्याशयात्।पूर्वोपस्थितिनिमित्तकमंतरंगमित्यत्र
निमित्तशब्देनसप्तम्यंतोपात्तस्येवग्रहणमितितदाशयः॥स्वरप्रवृत्तौदोषात्॥केचित्त्वेवंसतिविषयसप्तम्याश्रयणेनकिमर्थंस्या
दितिसमाससंज्ञापेक्षांतोदात्तात्प्रागेवभवतीतिभगवतोदाक्षीपुत्रस्याशयइत्याहुः॥नित्यत्वात्सत्वंबाधित्वेति॥इदंपूर्वान्वयि॥
टिलोपेकृतेदस्यं त्यत्त्वाभावात्सत्वाप्राप्तेःदस्यानिकसत्वस्यतुसाकच्केचारितार्थ्यं॥ननुम्चउश्चेतिइतरेतरद्वंद्वेद्विवचनापत्तिरि
त्याशंक्याह॥मुंइतिसमाहारद्वंद्वइति॥ ॥इतिहलंताःपुल्लिंगाः॥ ॥नह्योधः॥दत्वेविधातव्येधत्वविधानंतुनत्थमित्यत्र
झषस्तथोरितिधत्वार्थं॥मूलेदलोपषत्वेइतिपाठःसुगमः॥उदःस्थास्तंभोरितिनिर्देशेनोदित्यस्यदांतत्वात्॥इतिपक्षेइति॥प
रस्यादिरितिपक्षेतुनिषेधोनप्रापोति॥गतिकारकोपपदानामित्तिप्राक्सुबुत्पत्तेःसमासेउत्तरभागस्यपदत्वाभावादितिभावः॥
व्याख्यानादिति॥उपात्तस्यरूपस्यलौकिकेप्रयोगेऽनुपालंभाच्छास्त्रीयस्यसानुबंधकरूपस्याश्रयणं॥अस्तीहनिरनुबंधकरूप

स्यप्रातिपदिकस्यलौकिकेप्रयोगेउपलंभइतिप्रत्ययलक्षणंनैवप्राप्नोतीतिव्याख्यानपर्यंतानुधावनंव्यर्थमितिकेचित्॥दिशः
अतिसर्जनेक्किनितिपाठः॥क्किबितित्वपपाठः॥जस्त्वचर्त्वेइति॥इदमेतन्मतेसप्तमीबहुवचनविषयं॥ ॥इतिहलंताःस्त्रीलिं
गाः॥सोपपदादिचइति॥तथासतिगतिकारकोपपदानामितिसुबुत्पत्तेःप्राक्समासेउत्तरपदस्यपदत्वंषत्वेपिदुर्लभंस्यादि
तिभावः॥सात्पदाद्योरित्येवेति॥स्वरितोवानुदात्तेपदादावितितुपदादाव नुदात्तेएकादेशस्तस्यस्वरितविधिर्नतुपदादेःसा
क्षाद्विधिरितिसोपिपदादिविधिशब्देननगृह्यतेइतिभावः॥ननुसात्पदाद्योरित्येवेत्यसंगतं॥उत्तरपदादिःकर्णोवर्णलक्षणादि
त्यादिविध्यंतरस्यापिसद्भावादित्याशंक्याह॥उत्तरपदादिरिति॥अन्यथाकर्णोवर्णलक्षणादितिस्वरेनपदादिविधिःअकारस्या
नादित्वात्॥स्वरविधौव्यंजनमविद्यमानवन्नत्वादिव्यपदेश ·सूत्रंचासमासार्थंस्यात्॥कर्णशब्दादर्शआद्यचिकृतेतुमु क्लः
कर्णइत्यादुदात्तत्वंयशास्यादित्यतआह॥उत्तरपदादिति॥पूर्ववार्तिकमपीतिभाष्येउत्तरपदत्वेचापदादिविधौलुमतालुप्तेप्रत्यय
लक्षणंनभवतीतिवचनंपठित्वाततःस्वादिषुपूर्वपदंभवतिपूर्वपदंनभवतीत्याद्यनेकविधयोगविभागेनप्रत्याख्यायदधिसेचा
वित्यादौषत्वार्थंपदादिरितिपंचमीसमासाश्रयणेबहुसेचौबहुसेचइत्यादौदोषमुद्भाव्यतदुत्तरपदत्वेचपदादिविधौलुमतालु

प्रेप्रत्ययलक्षणंभवतीतिवक्ष्यामितन्नियमार्थंभविष्यतिपदादिविधावेवनपदांतविधावितिकथंबहुसेचौबहुच्यू र्वस्यपदादि
विधावेवनपदांतविधावित्युक्तं॥नञ्घटितैतद्वचनपाठेनेति॥अन्येतुप्रत्याख्यानप्रकारएवयुक्तः॥उत्तरपदत्वेचैपदादिवि
धौप्रत्यलक्षणप्रतिषेधः॥बहुच्पूर्वस्यचापदादिविधावितिवचनद्व्यापेक्षयाप्रत्याख्यानस्यलघुत्वात्॥तथाहिस्वादिषुपूर्वं
पदंभवतिततोऽसर्वनामस्थानेयञ्चि॥यजादौसर्वनामस्थानेपूर्वंतद्घटकंचपदंन॥ततोभं॥यजादावसर्वनामस्थानेपूर्वंत द्घ
टकंचभंभवतीत्यर्थइतिसर्वेष्टसिद्धिःस्पष्टा॥नचदधिसेचावित्यादौषत्वापतिः॥पदादादिरितिपंचमीसमासाश्रयणात्॥नच
बहुसेचावित्यत्रषत्वापत्तिः॥पद्यतेगम्यतेऽर्थोनेनेतिव्युत्त्यापदपदस्यार्थवत्परत्वात्॥पदंचप्रकृतिभिन्नमेवसातिग्रहणात्
तेनप्रतीषिषती त्यत्रनदोषःअर्थवदितितुषिशब्दमादायोत्तरस्यषत्ववारणाय॥एवंचसतिषष्ठीतत्पुरुषेपिनदोषः॥नचैवं
कुमारीष्वित्यत्रषत्वनिषेधापत्तिः॥सातिग्रहणेपदसंज्ञाशून्येप्रत्ययेपदादित्वप्रयुक्तप्रतिषेधाप्रवृत्तिज्ञापनात्॥प्रत्याख्या
नोत्तरंनञ्घटितैतद्वचनपाठस्त्वेकदेशिनः॥कथंतर्हिपदादादिःपदादिरितिभाष्यग्रंथोपितथैव॥किंचवचनारंभपक्षेकाश्य
पेनप्रोक्तमधीयतेकाश्यपिनइत्यादौनलोपापत्तिः॥कंठोब्राह्मणानीत्यनेनप्रोक्तप्रत्ययांतस्याध्येतृप्रत्ययंविनाऽप्रयुक्तत्वबो

धनेपि सुबुत्पत्तेःप्राक्तत्प्रवृत्तिबोधकत्वेमानाभावात्॥किंचजंब्वाःफलेजंबावित्यत्रेकोसवर्णइतिप्रकृतिभावापत्तिः॥नह्य
त्रफलप्रत्ययस्यसुबुत्पत्तेःपूर्वत्वंप्रत्याशापि॥किंचबहुचर्मिकेत्यत्र वच नारंभेनलोपानापत्तिः॥प्रत्ययलक्षणप्रतिषेधेन
पदत्वाभावात्॥कप्रत्यय निमित्तंपदत्वंतुसमुदायस्य॥ततश्चयत्प्रातिपदिकसंज्ञकंचर्मनितिनतत्पदं॥यच्चपदंबहुचर्मन्नि
तिनतत्प्रातिपदिकमितिनलोपोदुर्लभः॥अपिच वचनारंभेपूर्वेदंडिप्रियइत्याद्यर्थमध्यमत्वानाक्रांतेतिविशेषणेतिगौरवमि
तियत्किंचिदेतदित्याहुः॥अतएवेति॥एनदस्त्यदाद्यत्वादेवेत्यर्थः॥अनयोरपीति॥एनादेशस्यएनदश्चेत्यर्थः॥एनदमा
दायेत्याद्येकदेश्युक्तिरित्यंतोग्रंथोऽपवादत्वमजानतएकदेशिनोयद्येनदित्याद्युक्तिरितिपूर्वग्रंथेनपुनरुक्तोपितद्विवरण
परतयाकथंचिन्नेयः॥अन्येतुयद्येनत्क्रियतेएनोनवक्तव्यइत्यादिभाष्यस्वारस्येनद्वितीयाटौस्वेनइत्यत्रैवएनद्वक्तव्यइति
लभते॥नचयेननाप्राप्निन्यायेनैनदस्त्यदाद्यत्वापवादत्वेनतत्रकृतेत्यदाद्यत्वाप्राप्तेःयद्येनदित्याद्येकदेश्युक्तिरितिवा
च्यं॥नलुमतेतिनिषेधानित्यत्वेनकुंडमानयप्रक्षालयेनदित्यत्राप्येनदःप्रवृत्यातत्रचत्यदाद्यत्वाप्रवृत्यायेननाप्राप्निन्या
यप्रवृत्तेः॥सत्वस्यत्यदाद्य त्वादानपवादत्वस्यैवतत्रकौंडिन्यन्यायानित्यत्वेनैनदोपितदनपवादत्वस्योपपत्तेश्च॥यद्ये

वमेनश्रितकोनसित्यति॥एतच्छ्रितकइतिप्राप्नोतिइत्यग्रिमभाष्यंत्वेकदेश्युक्तिः॥उपसर्जनत्वेनैनदादेशस्यतत्राप्रवृ
त्तेः॥नलुमतेतिनिषेधाच्च॥नलुमतेत्यस्यानित्यत्वंतुधर्मिग्राहकमानेनैकपदाश्रितलुक्येव॥तथाचैतेनकृतमेतत्कृतमि
त्यादेनैनदादेशप्रवृत्तिरित्याहुः॥इत्यलमिति॥अन्येतुसावकाशः कः कोवकाशोनेत्यइत्यादिनलोपः प्रातिपदिकेतिसू
त्रस्थभाष्यप्रामाण्येननिपात्योनतत्रकौंडिन्यन्यायःस्कोःसंयोगाद्योरित्यादितुनिरवकाशत्वेनसंयोगांतलोपादि बाधकं
अतएवरथीतरसित्थिः॥अन्यथानलोपंबाधित्वानस्येत्वेतस्यासित्थत्वात्सवर्णदीर्घानापत्तिः॥अतएवधुक्सुवृडित्यादेभ
ष्भावत्वत्वादिषुकृतेषुजश्त्वादिसित्थिः॥ अन्य थाऽपवादत्वात्तेर्जश्त्वापवादत्वापत्तिः॥रहाभ्यामितिनिमित्तत्वेनकार्यि
त्वबाधस्तुहयवरडितिसूत्रस्थभाष्यबलादेव॥अस्तुवान्निपाद्यामितरविधिषुयथातथा॥नलोपविषयेतुईत्रथीनःरथी
तरः॥भूरिदाप्रस्तुदृभूरिदावतरइतिभाष्यप्रयोगबलेननोत्सर्गापवादभावः॥अतएवनलोपःप्रातिपदिकसूत्रेभाष्ये ऽप्यन
वकाशोरुर्नलोपंबाधिष्यतइत्युक्तंनत्वपवादोरुरित्याहुः॥इदमेवन्याय्यमिति॥अन्येतुक्विन्प्रत्ययस्यकुरितिसूत्रेइदंतर्हिप्र
योजनंयेभ्यः क्विन्विधीयतेतेषामन्यप्रत्ययांतानामपिकुत्वंयथास्यान्मानोअस्त्राक्मानोअद्रागितिभाष्यात्कुत्वस्यासित्थ

त्वात्षत्वेक्किन्प्रत्ययस्येतिकुत्वंभवत्येव॥षत्वस्यकुत्वापवादत्वंतुनन्निपाद्यांतत्रकौंडिन्यन्यायाप्रवृत्तेः॥पदांतेविशिष्यषत्व विधिकल्पकाभावाच्च॥विश्वसृडादौतुनकुत्वं॥ ॐ॥ ॐ॥ क्किन्प्रत्ययस्येत्यतद्गुणसंविज्ञानबहुव्रीहेर्विज्ञानेपिस्पृशोनुद केइतिसूत्रेऽनुदकग्रहणेनक्किन्प्रत्ययविधायकशास्त्रानुपात्तोपपदेक्किप्प्रत्ययांतेक्किन्प्रत्ययस्येत्यस्याप्रवृत्तेः॥अनु दकग्रहणंतूदकेउपपदेक्किपःप्रवृत्तयेतत्रापिकुत्वप्रवृत्तौतद्वैयर्थ्यस्पष्टमेव॥तेनोदकशब्देउपपदेउदकस्पृडित्येव॥असृक् शब्दस्त्वस्यतेरौणादिकेऋज्प्रत्ययेबोध्यइत्याहुः॥ननुगवाक्शब्दस्यरूपाणीतिमूलग्रंथोऽसंगतः॥क्कीबेचेागतिभेदतइ त्युत्तरग्रंथानुरोधे नपूजार्थस्याप्यनुकरणावश्यकत्वेनतत्रगवागितिरूपाभावादित्याशंक्याह॥शब्दपरत्वेनेति॥त थाचगवाच्शब्दस्यानुकरणंप्रकृतिवदनुकरणमितिनलोपइतिक्कीबेचेागतिभेदतइतिवाक्यशेषोनासंगतइतिभावः।सो र्लुकालुप्तत्वादिति॥सर्वनामस्थानत्वाभावाच्चेत्यपिबोध्यं॥स्वांपीत्येवेति।अतएवसुस्वांपितटानीतिप्रयोगःसंगच्छते॥इति हलंतानपुंसकलिंगाः॥ ॥स्वरादिनिपातमव्ययं॥सर्वेषामिति॥तत्तच्छक्तिप्रधानानांसर्वेषामित्यर्थः॥भाष्यप्रामाण्यादिति एवंहितत्रभाष्यं॥अथसायंचिरयोःकिंनिपात्यतेप्रत्ययसन्नियोगेनमांतत्वंनिपात्यते॥नैतदस्तिमकारांतःसायंशब्दइति।के

पटध्वानेनसायंशब्दप्रत्याख्यायते॥अव्ययादेव स्तु स्युलोः सित्थत्वात्चिरमित्यस्यतुमांतत्वंनिपात्यतइतिचिरमित्यव्यय
सत्वेतुसायंशब्द वच्चिरंशब्दस्यापिप्रत्याख्यानंभाष्यकृत्कैयटोवदेतामितिभावः ननुवत्यंतस्या व्ययसंज्ञायांयदुद्दूतो
नितइत्यादौविभक्तिश्रवणानापत्तिरित्याशंक्याह॥उपसर्गाच्छंदसीति॥भाष्यस्वरसोप्येवमेवेति॥एवंहितत्रभाष्यं॥अथवा
पुनःस्तुकृदंतमकारांतमितिकथंप्रतामोप्रतामइति॥आचार्यप्रवृत्तिर्ज्ञापयतिनप्रत्ययलक्षणेनसंज्ञाभवतीति॥यद्
यंप्रशाम्शब्देस्वरादिषुपठतीति॥यदिचस्वरादिषुप्रशाम्शब्दपाठस्तदाज्ञानतेजनइत्यस्माक्विपितत्राव्ययसंज्ञार्थंपा
ठस्यचारितार्थ्येनज्ञापकत्वासंगतिः॥तस्मात्क्विपोनभिधानकल्पनंतुक्लिष्टमितिभावः॥नञः स्वरादिष्विति॥निपातत्वा
देवसित्थेरितिभावः॥अव्ययेति॥इदंतत्पूरुषेतुल्यार्थेइतिसूत्रस्थंवचनं॥ ॐ॥ अव्ययग्रहणे एतेषांग्रहणमितितदर्थः॥
अकर्णिरिति॥आक्रोशेनञ्यनिरितिकृञोऽनिरितिभावः॥माङोपीति॥निपातत्वादेवसित्थेरितिभावः॥नन्वर्थतः सारूप्यग्र
हणेगेयेकेनविने तावामित्यत्राव्ययसंज्ञानस्यात्।वामित्यस्यकर्मत्वावोधकत्वादित्याशंक्याह।गेयेकेनेति॥विभक्त्यंतसमानार्थत्व
स्येवेति॥युष्मच्छब्दप्रकृतिकविभक्त्यंतसमानार्थत्वंयुवामितिप्रथमाद्विवचनमादायशब्दतः सारूप्यंवामितिद्वितीयाद्विव

चनांतत्वमादाय॥नन्वेवंसतियुगपदित्यादीनामपिएंककालेइतिविभक्त्यंतमादायार्थतःसारूप्यं॥युगंपततीत्यर्थकयुगप
च्छब्दमादायशब्दतःसारूप्यंतथाविभक्तिप्रतिरूपकत्वादेवयुगपदित्यादीनामव्ययत्वेसित्थेयुगपदित्यस्यपाठोव्यर्थइतिचे
न्न॥यच्छब्दप्रकृतिकविभक्त्यंतमादायार्थतःसारूप्यंतच्छब्दप्रकृतिकविभक्त्यंतमादायैवशब्दतःसारूप्यविवक्षितत्वेना
दोषात्॥नन्वेवंस्वरप्रतिरूपकत्वमपिशब्दतोऽर्थतश्चविवक्षणीयंस्यादित्याशंक्याह॥स्वरांशेतुनेति॥अन्येतुस्वराद्येकरू
प्यायशब्दतएवसारूप्यंनार्थतस्तेनतस्मादित्यर्थकतदित्यस्यप्रथमांतार्थकवामित्यस्यचाव्ययत्वसित्यिः॥अतएवधनवाचि
नोस्तिशब्दस्यविभक्तिप्रतिरूपकत्वेनाव्ययत्वसित्थिरितिमतुप्सूत्रेभाष्यकैयटोक्तंसंगच्छते॥विभक्त्यंतंचपदंद्व्याद्यटित
मेवेतिनयुगपदित्यादीनांपाठवैयर्थ्यमित्याहुः॥ लुप्तषष्ठीकमिति॥इदमयुक्तं॥प्रथमांतानामेवद्वंद्वविधानेनतच्चितोरितिद्वं
द्वेषष्ठ्यंतस्यप्रवेशानर्हत्वात्॥तत्तदर्थविभागइति॥प्रकृतिप्रत्ययविभागस्तदर्थविभागश्चेतिवाक्यस्थतच्छब्दयोःप्रकृतिप्रत्यय
परयोर्द्वंद्वइतिभावः॥शब्दरत्नेतुवीप्सायांकृतद्विर्वचनस्यतच्छस्यार्थशब्देनतत्पुरुषइत्युचितं॥चादिस्वरादिपठितानामिति॥
इदंविशेषणंव्यर्थं॥गोरित्यादावव्ययत्वापादकंङ्णअसिरितिनिष्पन्नेऽणइत्यादावव्ययत्वानापत्तिस्तुनास्माकंस्वरादिपाठ

सामर्थ्येनतत्सित्थेः॥विहितानांनियमपक्षइति॥इदमुपलक्षणं॥प्राप्यमाणानांनियमपक्षेपीत्यस्यार्थस्य॥अस्योपपत्तिरिति॥अं
सर्वविभक्तित्वस्योपपतिः॥अत्रपक्षेइत्यस्यजातस्यनिवृत्तिरित्यनेनान्वयः॥सर्वेष्वर्थेष्वित्यस्यसर्वविभक्त्युत्पत्तावित्यनेनान्व
यः॥सर्वेषुकर्मादिष्वर्थेषुद्वितीयाद्येकेकविभक्त्युत्पत्तौजातायामित्यर्थः॥कर्माद्यर्थेयोग्यात्प्रातिपदिकाच्चेत्कर्मणिविभक्ति
रितिप्रातिपदिकाच्चेत्कर्मणिविभक्तिस्तदाद्वितीयेवेत्येवसित्थोकर्माद्यर्थेत्यादिविशेषणंव्यर्थं॥तद्योग्यप्रातिपदिकात्प्रथ
मै वेतिइदंविशेषणंअव्ययेभ्योपिद्वितीयाद्यर्थं॥अर्थनियमइति॥यतएवकारस्तत्तोन्यत्रनियमइतिसित्थांतात्॥अत्रप
क्षइति॥अर्थनियमपक्षेइत्यर्थः॥प्रकृतार्थापेक्षप्रत्ययनियमपक्षमाह॥कर्माद्यर्थेति॥सामान्यापेक्षप्रत्ययनियमपक्षमाह॥
अर्थेति॥ननुसर्वेष्वेतेषुपक्षेषु अव्ययानांप्रातिपदिकार्थसूत्रेोदाहरणत्वमनुपपन्नं॥तथाचप्रातिपदिकार्थग्रहणंकिमर्थं
उच्चैर्नीचैरित्यत्रापियथास्याद्इतिप्रातिपदिकार्थसूत्रस्थंभाष्यंविरुध्यते॥प्रातिपदिकार्थसूत्रस्यपर्युदासन्यायेनकर्मादियो
ग्यप्रातिपदिकार्थएवप्रथमाबोधकत्वादितिचेत्प्रातिपदिकार्थसूत्रस्योक्तनिष्कृष्टार्थमनाश्रित्याव्ययानांतदुदाहरणत्वेनो
पन्यासइत्याशयात्॥वस्तुतस्तुप्रातिपदिकार्थसूत्रेकर्मादियोग्यप्रातिपदिकादित्यर्थेमानाभावादव्ययानांतदुदाहरणत्वमुपप

न्ने॥तत्रार्थनियमेकर्मादिरहितप्रातिपदिकार्थेप्रथमैवेतिनियमेनप्रथमैवाव्ययेभ्यः प्राप्नोतिनद्वितीयादिः॥अर्थनियमेसि
त्थमितिबहुष्वितिसूत्रस्थभाष्यस्यप्रथमायावचनत्रयंसित्थमित्येवार्थः॥प्रकृतार्थापेक्षप्रत्ययनियमेकर्माद्यर्थप्रतिपादन
योग्यप्रातिपदिकाच्चेद्वितीयातदाकर्मणिसत्येवनतुतदसत्वेइत्यादिरेवसूत्रार्थः॥तेनगांदोग्धीत्यादावपादानत्वादावपि
द्वितीयादिः॥बहुष्वितिसूत्रस्थस्यैकस्मिन्नेवैकवचनंनद्वयोर्नबहुष्वितिभाष्यस्यापिसंख्यावत्वयोग्येषुचेदेकवचनंतर्हिएक
त्वेसत्येवनतुतदसत्वइत्यर्थः॥नद्वयोर्नबहुष्वितितुफलितार्थकथनमितिदिक्॥नन्वेकवचनमितिसूत्रंव्यर्थं॥द्वित्वबहु
त्वयोर्द्विवचनबहुवचनोक्तावर्थादेकवचनस्यतद्विषयेप्रवृत्तिसिद्धेरित्यतआह॥द्वित्वबहुत्वयोरिति॥अप्राप्तप्रापणार्थ
मिति॥सामान्यापेक्षप्रत्ययनियमपक्षएवसिद्धांत्यभिप्रेतइतिभावः॥अन्येतुसामान्यापेक्षःप्रत्ययनियमः तत्रहुंफडादि
भ्योनिरर्थकेभ्योविभक्तेरप्राप्तेरेकवचनमित्यौत्सर्गिकमेकवचनं॥सार्थकाव्ययेभ्यस्तुप्रातिपदिकार्थइतिप्रथमैकवचनं
शेषामन्यमहःअत्युच्चैरित्यादिवृत्तिविषयेकर्मत्वान्वयात्द्वितीयैकवचनंतेनात्यादयःक्रांताद्यर्थेद्वितीययेतिसमासः॥एवंस्वः
शब्दात्द्वितीयापंचमीसप्तम्येकवचनानिस्वःपश्यस्वआगतःस्वःस्थितइत्यादिप्रयोगदर्शनात्॥एवमपदिशेत्याद्यव्ययीभावात्त

र्थकर्मत्वादिसत्वेनद्वितीयातृतीयासप्तम्येकवचनानीत्यादियथायथंबोध्यमित्याहुः॥नानेनसर्वैकवचनमिति॥किंतु
प्रथमाद्वितीयातृतीयेकवचनान्येवेत्यर्थः॥ज्ञापनाच्चेति॥इदमुपलक्षणमव्ययादाप्सुपइतिप्रत्याहारग्रहणाच्चेत्यपि
वोध्यं॥नन्वेकत्वेएकवचनस्याविधानेनघटइत्युक्तेरेकत्वनिश्चयोनस्यादित्याशंक्याह॥घटइत्युक्तइति॥ननुबहुष्वि
त्यादिसूत्रेष्वेकवचनमितियोगविभागमनाश्रित्योक्तनियमपक्षानाश्रित्याव्ययेभ्यःसर्वविभक्तीनांसर्वाणिवचनानी
त्युक्तंतत्कुतोनोक्तमित्यतआह॥बहुष्वित्यादिसूत्रेष्विति॥भाष्ये ननुविशिष्यासन्निधानात्तत्थितांतइतितद्दंतविधिः
कथमतआह॥बहुव्रीहिलभ्यंविशेष्यइत्याहेति ॥ इत्यभिप्रेत्याहेत्यर्थः॥संज्ञाकार्यस्येति॥लुकइत्यर्थः॥तत्वेनबहिरं
गत्वेन॥अव्ययीभावादाविति॥वस्तुतस्त्वव्ययीभावस्यशक्तिलिंगविशेषयोगेपिवचनाद्व्ययत्वं॥आधेयइत्यादेरन्व
र्थसंज्ञाबलेनाव्ययत्ववारणसंभवेपिसन्निपातपरिभाषाप्रयोजनकथनार्थं॥भाष्यकृतैतदुपेक्षितं॥उपादास्तेति॥समू
र्धन्यपाठः॥सन्निपातपरिभाषयाकृतिचेतिनिषेधस्यनिवृत्तिरित्याशयेनसगुणपाठः॥वस्तुतस्त्वत्वप्रवृत्तिपूर्वका
लिकमेत्वमात्वस्योपजीव्यंतच्चनकृतिचेतिनिषेधविनाश्यं॥यच्चनिषेधेनविनाश्यमित्योत्तरकालिकंनतदात्वस्यो

पजीव्यंतस्मादेच्विषयेत्वात्वविधानादकित्वसन्निपातनिमित्तमात्वंस्याध्वोरितिकित्वस्यानिमित्तंकिंत्वसन्नियुक्तंचेत्स्व
मितिकित्वाभावेनभवतीतिकेयटोक्तरीत्येवसन्निपातपरिभाषाविरोधउपपादनीयः॥तत्रचात्वोपजीव्य कित्वस्यसाक्षादेवकि
त्वेनविनाशः॥भावाभावयोर्विरोधादिति॥नैषाप्रतिबंदीयुक्ता॥तस्माद्व्याख्यानाद्ज्ञाप्यप्रामाण्याच्चसंनिपातविघा तकत्वंपरंप
रयाप्याश्रीयतइत्येवेत्युक्तं॥तादृशमहासंज्ञाकरणात्समुदायस्यनाव्ययत्व मित्येव वक्तुंयुक्तं॥तादृशार्थानामित्यारभ्यमा
नाभावेनेत्यंतोग्रंथःप्रकृतानुपयुक्तः॥ नह्यत्रांतर्गणकार्यंकिंचित्त्राप्नोतियेनोपयुज्येत ॥साहचर्येणेत्युत्तरमर्थस्येतिशेषः॥प्र
सित्यश्वासावंतरंगश्वासोपदांतरानपेक्षश्वासावनुपसर्जनीभूतश्चेतिविग्रहः॥अत्रप्रसित्यांतरंगपदांतरानपेक्षेतिविशेषणं
व्यर्थं॥अनुपसर्जनीभूतस्यलिंगाद्यनन्वयिनइत्येतावतापूर्त्तेः॥अतश्चेति॥अत्युच्चैसावित्यत्रावयवस्याप्यव्ययसंज्ञाभावादे
वेत्यर्थः॥व्यर्थएवेति॥अव्ययसंज्ञायांकार्यकालपक्षाश्रयणात्॥अत्युच्चकैरित्यादावकजर्थप्रवृत्ताव्ययसंज्ञामादायनलुक्॥उ
च्चैराविति॥उच्चैःशब्दात्परोद्विवचनांतोऽशब्दोबोध्यः॥तस्यचपरादिवत्वेनविभक्तित्वाद्विहितविशेषणाभावेलुगापत्तिरित्या
शंकावारणायेदं॥उच्चैराभ्यामिति॥विहितविशेषणाभावेत्रटापोलुगाप्रत्तिरितिभावः॥णिश्रिद्रुस्रुभ्यःकर्तरिचङिति॥यन्व्येतिद

व्ययमितिवाक्यशेषंव्याचष्टे॥तदिति॥तदितिपदंतस्मादित्यर्थकमित्यभिप्रेत्यव्याचष्टे॥अभावादिसादृश्यादेवेति॥यद्वेतीति
व्याचष्टे॥यद्विविधंरूपमिति॥नेतीतिव्याचष्टे॥नप्राप्नोतीति॥ ॥इत्यव्ययानिसमाप्तानि॥ ॥इतिसुब्विभक्तिकार्याणि
॥श्रीः॥स्त्रियां॥सत्वादीनांगुणानामि॥ननुब्रह्मशब्दस्यनपुंसकत्वमात्मशब्दस्यपुंस्त्वंचितिशब्दस्यस्त्रीत्वंकथं॥सत्वादी
नांगुणानांतत्राभावादितिचेन्न॥परास्यशक्तिर्विविधैव॥आत्मनिचैवंविचित्राश्चहीतिश्रुतिसूत्राभ्यामात्मनिपुंशक्त्यादिस
त्वेनसर्वलिंगोपपत्तेःसतामपिसर्वलिंगानांतत्तच्छब्दप्रतिपाद्यत्वावच्छेदेनैवाभिव्यक्तिरितिनातिप्रसंगः॥शशविषाणादौत्व
सदेवलिंगंविषाणत्वादिवदवभासते॥यद्वाऽन्यथाख्यातिस्वीकारादन्यत्रसच्छशीयत्वंसतिविषाणेऽवभासतेइतिलिंगव्यव
स्थासिद्धिः॥केचित्तुशशविषाणादावंतःपदार्थसद्भावात्तद्वारकोलिंगयोगइत्याहुः॥अजशब्दस्यस्त्रियामजाशब्दस्यपुंसिकदा
प्यप्रयोगाच्छास्त्रीयमेवटाबाद्यभिधेयमितिवक्तुमशक्यमित्यभिप्रेत्याह॥तत्रेति॥तत्संभवेत्विति॥अन्येतुलौकिकलिंगस्य
प्रतिपाद्यत्वसंभवेतदेवनोभयंगौरवादित्याहुः॥उपचयाऽपचययोःसतोरितिशेषः।तन्मात्रविवक्षायामिति॥विवक्षाचलोक
व्यवहारानुवादिनीग्राह्यानतुप्रायोक्ती॥तदुक्तंहरिणा॥सन्निधानेनिमित्तानांकिंचिदेवप्रवर्त्तकं॥यथातक्षादिशब्दानांलिंगे

षुनियमस्तथा॥भावतत्वविदःशिष्टाःशब्दार्थेषुव्यवस्थिताइति॥लिंगंचार्थगतमेवनशब्दगतमितिप्रकृतसूत्रस्यभाष्यात्स्व
मोर्नपुंसकादितिसूत्रस्यभाष्याच्चस्पष्टमेवगम्यते॥स्त्रीपुन्नपुंसकादिशब्दानांप्रवृत्तिनिमित्तमेवलिंगंननतोऽन्यत्॥तद्द
पिप्रायेणशास्त्रीयमेवसतिसंभवेलौकिकमपि॥तद्वाच्यार्थगतमिति॥इदंविशेषणंव्यर्थं॥व्यावर्त्याभावात्॥एवंव्याख्या
नेइति॥षष्ठ्यंतत्वमाश्रित्याजादीनांवाच्यंयत्स्त्रीत्वमितिव्याख्यानेइत्यर्थः॥अतएव॥स्त्रीत्वस्यद्योत्यत्वादेव॥॰ समुच्च
यस्य॥द्योतकसमुच्चयस्य॥वाचकसमुच्चयस्तप्रायेणनदृश्यतइतिभावः॥अजादि रूपमेवेति॥नन्वेवंचटकिकाजिकेत्या
दौजातिलक्षणोङीषुदुर्वारः॥अज्ञातार्थयोगेपि जातिलक्षणानपायात्। कांतस्यानजादित्वेनटापोऽप्रवृत्तेरितिचेन्न॥अज्ञात
त्वाद्यधिकप्रवृत्तिनिमित्तत्वेजातिमात्रप्रवृत्तिनिमित्तकत्वाभावान्ङीषोऽप्रवृत्तेरितिदिक्॥तदंतस्यापीति॥तदंतस्ये
वेत्युचितं॥व्याख्यानादेवेति॥अनुपसर्जनाधिकारमूलात्॥सामर्थ्येनेति॥अजाद्यतइत्यस्यषष्ठ्यंतत्वाश्रयणसामर्थ्येनेत्य
र्थः॥जातिश्चेद्वाच्येतिभाष्यकैयटयोस्तुजातिरित्यस्यनशूद्रेत्यंशेसंबंधः किंतुअमहत्पूर्वेत्यंशेशूद्रस्यस्त्रीशूद्रीत्यत्रगौण
मुख्यन्यायेनटाप्नेत्युक्तं॥प्रातिपदिकार्थेपिस्त्रीप्रत्ययेगौणमुख्यन्यायःप्रवर्ततइतितद्भावः॥एवंत्वजस्यस्त्रीअजीत्येव

गौणमुख्यन्यायेनटापोऽप्रवृत्तेः॥ यद्वामुख्यार्थकेष्वजादिषुजातिलक्षणङीषंबाधित्वाचारितार्थस्यटापःपुंयोगेपरत्वान्ङी
षाबाधः॥ अयजेइंद्र मित्यादौसर्वर्णदीर्घस्यगुणेनेव॥ जातिवाचकत्वाभावादिति॥ प्राधान्येनजातिविशिष्टवाचक
त्वादित्यर्थः॥ नचात्रगौणत्वमितिननुशूद्रस्यस्त्रीशूद्रेवतथाचकथंशूद्रशब्दस्तत्रगौणः नचशूद्रशब्दः शू
द्रसंबंधित्वेनस्त्रीबोधकइतितत्रगौणः॥ शक्यतावच्छेदकारोपएवगौणीवृत्तिरितिनव्यसित्यंतात्॥ अतएवाग्नायीदेव
ताऽस्याग्नेयइत्यत्रभस्याढइतिपुंवद्भावः॥ अन्यथातुल्येप्रवृत्तिनिमित्तेभाषितपुंस्कत्वाभावात्सदुर्लभइतिचेन्न॥ अशूद्रा
यदाशूद्रस्यस्त्रीविवक्षितातदागौणत्वमित्याशयात्॥ जातिमात्रविवक्षयेति॥ कैयटेत्वसतिजातिग्रहणेऽमहत्पूर्वैतिप्रति
षेधसामर्थ्यादंतरंगोपिटापूबाध्येतेत्युक्तं॥ नचाभीर्यीप्रतिषेधचारितार्थ्यं तत्रापिसमासस्वीकारेणसुबुत्पत्तेःपूर्वंटापोदुर्वा
रत्वात्॥ ननुमहाशूद्रशब्दस्यमहत्वविशिष्टशूद्रत्वप्रवृत्तिनिमित्तकत्वेनजातिमात्रप्र वृत्तिनिमित्तकत्वाभावेनकथं
ङीषित्यतआह॥ प्रधानेतीति॥ उग्रायामिति॥ उग्र्यामित्युचितं॥ अजादित्वंवाकल्प्यं॥ क्वचिदुग्रकन्यायामितिपाठः॥ अनु
लोमसंकराणामिति॥ उत्तमवर्णाधमवर्णायामुत्पन्नानामित्यर्थः॥ मातृजातिवृत्तित्वादिति॥ मातृजातिमत्वेनस्मृति

बोधकत्वादित्यर्थः।अतएवमहाशूद्रीत्यत्रशूद्रशब्दस्याऽर्थवत्वादेव॥ब्राह्मणादीनांक्षत्रियादिभिः क्रमेणान्वयः॥अत्रक्षत्रियाद्याअनूढाएवग्राह्याः॥ननुब्राह्मणादुग्रायामुत्पन्नस्यशंखस्मृतिबलेनशूद्रत्वावगमात्तत्रतांजातिमारोप्येतिपूर्वग्रंथासंगतिः॥अतएवश्रीमत्कृष्णद्वैपायनादिभिः क्षत्रियासूत्पादितानांपांडवादीनांक्षत्रियत्वमितिचेन्न॥औशनसस्मृतावनुलोमसंकराणांकेषांचिज्जात्यंतरकथनेनत्पदादी नीतिसूत्रेभाष्येआभीरत्वस्यशूद्रत्वव्याप्यत्वाभावोक्त्याचतत्रसंपूर्णशूद्रत्वानंगीकारात्॥अतएवतत्रमहाशूद्रशब्दस्यप्रयोगोनकेवलशूद्रशब्दस्या शूद्रादुत्तमत्वात्तस्य॥शूद्रधर्माश्चसर्वेनतत्रप्रवर्त्तंते॥शंखस्मृत्याशूद्रत्वारोपाच्चकेचिच्छूद्रधर्मास्तत्रप्रवर्त्तंते॥अयमारोपोनगौणमुख्यन्यायप्रवर्त्तकः शास्त्रबोधितत्वात्कतिपयधर्मप्रापकत्वाच्च॥इमंकुसृष्टिमनाश्रित्यतुकेयटेनोक्तं॥अमहत्पूर्वेतिनिषेधोनवक्तव्यः॥नहिमहाशूद्रीत्यत्रशूद्रार्थगतंस्त्रीत्वमितिटापःप्रसंगाभावइति॥एतेनपुंयोगेटाप्वारणायजातिश्चेद्याच्येत्यस्यमुख्यजातिमतीचेद्याच्येत्यर्थस्यावश्यकतयाऽभीर्यांशूद्रत्वारोपेणटापोऽप्रवृत्तेरमहत्पूर्वेतिनिषेधोव्यर्थइत्यपास्तं॥अस्यारोपस्यशास्त्रबोधितत्वेनतत्धर्मप्रापकत्वेनचमुख्यसमशीलत्वात्॥ननुमहाशूद्रीत्यत्रयोगार्थस्यापिसत्वेनजातिमात्रप्रवृत्तिनिमित्तकत्वाभा

वेनङीष्नस्यादितिचेन्न॥अवयवार्थस्यसंभवमात्रेणाश्रयणेपिरूढ्यर्थप्रवृत्तिनिमित्तस्यव्यभिचारवारणायानाश्रयणे
नजातिमात्रेतिमात्रपदेनतादृशस्यैवव्यावर्त्यत्वेनादोषात्॥अतएवयोगेनमन्वपत्यबोधकत्वेपिअगोत्रप्रत्ययांतमनु
षीत्यत्रजातिलक्षणङीष्सिद्धिः॥केचिदिति॥ढ्रागीतिभूयःप्रयोगदर्शनमत्रारूचिः॥इत्युक्तेरिति॥वस्तुतस्तूगिद्ग्रणे
ग्रहणवर्ज्यमितिव्यर्थं॥उगितश्चेत्यत्रवनोरचेत्यादाविवामहत्पूर्वग्रहणेनस्त्रियामित्यधिकारेतदंतविधिज्ञापनेनादो
षात्॥उगित्वाऽत्वयोःप्रातिपदिकाप्रातिपदिकसाधारण्येनोक्तनिषेधस्योगितश्चातइत्यनयोरप्रवृत्तेश्च॥स्पष्टंचेद्
मुगितश्चेतिसूत्रेभाष्ये॥अतएवेति॥टापोऽनपवादत्वेनऋचिङीपःप्रवृत्तेरेवेत्यर्थः॥एतत्प्रत्याख्यातमिति॥प्रत्याख्या
नमित्युचितःपाठः॥एतस्यसंगच्छतइत्यनेनान्वयः॥सूत्रीत्येष्टस्येति॥इदंचिंत्यं॥ङीवंतप्रयोगस्यसूत्रीत्येष्टत्वेमा
नाभावादितितर्कचंद्रिकाकारः॥केचित्तुपंचेत्यादौटापूङीपोरुभयोर्निषेधायनषडितिसूत्रेङीपोनुवृत्तेरावश्यकतया
मंडूकप्लुतौमानाभावेनटाङ्ङीत्यनेनङीपोविधानंसूत्रकृत्संमतमित्याहुः॥असंभवेनेति॥अमहत्पूर्वग्रहणाच्च॥कार्य
कालपक्षइति॥यथोद्देशपक्षेतुनांतत्वसमानाधिकरणषट्त्वस्यानलंधर्मत्वेनस्थानिवत्त्वेनापिसौलभ्यमितिभावः॥

तदंतेपी ति॥अमहत्पूर्वग्रहणेनस्त्रियामित्यधिकारस्यविधिनिषेधसाधारण्येनतदंतविधिज्ञापनादितिभावः॥स्त्रियांयत्प्राप्नोतीति॥नन्वेवंसतिप्रियपंचेत्यादौडाबुभाभ्यामित्यपिनस्यादितिचेदिष्टापत्तेः॥केचित्तुटाप्ङीपोरुभयोरनुवृत्यातयोर्निषेधेपिडाप्निषेधेमानाभावः।ङीबंशेबाध्यसामान्यचिंतयाऽनउपधेतिङीबपिनेत्याहुः॥आश्रयणबलादिति॥बाध्यसामान्यचिंताश्रयणस्यानउपधेतिङीबभावस्यफलत्वेनानुपदमेवकीर्तनाच्चिंत्यमेतत्॥बहुयज्वभ्यामिति॥इदमपिचिंत्यं॥अन्नंतत्वाभावेनानोबहुव्रीहेरित्यस्याप्राप्तेः॥यद्याचान्नंतत्वाभावस्तथोपपादितंष्वयुवेतिसूत्रेशेखरे स्त्रियांयत्प्राप्नोतितन्नेत्यर्थाश्रयणबलाद्भूतपूर्वगतिरित्याशयोवाकल्प्यः॥वस्तुतस्त्वन्नंतत्वमपिस्यानिवद्भावेनानेतुंशक्यं॥ष्वयुवेतिसूत्रस्थःशेखरस्तुचिंत्यएव॥ननुष्वयुवेतिसूत्रस्थंभाष्यं कथंसंगच्छतामितिचेन्न॥अनोऽवयवस्याकारस्येवाल्लोपोनइतिलोपविधानादंत्यस्यष्वयुवेतिसूत्रस्थशेखरीत्याऽनेतुमशक्यत्वात्॥एतेनधीवरीत्यादावल्लोपापादनमपास्तम्॥अनउपधालोपिनः॥गृह्यमाणस्यचान्नंतस्येति॥धीवन्नित्यादेरित्यर्थः॥ध्वनितंचेदमिति॥अनुपसर्जनादित्येतन्नसंबध्यतइत्येतदित्यर्थः॥इत्यनंतरमिति॥अनुपसर्जनाधिकारात्प्रागवर्तिनिअनोबहुव्रीहेरितिसूत्रेउपधालोपिनोवेतिन्यासकरणेनतत्रानुपसर्जनाधिकारासंबं

धोध्वनितद्इतिभावः॥अन्यतरस्यांग्रहणंत्विति॥उपधालोपिनोवेतिवाग्रहणंत्वित्यर्थः॥अन्यथेति॥सुपर्वेत्यादौडाप्प्रतिषेधयोः
सावकाशत्वाप्रतिसंधानेइत्यर्थः॥अन्येतुगृह्यमाणस्यानंतबहुव्रीहेर्बहुधीवेत्यादेरनुपसर्जनस्यसंभवेनबहुदामानिपुराण्य
तिक्रांतानगर्यतिबहुदामे त्यादावनंतबहुव्रीहेरुपसर्जनस्यचसत्वेनानुपसर्जनादित्यनउपधेतिसूत्रेसंबध्यतएव॥अनोबहु
व्रीहिप्रतिषेधेउप धालोपिनोवेतिवक्तव्यमितिवनोरचेतिसूत्रस्थंभाष्यंतुडाबुभाभ्यामनुपसर्जनादित्युत्तरंतदुक्तव्यमित्येवंपर
मित्याहुःअनेनेति॥वर्णात्कारइतिविहितकारप्रत्ययांतनिर्देशेनेत्यर्थः॥नप्राप्नोतीति॥सामर्थ्यान्निर्दिष्टपरिभाषाबाधेतुरथक
त्यादावतिप्रसंगइतिभावः॥उच्चारणार्थतये ति॥धकित्हिरूगि त्याद्यनुरोधेनेत्यर्थःप्रत्ययस्यत्वांशेति॥निर्मुक्तानुबंधस्यव्र
त्ययसंज्ञाप्रवृत्त्याकचिकेइतिसमुदायस्यप्रत्ययस्यत्वाभावादितिभावः॥केवलेति॥नचकांतात्प्रत्ययादित्यर्थवारणायस्य
ग्रहणमितिवाच्यं॥क्षिपकादीनांचेतिनिषेधेनककारस्यप्रत्ययविशेषणत्वज्ञापनेनादोषात्॥अणीति॥टिड्ढेतिङीप्तुन॥के
बलमामकेतिनियमात्॥वार्तिकमतेपीति॥भाष्यकारमतेतुप्रत्ययलक्षणसूत्रस्यनियमार्थत्वेननलुमतेत्यनेनस्थानिवत्वस्य
निषेधेप्रत्ययलक्षणमप्यर्थान्निषिद्धं॥प्रत्ययलक्षणसूत्रस्यस्थानिवत्वानुवादकत्वात्॥कन्यकेत्युत्तरंध्रुवकेत्यपपाठः॥ग

णेपठितत्वात्॥निर्दिष्टपरिभाषाप्रवृत्तेरिति॥उत्तरंशविकलतस्मादितिपरिभाषाप्रवृत्तेरित्यर्थः॥अनज्पूर्वाणामपीतिस्पष्टार्थमि
ति॥सूत्रेऽपिशब्देनज्पूर्वकभिन्नार्थकः सोपिस्पष्टार्थइत्यर्थः॥अकचिवापुनर्विशिष्टात्सुपीति॥ननुनञर्थान्वितैतदर्थेऽस्ता
ताद्यर्थविवक्षायांसमुदायात्सुबुत्तरमेवाकज्युक्तइतिचेत्सत्यं॥पाठक्रमवैपरीत्येनयोजनेनादोषात्॥एवमत्यंतस्वार्थिक
कांतेपीति॥एतेनहंसंतनोःसन्निहितंज्वरंतंमुनेर्मनोवृत्तिरिवस्विकायामितिप्रयोगोव्याख्यातः॥अकचिस्याडापत्तेः॥स्वस्यानि
ष्क्रांतेतिस्वस्मान्निक्रान्तेतिविग्रहेतुनेत्वविकल्पः॥ज्ञास्वेतिनिर्देशेनस्त्रीत्वबोधकस्वशब्दएवेत्वप्रवृत्तेरितिभावः॥अनुपस
र्जनात्॥अनविधानमेवेति॥ननुटिढ्ढाणञित्यादावतइत्यधिकारेणांतात्किंपितुकोलोपस्यवाप्रसंगेनङीपोप्रसंगादनभिधानं
निर्मूलंव्यर्थंचेतिचेन्न॥दीर्घादप्यूङोविधानेनानभिधानस्यतदभिप्रायकत्वोपपत्तेः॥अत्रोपसर्जनत्वंनशास्त्रीयंकिंतुलोकिकं
पूर्वसूत्रेऽप्रधानस्योपसर्जनसंज्ञाक्रियतेयावद्भूयात्प्रधानादुत्पत्तव्यमप्रधानान्नेतितावदित्यनुपसर्जनादितिप्रकृतसूत्र
स्थभाष्यात्॥ननुपंचगवधनइत्यत्र॥द्विगोरितिटिढ्ढेतिवाङीप्स्यात्॥वक्ष्यमाणदिशाटित्वस्याप्रवृत्तित्वेनप्रत्ययग्रहणप
रिभाषायाअप्रवृत्तावपिअवयवेटित्वस्याचारितार्थ्येनसमुदायोपकारकत्वावश्यंभावात्॥स्पष्टचेयंरीतिरनुपसर्जना

दित्यत्रकैयटेइत्यतआह॥पंचेति॥आपिशलिनेति॥इञश्चेत्यण्ततोध्येत्र्यंतदधीतइत्यण्॥तस्यप्रोक्ताल्लुगितिलुक्॥अध्ये
त्रण्तुलुप्तइति॥अतस्तन्निमित्तकोनङिबितिवाक्यशेषः॥ननुतस्यलुप्तत्वेप्रत्ययलक्षणेनतमाश्रित्यङीप्दुर्वारइत्याशं
क्याह॥अण्योऽकारइति॥तदण्निमित्तकस्येति॥प्रोक्ताण्निमित्तकस्येत्यर्थः॥तदणः॥प्रोक्ताणः॥एतत्स्त्रीत्वे॥अध्ये
तृस्त्रीत्वे॥अतएवेति॥वर्णाश्रयेप्रत्ययलक्षणाभावादेवेत्यर्थः॥नङिबिति॥अध्येत्रणमाश्रित्येतिशेषः॥तदंतविधिंविनेति॥
ननुग्रहणवतेतिनिषेधः॥स्वरूपेणोच्चारितेप्रातिपदिकएवनान्यत्रटितस्त्वतथात्वादुक्तनिषेधाप्रवृत्तेतोतदंतविधिःसुलभएवे
तिचेन्न॥ग्रहणमुपादानमात्रंनतुस्वरूपेणेत्युगितश्चेतिसूत्रेकैयटेनोक्तेः॥अतएवऋष्यंधकवृष्णिकुरुभ्यश्चवृत्थाच्छ
इत्यादौनतदंतविधिः॥सदुर्लभइति॥अर्णंतस्यगृह्यमाणत्वंतूक्तदिशाबोध्यं॥अनन्वयापत्तेरिति॥ननुएरपत्यंस्त्रीईइत्य
त्राण्रूपंप्रातिपदिकंसंभवत्येवेतिचेत्सत्यं॥द्वयसजाद्यंशेतन्मात्रस्यप्रातिपदिकत्वासंभवेनतदंतविधौतत्साहचर्येणतदं
शेपिसइत्याशयात्॥निष्कृष्यैकार्थीभावइति॥ययोर्वृत्तिस्तन्मात्रवृत्त्येकार्थीभावइत्यर्थः॥अप्रातिपदिकत्वाच्चेति॥नन्वेवं
कदाचित्ततोपिढकीतिपूर्वग्रंथासंगतिरितिचेन्न॥कर्मण्यणित्यस्यटिड्ढाणञित्यत्रोपस्थितिसामर्थ्येनाप्रातिपदिकत्वेपित

तोङीबितिपूर्वग्रंथाशयात्॥तदंतविधौतुसंप्रतिकुंभकारेतिसमुदायंप्रातिपदिकमादायतदुपस्थितिचारितार्थ्येसामर्थ्य
विरहः॥कर्मण्यणित्येवसित्थेपीलिकामीतिणविधानेनाप्रातिपदिकत्वेपिङीपःप्रवृत्तिरित्याशयः॥उद्योतेविस्तरइ
ति॥अन्येतुअतिभवतीअतिधीवरीप्रियपंचेत्यादावुगितश्चवनोरचनषडित्यादिविधिप्रतिषेधप्रवृत्तयेऽमहत्पूर्वग्रहणेन
स्त्रियामित्यधिकारेतदंतविधेर्ज्ञापितत्वान्नतदर्थमनुपसर्जनाधिकारः॥किंचानुपसर्जनाधिकारेणतदंतविधिज्ञापनात्प्राग
प्पणंतात्प्रातिपदिकादित्यर्थस्त्वयांगीकृतस्तथाचापिशलाब्राह्मणीत्यत्रप्रोक्ताणमादायङीवारणायानुपसर्जनाधिकारआवश्य
कइतिनतस्यतदंतविधिज्ञापकता॥अतिमहतीत्याद्यर्थेस्त्रियामित्यस्यप्रकृतिविशेषणनिर्णयेनप्रोक्ताणःस्त्रियामवृत्तावपितदं
तस्यस्त्रियांवृत्तेः॥ननुस्त्रियामित्यस्यप्रकृतिविशेषणत्वमप्यनुपसर्जनाधिकारज्ञाप्यमेवेतिचेन्न॥तदंतविधिज्ञापकत्वमि
कृतोप्येतज्ज्ञापनंविनावैयर्थ्यानुत्थारेणा वश्यकत्वात्स्त्रियामित्यस्यप्रकृतिविशेषणत्वेज्ञापितेउक्तस्थलेङीप्वारणाय
चारितार्थ्येनतदंतविधिज्ञापकत्वासंभवः॥अनुपसर्जनाधिकारस्थेषुतदंतविधेरुपयोगाभावश्चाननुत्वत्प्रयोजनंकुंभकारेय
इत्यस्यपाक्षिकस्यवारणमितिचेन्न॥अनुपसर्जनेस्त्रीप्रत्ययइत्यनेनतदादिविधिप्रतिषेधेनतत्रापिपाक्षिकानिष्टप्रसंगस्यदुर्वी

त्।अर्थवत्सूत्रोक्तार्थवत्त्वाभावेनेतिदूषणंतवापिसमं।कर्मण्यणित्यस्यात्रोपस्थितेोमानाभावः।तदादिनियमाभावेनाधिकस्यकार्यबो
धतेनन्यूनस्येत्यपिनिर्मूलं किंचशीलिकामीतिज्ञापकाश्रयणेनकथंचिदुक्तप्रतिबंदीवारणसंभवेपिकाष्ठश्रिताया अपत्यंकाष्ठ
श्रेतेयङ्इति प्रयोगवारणायनिष्कृष्येकार्थाभावएवप्रायेणवृत्तिनिमित्तं। भाष्यादिप्रामाण्यात्तुक्वचित्तद्भावेपितस्थितादृिः॥किं
चस्त्रीभ्योदगित्यत्रस्त्रीवाचकानांग्रहणमितित्वदुक्तदिशासर्वमिदंगजस्नानसमं॥तस्मादापिशलेत्यादौङीपूवारण मेवानुसर्ज
नाधिकारप्रयोजनं।तदुक्तमत्रसूत्रेभाष्येआपिशलमधीतेआपिशलाब्राह्मणीत्यत्रङीप्मभूदित्ययमधिकारइति।इदंतर्हिप्रयोज
नंप्रधानेनतदंतविधिर्यथास्यात्कुंभकारीअत्रहिप्रत्ययग्रहणेइतिपरिभाषयाऽवयवादुत्पत्तिः प्राप्नोतीत्येतत्सूत्रस्थंभाष्यम
नुपसर्जनादित्येषयोगः प्रत्याख्यायतइतिसर्वादिसूत्रस्थंभाष्यंचैकदेशयुक्तिरुक्तबाधकबलादितिसुधियोविभावयंत्वि
त्याहुः॥प्रयोजनाभावादित्यादिनेति॥ननुभविषीष्टेत्यत्रभाष्यमतेगुणापत्तिरितिचेदत्रकेचित्॥भूसुवोरितिसूत्रेतिङः सार्व
धात्वितिविशेषणादार्धधातुकेलिडि गुणनिषेधोनेत्याहुः॥अन्येतुगाङेङिति त्वेननडि दादेशानांङित्वमितिज्ञाप्यतेतेनभविषीष्टेत्य
त्रनदोषः॥उक्तज्ञापकेनेवाचिनवमित्यादिसित्यौपिच्चङिन्नेतितुभवंतीत्यादौशपः सार्वधातुकमितिप्राप्तङित्वनिषेधार्थ

मित्याहुस्तन्न ॥गाङोडि·त्वस्यगाङ्·कुटेतिसूत्रेविशेषणार्थत्वात्॥तत्फलमिणोगादेशेकर्मणिलुङि·अगासातांग्रामोदेवदत्तेनेत्यत्राङि·त्वान्नेत्वं॥नल्पपीतिधर्मिग्राहकमानाल्लादेशभिन्नमेवानुबंधकार्यस्थानिवद्भावेन॥तेनभविषीष्टवस्यमाणेत्यादौनदोषइत्यन्ये॥ननुनिरनुबंधकपरिभाषयाढग्रहणेढकोग्रहणंनस्यादित्याशंक्याह॥निरनुबंधकस्येति॥शिलायाढञ्छंदसीत्यादेः॥स्पष्टंचेदंभाष्येइति॥निरनुबंधकस्येत्याद्युक्तमित्यर्थः॥ननुनस्वरेविशेषःङीपोष्युदात्तनिवृत्तिस्वरेणोदात्तत्वादित्याशंक्याह॥एतोहीति॥उपरंजकतयेति॥इष्टनिइत्संज्ञावारणायात्राप्यादिरित्यावश्यकमित्यन्ये॥द्वेवर्षेभूतेति॥तेनेतिशेषः॥अपरिमाणेत्यत्रपरिच्छेदकमात्रस्याग्रहणेनपारिभाषिकपरिमाणस्येवग्रहणेनचेतितस्यार्थः॥वर्षशब्दःसंवत्सरवाच्यंतोनपुंसकःसस्माद्भोवर्षाल्लुक्चचित्तवतिनित्य मितिविहितस्यलुक्॥ननुविस्तशब्दस्येयत्ताविशिष्टसुवर्णपरत्वात्तस्यचविकृत्यसंभवात्पच तीत्यनुपपन्नमित्याशंक्याह॥पचेरितिा॥अत्रोन्मानत्वादिति॥नन्वार्हादगोपुच्छेतिसूत्रेपरिमाणशब्देनपारिभाषिकपरिमाणग्रहणेपिउन्मानस्यापिग्रहणमितिस्वेनवक्ष्यमाणत्वादसंगतमेतदितिचेन्न॥नव्यविवरणेआर्हादितिसूत्रेपरिमाणशब्देनोन्मानस्यनग्र हणमितिपक्षांतरस्याप्युक्तत्वेनतद्रीत्यैतद्ग्रंथसत्वात्॥पुरुषस्येति॥पंचा

रत्निःपुरुषइतिवचनादितिभावः॥उन्मानत्वादिति॥उन्मानशब्देनतुलायामारोप्ययन्मीयतेतदूर्ध्वाधरदिगवस्थितव
स्तुपरिच्छेदकंचेत्युभयमपिगृह्यतइतिभावः॥लोकव्यवहारादिति॥द्विपुरुषीपरिखेतिलोकव्यवहारादित्यर्थः॥उत्तरसू
त्रानुरोधादिति॥संख्यायाःसंज्ञेत्युत्तरसूत्रानुरोधादित्यर्थः॥संख्याहिनपारिभाषिकपरिमाणं॥बहुव्रीहेरूधसः॥नंन्वन
ङ्ङीषोःसमानविषयकत्वेनपर्यायेणतयोःप्रवृत्याङीष्पक्षेनानङि॰तिकयंडापूङीपूनिषेधेषुप्राप्तेष्वितिग्रंथःसंगछ
तामित्यतआह॥समासांतानामिति॥तथाचपूर्वमनङ्पक्ष्यान्ङीषितिनानयोःपर्यायइतिडापूङीबितिमूलंयुक्तमितिभा
वः॥बहुव्रीहेःकिमितिऊधःशब्दस्यनपुंसकत्वात्केवलात्तदंतादुत्तरपदार्थप्रधानात्तत्पुरुषाच्चनङीष्॥अत्यूधःशब्दस्य
स्त्रियांवृत्तावपितत॰ संख्याव्ययादेरितिङीपाभवितव्यंतथाचबहुव्रीहेरित्यनुक्तावपितएतएवपर्यवस्यतीतिभावः॥प्रा
प्तोधाइति॥अत्यूधाइतिइतितूत्तरसूबहुव्रीहिग्रहणप्रत्युदाहरणमित्युपेक्षितं॥यद्यपिभ्रोङीषितिसुवचंतथाप्युत्तरार्थंबहु
व्रीहिग्रहणं॥लक्षणांतरसित्थमिति॥दामहायनांताच्चेतिसूत्रसित्थमित्यर्थः॥घृतादित्वादिति॥अयंविचारःप्रासंगिकः॥न
नुसुमंगलीरित्यत्रहलन्ङ्याबादिसूत्रेणलोपेनभवितव्यमित्याशंक्याह॥ईप्रत्ययइति॥छंदसीवनिपावित्यनेन॥विभाषासपू

यद्यप्यमहत्पूर्वग्रहणेनस्त्रियामित्यधिकारेतदंतविधिज्ञापनेनसपूर्वस्येत्यनुक्तावपितस्यनत्वंसित्यतितथापिअसक्तिस्मिन्ननुपसर्जनादितिपत्युर्विशेषणंस्यात्तस्यगृह्यमाणविशेषणत्वनियमात्तथाचदृढपत्नीतिबहुव्रीहौनस्यादतः सपूर्वग्रहणं॥सपूर्वस्येत्युक्तौतुतस्यैवविशेषणंगृह्यमाणत्वात्॥फलांतरमपिमूलेस्पष्टीभविष्यति॥किंपूर्वावयवोऽर्थवानेव॥उत्तानर्थकोपि॥नाद्यइत्याह॥विद्यमानपूर्वावयवत्वेति॥नांत्यइत्याह॥अव्यभिचाराच्चेति॥अमहत्पूर्वग्रहणेनग्रहणवतेतिनिषेधस्यात्रप्रकरणेप्रवृत्त्यभावज्ञापनात्त्रत्ययविधानाभावाच्चेत्यपिबोध्यं॥इत्यन्येइति॥वस्तुतस्तुबहुवृषलपतिरितिबहुव्रीहेरपिपत्यंतत्वात्तस्यचानुपसर्जनत्वादत्रापिनकारोभवत्येव॥ननुमूलेव्यस्तेकथमित्युक्त्यासमस्तेवृषलपत्नीत्यादौनत्वानुपपत्तिशंकानेतिलभ्यतेतच्चासंगतम्॥विभाषेतिसूत्रेयज्ञसंयोगइत्यनुवृत्त्यावृषलस्ययज्ञानधिकारेणतत्रापिनुपपत्तिशंकातादवस्थ्यादित्याशंक्याह॥नसंबध्यतइति॥अत्रप्रमाणमाह॥भाष्येइति॥वृषलस्यपतिरिति।वृषलकर्तृकसुकृतस्वामिनीत्यर्थः॥ननुसपूर्वस्यकिंगवांपत्तिरितिमूलमसंगतं॥सपूर्वस्येत्युक्तावप्येतद्दोषतादवस्थ्यात्॥गवामित्यस्यपूर्वोच्चारितस्यसत्वादित्याशंक्याह॥अवयववाचीति॥तेननिपातेन॥तत्रेत्यर्थइति॥तत्रसूत्रेइत्यर्थः॥तेनेति॥तत्रसर्वत्रेत्यंगीकारेणेत्यर्थः।आद्येनसूत्रेणयुक्तइत्यण्॥द्वितीयेसंधिवेलेत्यण्॥तस्यविकारइत्यणितुनेदं॥प्रतिपदोक्तपरिभाषयानसूत्रपदघटित

शब्देनविहितग्रहणस्वग्रहणात्॥इत्यपरइति॥इदमेवयुक्तं॥विधित्वानुरोधादिति॥मुख्यार्थकैतत्प्रवृत्तौतत्रजातेरस्त्रीत्यनेनसिद्धौ
नागग्रहणस्यनियमार्थत्वंवाच्यंस्यादितिभावः॥गौरित्यर्थेइति॥वृत्तिमतेत्वत्रनीलीत्येव॥प्रतिपदोक्तपरिभाषायास्तेनप्रवृत्त्यनंगीका
रादितिबोध्यं॥नरूपादीनामिति॥उवर्णांतत्वाभावेनङीषोऽप्रवृत्तावपिगुणवचनेतिष्यङ्वारणायैषांगुणवचनत्वंनेष्यतइतिबो
ध्यं॥श्रेक्ष्यमित्यत्रब्राह्मणादित्वात्ष्यञ्॥शुक्लेतिलिति॥इदमप्ययुक्तं॥खरुसंयोगोपेतिनिषेधात्॥पीतेत्युचितं॥पुंयोगाद्वा॥पुंस्ये
वयःप्रसित्यइति॥ननुशूद्रादिशब्देभ्योवस्तुतःशूद्रत्वविशिष्टायांशूद्रस्त्रीत्येवंरूपेणविवक्षितायांङीपूनप्राप्नोतीतिचेन्नेष्यत
एवात्रङीष्॥चतुर्भिःप्रकारैरतस्मिन्तस्इत्येतद्भवति॥तात्स्यात्तात्थर्म्यात्तत्सामीप्यात्तत्साहचर्यादितिप्रकृतसूत्रस्थभाष्यादिति
केचित्।अन्येत्वथवापुनरस्तुतस्यामेवप्रष्टशब्दइतितदुत्तरभाष्यादुक्तविषयेपिङीषिष्यते।वस्तुतस्तुजातिमत्वेपिशूद्रस्यस्त्रीत्येवं
रूपेणविवक्षितानतुशूद्रत्वजातिमत्वेनेतिनततष्टाप्।सर्वत्रशक्यतावच्छेदकारोपस्वलक्षणेतिननियमः।सतिसंभवेशक्यतावच्छे
दकारोपोलक्षणेतिनाग्नेयःस्थालीपाकइत्यत्रपुंवद्भावानापत्तिरित्याहुः।गौरादिषुबोध्यमिति।देवकदुहितेत्यर्थेतेनङीषोऽविधानाद
संगतमेतत्।तन्निषेधस्य।तृजकाभ्यांकर्त्तरीतिनिषेधस्य।नियमार्थमिति।पदस्यादितिविग्रहेसुबुत्पत्तेःप्राक्समासात्स्यशब्दस्याप्रद
त्वात्स्त्वनिषेधस्यसात्पदाद्योरित्यनेनसिद्धत्वात्॥वाराणसीप्रसादस्यनियोगेनप्रयत्नतः मन्नालालेनविदुषामुद्रितेयंशिलासरैः शुभमस्तु॥

इतिराघवेन्द्राचार्य्यकृताशब्देन्दुशेखरविषमव्याख्यासमाप्ता